THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

GAEKWAD'S ORIENTAL SERIES

No. 147

Gaekwad's Oriental Series
Published under the Authority of the Maharaja Sayajirao University of Baroda.

General Editor:
B. J. Sandesara,
M.A., Ph.D.

No. 147

गूर्जरेश्वरपुरोहितकविश्रीसोमेश्वरदेवविरचितं

रामशतकम् ।

(टीकाद्वयोपेतम्)

RĀMAŚATAKAM

of

Kavi Śrī Someśvara, the family-
priest of Gujarat-Chaulukyas
(With the commentaries Hṛdayarañjanī and Bālabodhinī)

Edited by

Agamaprabhakara Muni Punyavijaya
and
Bhogilal Jayachandbhai Sandesara
Director, Oriental Institute,
Professor and Head of the Department of Gujarati,
M. S. University of Baroda

ORIENTAL INSTITUTE
BARODA
1965

CONTENTS

	Pages
Introduction	VII-XII
Text of Rāmaśataka with two commentaries	1-104
Pariśiṣṭam—Keśavaviracita-Rāmaśatakāvyam	105-116
Padya-sūcī of Rāmaśataka of Someśvara	117-118
Padyasūcī of Rāmaśata of Keśava	119-120

INTRODUCTION

Someśvara or Someśvaradeva was the hereditary priest of the Caulukya Kings of Aṇahilavāḍ Pāṭaṇ in Gujarāt and was a friend and protégé of Vastupāla, minister of Vāghelā feudatories of Caulukyas ruling during the first half of the thirteenth century A.D at Dhavalakka or Dholkā in modern Ahmedabad District. Someśvara was a Sanskrit poet of remarkable merit. He has attempted successfully various forms of Sanskrit literature like Mahākāvya, Nāṭaka, Stotra, Praśasti, Subhāṣita, etc. For a detailed survey of life and works of Someśvara the reader is requested to refer to the Introduction to his Ullāgharāghava Nāṭaka (G. O. S., no. 132) and to Dr. B. J. Sandesara's book, 'Literary Circle of Mahāmātya Vastupāla and Its contribution to Sanskrit Literature' (Singhi Jaina Series, no. 33), pp. 44-55, 88-94, 103-106, 113-118, 128-130, 136-139, 140-142.

Out of various literary works of Someśvara, his two Mahākāvyas—Kīrtikaumudī describing the good deeds of Vastupāla and Surathotsava narrating the mythological story of king Suratha contained in the Saptaśatī or Devimāhātmya were published in the Bombay Sanskrit Series and Kāvyamālā, respectively. His play Ullāgharāghava, dramatizing the story of the Rāmāyaṇa, edited by the present editors, has been published in the Gaekwad's Oriental Series. Praśastis composed by Someśvara are already printed in various journals and then in collections of inscriptions like Prācīna Lekhamālā, Prācīna Jaina Lekhasaṅgraha and Historical Inscriptions of Gujarāt. The Karṇāmṛtaprapā, an anthology of verses, has been recently edited by Ācārya Jinavijayajī and published by the Rājasthān Oriental Research Institute, Jodhpur. The Rāmaśataka was the only work of Someśvara which remained to be brought to light. With its publication here all the available literary works of Someśvara are now in print.

The Rāmaśataka is a hymn to Rāma in one hundred verses, as its very name suggests. If Someśvara's Ullāgharāghava dramatizes the whole of the Rāmāyaṇa (रामायणं नाटकरूपमेतत्। Praśasti of the Ullāgharāghava, v. 4d), Rāmaśataka is a panegyric of Rāma (श्रीरामभद्रस्य यशःप्रशस्तिम्। v. 101b), and extols the deity with reference to all the principal events in his life. The metre uniformly used in the Rāmaśataka is Sragdharā. Verse 101 which is not, really speaking, the part of the hymn proper is in the Upajāti metre and mentions the name of the author. The hymn is evidently modelled on the Sūryaśataka of Mayūra

and Caṇḍīśataka of Bāṇa, which are also hundred-verse hymns in the Sragdharā metre and were popular in Sanskrit literature.[1]

The praise in the Rāmaśataka follows the course of biographical events in Rāma's life. Verse 1 is in general praise of Rāma. Verses 2-6 are devoted to his birth and child-plays and verses 7-8 to his training in various lores. Then we find protection of Viśvāmitra's sacrifice by Rāma (vv. 9-11), the killing of Tāḍakā and other demons (vv. 12-15), redemption of Ahalyā (vv. 16-19), Rāma's coming to Mithilā with Viśvāmitra, breaking of Śiva's bow and marriage with Sītā (vv. 20-31), return from Mithilā and meeting Paraśurāma (vv. 32-39), Daśaratha's desire to install Rāma as the king and Rāma's going to the forest (vv. 40-56), wanderings in the forest, the abduction of Sītā, and Rāma's meeting with the monkeys (vv. 57-71), Hanumān's meeting with Sītā, building of the bridge on the ocean and the attack on Laṅkā (72-81), battle of Rāma and Rāvaṇa, killing of the latter and installation of Vibhīṣaṇa on the throne of Laṅkā (vv. 82-93), Sītā's purification in fire, Rāma's coming to Ayodhyā, and coronation in the end (vv. 94-100).

In this Stotra, as in his other compositions, we find Someśvara as a poet of high calibre. Though the Rāmaśataka has been modelled on the Sūrya-śataka and the Caṇḍīśataka, it is nowhere a verbal imitation of these older poems; we can only say that the poet was inspired by the popularity of these works. The Rāmaśataka is entirely free from the artificiality of some of the later hymns—on the contrary, it has the quality of Prasāda or perspicuity, like his Mahākāvya Kīrtikaumudī. It has that heart-felt fervour and devotion required in this type of lyric poetry. These one hundred chiselled verses in Sragdharā also speak for the author's mastery over the longer metres. This one hymn is enough to reserve a place of honour in the stotra-literature for its author, Someśvara.

Two commentaries on Someśvara's Rāmaśataka are known—Hṛdayarañjanī or Śubhaharivallabhā of Ekanāthabhaṭṭa[2] and Bālabodhinī by some anonymous author. The both are edited and printed alongwith the text of the Rāmaśataka.

---

[1] The Jinaśataka of Jambu Guru (published in the Kāvyamālā, Vol. VII) and Nārāyaṇaśataka of Vidyākara (G.O.S., no. 71), Jaina and Vaiṣṇava hymns respectively, are also in 100 Sragdharā metres and appear to have continued the same literary tradition. The date of Jinaśataka is uncertain, though it is definitely later than the Rāmaśataka; the author of the Nārāyaṇaśataka lived in the 16th century A.D.

[2] It is not possible to say whether this commentator is identical with Ekanātha who has written commentaries on the Kirātārjunīya and Śiśupāla-vadha (Krishnamachari, Classical Sanskrit Literature, para 53 and 55).

Appendix—A Rāmaśata by Keśava is availalbe, and being a hundred-verse hymn on an identical subject, it has been edited and printed as an Appendix. Unlike Someśvara's Rāmaśataka, it is composed in a variety of metres. The poem contains 102 verses in all, but verse 101 is a concluding stanza and the author gives some information about himself in verse 102. He was a son of Ananta and a grandson of Keśava and was a native of Puṇya-stambha (modern Puṇatāmbā in the Ahmednagar District) on the bank of Godāvarī. There is no definite evidence to fix up the date of this author, but it is noteworthy that the manuscript of his work dated V. S. 1873 (1817 A.D.) is copied down at Saṅkheṭaka or Saṅkheḍā in the Baroda District.

CRITICAL APPARATUS

The present edition of Someśvara's Rāmaśataka is based upon the following manuscripts :

I. MS no. 29 of 1872-73 of the Government Collection of Manuscripts deposited at the Bhandarkar Institute, Poona.

Material—Paper.

Folios—36 (folios 5 and 6 are missing).

Size—10¾″ × 4½″.

Script—Devanāgarī.

No. of lines on each folio—13.

No. of letters in each line—44 to 48.

Condition—Good.

Date of copying—1717 V.S.

Place of copying—Stambhatīrtha (modern Cambay).

In addition to the text of Rāmaśataka, this MS contains the commentary Hṛdayarañjanī or Śubhaharivallabhā of Ekanāthabhaṭṭa. The following is the colophon—

संवत् १७१७ वर्षे फाल्गुनवदि ९ बुधवासरे अद्येह स्तंभतीर्थवास्तव्यं उदीच्यज्ञातीय आचार्य व्रजनाथसूत आचार्य यदुनंदनेन लिखितमिदं पुस्तकं। स्वार्थं परार्थं च। यादृशं पुस्तके० दोषो न विद्यते ॥ श्री ॥ छ ॥ श्रीरामाय नमः। श्रीहनुमते नमः। श्री ग्रंथसंख्याशत १५०० पूर्णं। श्रीगोपीजनवल्लभाय नमः। श्रीविष्णवे नमः। श्रीसूर्याय नमः। श्रीसरस्वत्यै नमः। सर्वेषां शुभमस्तु ॥

This manuscript is, on the whole, superior to others. It was, therefore, adopted as the basis of the text. Its unsatisfactory readings are, however, replaced in the text by better readings from other MSS and given as variants in the footnotes.

II. MS no. 166 of 1882-83 of the Government collection of Manuscripts deposited at the Bhandarkar Institute, Poona; designated भा॰ १.

Material—Paper

Folios—14

Size—8½″ × 4″

Script—Devanāgarī

No. of lines on each folio—10.

No. of letters in each line—30 to 32

Condition—Good; left-hand edges of folios damaged.

Date of copying—1672 V. S.

Place of copying—Nāgamaṇḍala (?)

The following is the colophon—

इति श्रीसोमेश्वरदेवभट्टविरचितं श्रीरामशतकं संपूर्णमिति । श्रीरस्तु ॥ श्री ॥ छ ॥ श्री ॥ संवत् १६७२ वर्षे शाके १५...... प्रवर्त्तमाने उत्तरायनगते श्रीसूर्ये वैशाषमासे कृष्णपक्षे नवम्यां नागमंडले वसन्विश्वनाथो लीलिखत् । श्रीः ॥

III. MS no. 84 of 1883-84 of the Government Collection of Manuscripts deposited at the Bhandarkar Institute, Poona; designated भा॰ २.

Material—Paper

Folios—11 (folio 1 missing)

Size—9¾″ × 4¼″

Script—Devanāgarī

No. of lines on each folio—11–12

No. of letters in each line—30 to 32

Condition—Good; left-hand edges of folios slightly damaged.

Date of copying—Not mentioned.

Place of copying—Not mentioned.

The following is the colophon—

इति गूर्जरेश्वरपुरोहितश्रीसोमेश्वरविरचितं रामशतं समाप्तमित्ति ॥

IV. MS no. 459 of 1887-91 of the Government Collection of Manuscripts deposited at the Bhandarkar Institute, Poona; designated भा॰ ३

Material—Paper

Folios—52

Size—11½″ × 5¼″

Script—Devanāgarī. Text is written in middle of the folio, and the commentary above and below it in smaller characters.

No. of lines on each folio—3 (text), 3-6 (commentary).

No. of letters in each line—28 to 30 (text), 35 (com.).

Condition—Very good.

Date of copying—1924 V.S.

Place of copying—Not mentioned.

The following is the colophon—

इतिश्री रामशतककाव्यविवरणं संपूर्णम् ॥ लिपीकृतं ॥ ब्राह्मणशिवकुमार मिती ज्येष्ट कृष्ण ७ ॥ सांन्निश्चरे ॥ संवत् १९१४.

In addition to the text this MS contains the commentary Bālabodhinī.

V. MS no. 354 of 1895-98 of the Government Collection of Manuscripts deposited at the Bhandarkar Institute, Poona; designated भा० ४.

Material—Paper.

Folios—37.

Size—$12\frac{3}{4}'' \times 5\frac{3}{4}''$.

Script—Devanāgarī. Text is written in the middle of the folio and the commentary above and below in smaller characters.

No. of lines in each folio—3-4 (text), 6-8 (com.)

No. of letters in each line—35-40 (text), 45-48 (com.)

Condition—Very good.

Date of copying—1915 V.S.

Place of copying—Raivāsā.

In addition to the text, this MS also contains the commentary Bālabodhinī.

The following is the colophon—

श्रीमते रामाय नमः । लिखीतं मोहनदास रैवासा नग्रमध्ये श्रीजानकीवल्लभजीका मंदीरमध्ये लिखायतं पुजारीजी हरिदासजी ॥ मिती द्वितीय ज्येष्ट शुक्ल नौम्यायां संवत् १९१५ ॥

VI. MS no. 8592 of the collection of Muni Puṇyavijayajî deposited at the L. D. Bhāratīya Sanskṛti Vidyāmandira, Ahmedabad; designated पु०. This MS. has only the commentary Bālabodhinī, and not the whole text of Rāmaśataka.

Material—Paper

Folios—40

Size—10″ × 4″

Script—Devanāgarī

No. of lines on each folio—9
No. of letters in each line—33 to 36
Condition—Good
Date of copying—1586 V. S.
Place of Copying—Raṇastambha (Ranathambhor)

The following is the colophon—

संवत् १५८६ वर्षे श्रावण सुदि १० गुरवासरे ॥ अथ रणस्तंभमध्य लिषितं राजाधिराज महाराज श्रीश्रीविक्रमसाहि । लिषितं ठाकुर ब्रह्मदासु कायस्थ माथुरः ॥ जादृसं पुस्तकं दृष्ट्वा तादृशं लिषितं मया । जदि सुद्धमसुधं वा मम दोषो न दियते ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ रामसतटीका समाप्ता ॥ सुभं भत् ॥ ददात् ॥ मांगल्यं ॥

Appendix—The edition of the Rāmaśata of Keśava printed in the Appendix is based on the MS no. 9745 in collection of the Oriental Institute, Baroda. The following are the details regarding this manuscripts:

Material—Paper
Folios—7
Size—11″ × 5.2″
Script—Devanāgarī
No. of lines on each folio—12-13
No. of letters on each folio—36 to 40
Condition—Good
Date of copying—1873 V. S.
Place of copying–Saṅkheṭakapura (mod. Saṅkheḍā in the Baroda District)

The following is the colophon—

इति केशवविरचितं रामशतं समाप्तम् ॥ श्री ॥ श्रीरस्तु ॥ श्री विन्ध्यवासिन्यै नमः ॥ संवदष्टादश[शत]-त्रिसप्ततिमितेऽब्दे १८७३ माघमासे सिते पक्षेऽष्टम्यां सूर्यवासरान्वितायां सङ्खेटकपुरस्थेन व्यासावटङ्केन लक्ष्मीरामात्मजेन नारायणेन लिखितमिदं रामशताख्यकाव्यं समाप्तिमगमत् ॥ आत्मपठनार्थम् ॥ श्री ॥ छ ॥ यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥

Acknowledgement

The editors are grateful to the Authorities of the Bhandarkar Oriental Research Institute, Poona, for the loan of MSS of the Rāmaśataka of Someśvara. They are also thankful to Mr. Amritlal Mohanlal Pandit, Research Officer, Prākrit Text Society, and Mr. B. L. Shanbhogue, Research Officer, Oriental Institute, Baroda, for assistance in reading the proofs and to Mr. P. H. Joshi, Research Assistant in the Manuscript Section of the Oriental Institute, for preparing the Index of Verses. Their thanks are also due to the Authorities of the M. S. University of Baroda for including this work in the Gaekwad's Oriental Series.

गूर्जरेश्वरपुरोहितकविश्रीसोमेश्वरदेवविरचितम्

रामशतकम् ।

हृदयरञ्जनी-बालबोधिनीटीकाभ्यां समेतम् ।

[हृदयरञ्जनी टीका]

॥ श्रीगोपीजनवल्लभाय नमः ॥

श्रीकान्तनाभिसरसीरुहलब्धजन्म-
वक्त्राम्बुजावलिविहारविदग्धहंसी ।
पद्मासना सितदुकूलयुगं वसाना,
सा **भारती** भवतु मे वरदाऽवदाता ॥ १ ॥

जनकेन्द्रसुतामनोऽधिनाथं, **रघुनाथं** सुरनाथसेवितांह्रिम् ।
शरणं करुणासमुद्रमेकं, भजतां कल्पमहीरुहं भजेऽहम् ॥ २ ॥

पपौ समं यो मुख-पुष्कराभ्यां, स्तनौ जनन्याः सुभगाङ्कशायी ।
स विघ्नराजो मम विघ्नजातं, भिनत्तु सस्मेरगजेन्द्रवक्त्रः ॥ ३ ॥

स्रग्धरावृत्तरम्यायाः **सोमेश्वर**कृतेर्मया ।
रामप्रशस्तेः क्रियते टीका **हृदयरञ्जनी** ॥ ४ ॥

मार्गं प्रबन्धकर्तॄणामालोक्यैनां प्रकुर्वतः ।
अज्ञानता न दोषाय दोषो हि पुरुषाश्रयः ॥ ५ ॥

इह हि धीरोदात्तनायकस्य जानकीजानेः **दशकण्ठ**कन्दलीविपिनदावानलस्य **विष्णोः** सप्तमावतारस्य **रघु**कुलावतंसस्य **श्रीरामभद्र**स्य पुण्यकथाकीर्तने आत्मानं पवित्रीकर्त्तुकामः **सोमेश्वर**नामा कविः **स्रग्धरा**वृत्तमाश्रित्य शतश्लोकैः सकल**रामायण**कथां संक्षिप्य **रामशता**ख्यं काव्यमरचयत् । अत्र धीरोदात्तो नायकः । वीररसात्मकोऽङ्गी रसः । अन्ये सर्वेऽपि अङ्गभूता अलङ्काराः शब्दा-ऽर्थावलम्बनास्तत्र द्रष्टव्याः । "रसमहत्त्वाद् महत्त्वं व्यपार्थत्वाच्चोत्तमं महत्त्वेऽस्याः । इदमुत्तममतिशयितं व्यङ्ग्ये वाच्यं ध्वनिर्बुधैः कथितः ।"

[ ] इति । वृत्तभेदस्तु उक्तः । तत्राऽऽद्यः श्लोकः —

[बालबोधिनी टीका]

॥ श्रीरामचन्द्राय नमोनमस्तराम् ॥

रामचन्द्रं प्रणम्याऽऽदौ सानुजं जानकीपतिम् ।
रामशतस्य व्याख्येयं क्रियते बालबोधिनी ।

उद्धर्त्ताऽसौ धरित्रीभरमिति भुजगाधीश्वरो वंशवृद्धिः,
संवृत्तेत्यंशुमाली दलितपरिभवा भाविनी द्यौरितीन्द्रः ।
हर्षोन्निद्राननश्रीरजनि जनिदिने यस्य लक्ष्मीवयस्यः,
सोऽयं वः सर्वकालं सफलयतु मनःकामनां रामनामा ॥ १ ॥

[हृदयरञ्जनी]

उद्धर्त्तेति। अत्रेयं पदयोजना—"सफलयतु हरिः कामनां रामनामा" इति **सुन्दरः पाठः**। [सः] हरिः वः मनःकामनां सफलयतु। "यमाऽनिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु। शुकाऽहिकपिभेकेषु हरिर्ना कपिले त्रिषु ॥" [ ] इति हरिशब्दवाच्यानामेषां पदार्थानां क[? तरोऽ]सौ हरिः ? इत्याकाङ्क्षायामाह—'रामनामा' इति राम इति नाम-अभिधानं यस्येति स रामनामा। जामदग्न्य-बलभद्रयोः समानाभिधानत्वात् तयोरन्यतमो भविष्यतीत्याशङ्क्याऽऽह—लक्ष्मीवयस्य इति। एवम्भूतः 'हरिः' सीतावल्लभो रामः 'वः' युष्माकं 'मनःकामनां' मनोरथं 'सफलयतु' पूर्णं करोतु। मनःकामनापदे मनोरथमात्रं मनोरथजातं च विवक्षितम्, अन्यथा "मनोरथं पूरयतु" इत्येवमभिहितं स्यात्। किंलक्षणः स हरिः ? 'लक्ष्मीवयस्यः' लक्ष्मीर्वयस्या—सखी मित्रं वा यस्य सः, भक्तानां सर्वसम्पत्प्रदत्वं व्यङ्ग्यम्। स इति कः ? 'यस्य' रामस्य 'जनिदिने' जनेर्दिनं जनिदिनं-जन्मदिवसः तस्मिन् जनिदिने 'भुजगाधीश्वरः' भुजगानां—सर्पाणामधिक ईश्वरः—फणिराजः शेषः 'इति' हेत्वर्थः इति कारणात् 'हर्षोन्निद्राननश्रीः' हर्षेण उन्निद्रा हर्षोन्निद्रा,आननानां श्रीः—शोभा [आननश्रीः], हर्षोन्निद्रा आननश्रीर्यस्य स हर्षोन्निद्राननश्रीः प्रमदोत्फुल्लमुखलक्ष्मीः 'अजनि' जातः, जनेः कर्त्तरि "दीपजनबुध" [पाणि० ३.१.६१] इत्यादिना कर्त्तरि चिण्। इतीति किम् ? 'असौ' रामः 'मे' मम 'धरित्रीभरं' धरित्र्याः भरं धरित्रीभरं '**उद्धर्त्ता**' उद्धरिष्यति, रावणादिराक्षसभाराक्रान्तां मेदिनीं तद्वधेन लघु करिष्यतीति भावः। तथा 'अंशुमाली' अंशु(शोः—)किरणाद् मालते माला—श्रेणिरस्तीति वा अंशुमाली—सूर्यः

'इति' हेतोः उन्निद्राननश्रीरजनि, उन्निद्रेति पूर्ववत् । इतीति किम् ? मे 'वंशवृद्धिः संवृत्ता' वंशस्य वृद्धिर्वंशवृद्धिः—सन्तानसन्ततिः 'संवृत्ता' सम्यग् वृत्ता । यस्य जनिदिने इति प्रत्येकं वाक्यं सम्बध्यते । तथा इन्द्रोऽपि इति हर्षोन्निद्राननश्रीरजनि । किमिति ? 'द्यौः' स्वर्गः 'दलितपरिभवा' निष्कण्टका 'भाविनी' भवित्री, स्वर्गस्य शत्रुभयं हरिष्यत्ययमिति । सर्वकालमिति क्रियाविशेषणम्, सर्वदेत्यर्थः । यस्य जन्मनैव सर्वेषां हर्षोऽभूदित्यर्थालङ्कारो दीपकालङ्कारश्च । प्रकृतिच्छन्दोजातिः, एकविंशत्यक्षरा प्रकृतिः, प्रकृतिरुत्कृतिरिति वृत्तालङ्कारौ, स्रग्धरावृत्तम् "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्" [वृत्तर० ३.२१.१] । हेतुरलङ्कारश्च । तथा चोक्तम्—

हेतुमता सह हेतोरभिधानमभेदकृद् भवेद् यस्य ।
सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूतः ॥ १ ॥

[रुद्रटकाव्या० ७.८२.] इति ।

धरित्र्याद्युद्धरणस्य हेतोस्तद्वता रामेण सह इति भेद्भवेद् (? अभेदकृद्) यस्य सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूत इति । न ह्यत्र जनिदिनमात्रं हर्षकारणम्, यत्किञ्चिज्जन्तुजनिदिनस्यापि हर्षकारणत्वप्रसङ्गात्, किन्तु यद् विशिष्टं विशिष्टस्य कारणत्वे विशेषणभूतस्य कारणत्वं तस्य हर्षकारणस्य धरित्र्युद्धरणेन हेतुना अभेदाभिधानाद् हेतुरलङ्कारः ॥ १ ॥

[बालबोधिनी]

उद्धर्त्ताऽसाविति । सोऽयं 'रामनामा' रामचन्द्रः 'वः' युष्माकं 'सर्वकालं' सर्वदा मनःकामनां 'सफलयतु' सफलीकरोतु । मनसः कामना—वाञ्छना मनःकामना ताम् । राम नाम यस्यासौ रामनामा । किंलक्षणः ? 'लक्ष्मीवयस्यः' लक्ष्मीः वयस्या—समानवयस्का यस्यासौ लक्ष्मीवयस्यः, लक्ष्म्याः वयस्यो लक्ष्मीवयस्य इति वा । स कः ? 'यस्य' रामस्य 'जनिदिने' जन्मदिवसे 'भुजगाधीश्वरः' शेषनागः 'इति' कारणाद् हर्षोन्निद्राननश्रीः 'अजनि' बभूव । जनिः—जन्म तस्य दिनं जनिदिनं तस्मिन् । भुजाभ्यां गच्छन्तीति भुजगाः—सर्पाः, तेषां अधीश्वरः भुजगाधीश्वरः । हर्षेण उन्निद्रा—विकसिता आननश्रीः—मुखशोभा यस्यासौ हर्षोन्निद्राननश्रीः । इतीति किम् ? 'असौ' रामः 'धरित्रीभरं उद्धर्त्ता' धरित्र्याः—पृथिव्याः भरः—भारः धरित्रीभरः तं धरित्रीभरं 'उद्धर्त्ता' उद्धरिष्यति । पुनः स कः ? यस्य जनिदिने 'अंशुमाली' [१]सूर्यः 'इति' कारणाद् हर्षोन्निद्राननश्रीः अजनि । अंशूनां—किरणानां माला साऽस्यास्तीति अंशुमाली । इतीति किम् ? 'वंशवृद्धिः संवृत्ता' वंशस्य वृद्धिर्जाता । पुनः स कः ? यस्य जनिदिने 'इन्द्रः' शक्रः 'इति' कारणाद् हर्षोन्निद्राननश्रीः अजनि । इतीति किम् ?

१ श्रीसूर्यः पु० ।

'द्यौः' [1]स्वर्गलोकः 'दलितपरिभवा भाविनी' दलिताः—खण्डिताः परिभवाः—पराभवा यस्याः सा दलितपरिभवा 'भाविनी' भवितेति। एवं [2]सर्वत्राग्रिमपद्येषु योज्यम्। यत्तदोर्नित्यसम्बन्धादसन्तावपि यत्तदौ एकस्मिन् सति परस्परं ज्ञातव्यौ ॥ १ ॥

*

पर्यङ्के पङ्कजन्माङ्किततलविचलत्पाणि-पादप्रवालः,
खेलन् बालः प्रमोदं प्रथयतु मिथिलानाथपुत्रीपतिर्वः।
पित्रोः पोतप्रतीतिः समभवदुचिता पुंसि यस्मिन् पुराणे,
पारं संसारवार्द्धेर्न हि परमपरस्तं विना नेतुमीशः ॥ २ ॥

[हृदयरञ्जनी]

पर्यङ्के पङ्कजन्मेति। अत्रायं क्रिया-कारकसम्बन्धः—'मिथिलानाथपुत्रीपतिः' मिथिलायाः नाथः—जनकः मिथिलानाथः तस्य पुत्री—सीता तस्याः पतिः—भर्ता रामः 'वः' युष्माकं भवतां 'प्रमोदं' हर्षं 'प्रथयतु' विस्तारयतु, सर्वकालमिति उत्तरत्रापि सर्वत्र क्रियाऽनुसन्धेया। किं कुर्वन् रामः? 'पर्यङ्के खेलन्' मातुरुत्सङ्गे खेलन्—रममाणः। किंलक्षणः? अत एव 'बालः' शिशुः। किंलक्षणः बालः? 'पङ्कजन्माङ्किततलविचलत्पाणि-पादप्रवालः' पङ्कजन्मना अङ्किते च ते तले च पङ्कजन्माङ्किततले, ताभ्यां विलसन्तौ पाणि-पादप्रवालौ यस्य सः, कमलचिह्नेन भासुरकर-चरणकिशलयः। स कः? 'यस्मिन्' रामे 'पित्रोः' मातुः कौशिल्यायाः पितुर्दशरथस्य च 'पोतप्रतीतिः' [नौप्रतीतिः] 'उचिता' पित्रोः योग्या ['समभवत्' सञ्जाता]। किंलक्षणे यस्मिन्? 'पुराणे [पुंसि']] पुराणपुरुषे नारायणे, पितृभ्यामसौ **पुराणे** पुराणपुरुषरूपेण ज्ञात इति भावः। विरोधाभासोऽलङ्कारः, यो बालः स कथं पुराणपुरुषः?। यस्मिन्निति यच्छब्दोपादानं तच्छब्दमपेक्षत इति तच्छब्दं निर्दिशन्नाह—'अपरः' कश्चन पुमान् 'तं विना' श्रीराममन्तरेण 'संसारवार्द्धेः परं पारं नेतुं नेशः' संसार एव वार्द्धिः—समुद्रः तस्य 'परं [पारम्'] अन्त्यपारं तद् ऋते नेतुं—प्रापयितुं समर्थो नास्तीत्यर्थः, प्राणिन इति शेषः। पाञ्चाली रीतिः, "द्वित्रिपदा पाञ्चाली" [रुद्रटकाव्या० २.५.]। आरभटी वृत्तिः। प्रसादो गुणः। पर्यङ्के खेलन्निति जातिरलङ्कारः, तद्यथा'—'संस्थानावस्थादि यद् यस्य यादृशं भवति। लोके चिरप्रसिद्धं न तत् कथमनन्यजातिः?" ॥ २ ॥

[बालबोधिनी]

पर्यङ्के इति। सः 'बालः' रामः 'वः' युष्माकं 'प्रमोदं' हर्षं '[3]प्रथयतु' करोतु। किं कुर्वन्? 'पर्यङ्के' शय्यायां 'खेलन्' क्रीडन्। किंलक्षणः? 'पङ्कजन्माङ्किततलविचलत्पाणि-

१ स्वर्गः 'दलित° पु०। २ त्रापि सम्बन्धेषु पु०। ३ 'प्रथयतु' विस्तारयतु। किं पु०।

पादप्रवालः' पङ्कात्–कर्दमात् जन्म यस्य तत् पङ्कजन्म–कमलम्, पङ्कजन्मना अङ्कितं–चिह्नितं तलं यस्य पाणिपादप्रवालस्य तत् पङ्कजन्माङ्किततलम्, पाणी च पादौ च पाणिपादम्, पाणिपादं प्रवालमिव पाणिपादप्रवालम्, विचलच्च तत् पाणिपादप्रवालं च विचलत्पाणिपादप्रवालम्, पङ्कजन्माङ्किततलं विचलत्पाणिपादप्रवालं यस्यासौ पङ्कजन्माङ्किततलविचलत्पाणिपादप्रवालः। पुनः किंलक्षणः? 'मिथिलानाथपुत्रीपतिः' मिथिलायाः नाथः–स्वामी मिथिलानाथः तस्य पुत्री मिथिलानाथपुत्री तस्याः पतिः। स कः? यस्मिन् 'पुराणे पुंसि' रामे 'पित्रोः' मातापित्रोः, "पिता मात्रा" [पाणि० १-२-७०] इत्येकशेषः, 'उचिता' योग्या 'पोतप्रतीतिः' नौप्रतीतिः 'समभवत्' अजनि। युक्तं चैतत्, 'हि' यतः कारणात् 'तं' रामं विना 'संसारवार्द्धेः' संसारसमुद्रस्य परं पारं 'नेतुं' प्रापयितुम् 'अपरः' अन्यः 'ईशः' समर्थो न। वारि धीयतेऽस्मिन् इति वार्द्धिः, संसारो वार्द्धिरिव संसारवार्द्धिरिति ॥ २ ॥

*

रक्षःसन्तानकक्षज्वलनकण इवाऽऽचार्यवर्यप्रयुक्तां,
संस्काराधारधारां दधदधिकमहाः पातु रामः शिशुर्वः।
कौशल्यावल्लभेन प्रथममजतनूजत्वभाजा बभूवे,
[1]यं पश्चात् केशवांशं जगति जनयताऽजस्य तातेन जातम् ॥ ३ ॥

[हृदयरञ्जनी]

रक्षःसन्तानकक्षेति। स रामः 'वः' युष्मान् 'पातु' रक्षतु। किंलक्षणः? 'शिशुः' बालः। शिशोर्बालस्य महतां रक्षणं कथं युज्यत इत्यभिधे[? यमि]त्याह—किंलक्षणः? 'अधिकमहाः' अधिकं–लोकोत्तरं महः–तेजः ओजो बलं यस्य स अधिकमहाः, तेजस्विनः पुरुषस्य अन्यरक्षणं घटत इति भावः। रामोऽधिकमहाश्चेत् किमधिकं लोकोत्तरं कर्म कृतवान्? तत्राह, उत्प्रेक्षते–संस्काराधारधारां 'दधदिव' कुर्वन्निव, अत्र [धा]धातुः करोत्यर्थः। किंलक्षणाम्? 'आचार्यवर्यप्रयुक्तां' आचार्यवर्येण–कर्म(? र्मा)भिज्ञेन प्रयुक्तां–उपदिष्टाम्। कः कस्मिन्? 'रक्षःसन्तानकक्ष०' रक्षसां सन्तानं रक्षःसन्तानं–राक्षसकुलं समूहो वा तदे[व] कक्षं–तृणं तत्र यो ज्वलनकणः–वह्निकणः अल्पत्वात् कण इव कणः तस्मिन्। यथा कश्चन बाल आचार्यवर्यप्रयुक्तां अग्निसंस्काराधारधारां निर्वहति तथाऽयं रामः शिशुः सन्नेव राज्ञः सलक्षणतृणेषु अनलशस्त्राधारधारेण एधाश्चक्रे इत्यर्थः, प्रवृद्धमकरोदिति भावः, राक्षसानवधीदिति व्यङ्ग्यम्। अर्थी उ[प]मा च छेकानुप्रासश्च। तथा च—

तुल्यश्रुत्यक्षरावृत्तिरनुप्रासः स्फुरद्गुणः।
अतत्पदः स्याच्छेकानां लाटानां तत्पदश्च सः ॥ १ ॥ [वाग्भटा० परि० ४.१७.]

---

१ पश्चाद् यं के भा ३-४ ॥

स पुराणपुरुषः मनुष्ययोनौ जन्म आप, "न हि देवा मनुष्यशरीरेषु सम्भवन्ति" इत्यागमः, तत्राह—प्रथमं 'कौशल्यावल्लभेन' दशरथेन 'अजतनूजत्वभाजा बभूवे' अजनि, अजस्य—ब्रह्मणः तनूजः—कश्यपः तस्य भावः—तत्त्वं भजतीति भाक् तेन अजतनूजत्वभाजा बभूवे। भावोऽलङ्कारः। पश्चात् तेन दशरथेन 'केशवांशं' केशवस्य—विष्णोः अंशः तम्। 'यं' रामं 'जनयता' उत्पादयता सता ['जगति' भूर्लोके] 'अजस्य' विष्णोः 'तातेन' जनकेन पित्रा जातम्, दशरथो यं रामं जनयन् सन् अजस्य पिता जात इत्यर्थः। दशरथः कश्यपावतारः तत्र रामोत्पत्तिः सम्भवति। अत्र विरोधः—यो तनूजः स कथं अजस्य पिता भवति?, परिहारः—रघुपुत्रस्याजस्य पुत्रो दशरथः अतः अजतनूजत्वभाक् तेन, अथ केशवांशजनकत्वेन जनकः। विरोधः विरोधाभासोऽलङ्कारश्च अलङ्कारसङ्करो द्रष्टव्यः ॥ ३ ॥

[बालबोधिनी]

रक्षःसन्तानेति। सः 'शिशुः' रामः 'वः' युष्मान् 'पातु' रक्षतु। किंलक्षणः? उत्प्रेक्ष्यते—'रक्षःसन्तानकक्षज्वलनकण इव' रक्षसां सन्तानं रक्षःसन्तानम्, रक्षःसन्तानं कक्ष इव रक्षःसन्तानकक्षः, ज्वलनस्य—अग्नेः कणः—लेशः ज्वलनकणः, रक्षःसन्तानकक्षस्य दाहे ज्वलनकणः रक्षःसन्तानकक्षज्वलनकणः। पुनः किंलक्षणः? संस्काराधारधारां 'दधत्' स्वीकुर्वन् सन् अधिकमहाः। संस्कार आधार इव संस्काराधारः, तस्य धारा ताम्। अधिकं महः—तेजो यस्यासौ अधिकमहाः। ज्वलनकणोऽपि आधारधारां दधद् अधिकमहाः जायते। किंलक्षणां धाराम्? 'आचार्यवर्यप्रयुक्तां' आचार्याणां वर्येण—श्रेष्ठेन वसिष्ठेन प्रयुक्ताम्। स कः? 'कौशल्यावल्लभेन' दशरथेन 'प्रथमं' पूर्वं 'अजतनूजत्वभाजा बभूवे' अजनाम्नो राज्ञः पुत्रत्वभाजा अभावि। 'पश्चाद्' उत्तरे वयसि यं 'केशवांशं' रामं 'जगति' भूर्लोके 'जनयता' उत्पादयता सता दशरथेन 'अजस्य' केशवस्य 'तातेन' पित्रा जातम्। केशवस्यांशः केशवांशः तम् ॥ ३ ॥

*

अव्यक्तं व्यक्तकर्त्ता वचनमभिदधे बालभावाज्जनन्या—
स्तर्जन्यालम्बनार्थी[1] प्रचलितुमभवद् दत्तविश्वावलम्बः।
मन्दं मन्दं पदानि न्यधित भुवि पदैः क्रान्तलोकत्रयो यः,
स त्रैलोक्याधिपत्यं दिशतु दशरथापत्यमत्यद्भुतं वः ॥ ४ ॥

[हृदयरञ्जनी]

अव्यक्तमिति। 'सः' रामो 'वः' युष्माकं 'त्रैलोक्याधिपत्यं' त्रैलोक्यस्य—त्रिभुवनस्य आधिपत्यं—ऐश्वर्यं 'दिशतु' ददातु। किंलक्षणः सः? 'दशरथापत्यं' दशरथस्य

---

१ °नार्थं भा १।

अपत्यं–दशरथसूनुः। किम्भूतमपत्यम्? 'अत्यद्भुतं' लात्तर(? आश्चर्य)भरितम्। तदेतद् विशेषणत्रयेण प्रतिपादयति–किम्भूतः रामः? 'व्यक्तकर्त्ता' व्यक्तानां–पञ्चमहाभूतानां कर्त्ता–निर्माता स्रष्टा, "आत्मन [आकाशम्], आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी" इति **श्रुतेः,** रामस्याऽऽत्मरूपत्वात् स्रष्टृत्वं युज्यते। एवंविधो रामः अव्यक्तं [वचनं] अभिदधे। 'अव्यक्तं' अस्पष्टं वचनं ब्रूत इति विरोधालङ्कारः, कथम्? यो व्यक्तानां प्रकृति-प्रत्ययविभागेन वचनानां कर्त्ता उपदेष्टा विद्वान् स कथं अस्पष्टमप्रकटं ब्रूते?। आश्चर्यान्तरमाह–किम्भूतः? 'दत्तविश्वावलम्बः' विश्वस्य अवलम्बः विश्वावलम्बः, दत्तः विश्वावलम्बः–विश्वाधारः येन स दत्तविश्वावलम्बः। यः समस्तविश्वाधारस्तम्भः सन् बालभावाद् मातुस्तर्जन्याम्बनार्थी अभवत्। किं कर्तुम्? 'प्रचलितुं' गन्तुं गमनार्थम्। यः सकलस्य दत्ताधारः स कथं अन्याधारमपेक्षते? इति विरोधः। अपरमाश्चर्यमाह—पुनः किंलक्षणः? पदैः क्रान्तः लोकत्रयः–क्रान्तं त्रिभुवनं येन स क्रान्तलोकत्रयः। एवम्भूतोऽपि 'यः' रामः बाल्यभावात् 'पृथिव्यां' भुवि 'मन्दं मन्दं' अतिशयेन यथा स्यात् तथा पदानि 'न्यधित' निदधे, मन्दं मन्दं चचालेति चित्रम्। एकेन चरणन्यासेन यां भुवं क्रान्तवान् तस्यां भुवि बहूनि पदानि दत्तवान् इति विरोधः। अद्भुतो रसः, विस्मयोऽत्र व्यभिचारी भावः, विरोधालङ्कारः, छेकानुप्रासः॥ ४॥

[बालबोधिनी]

अव्यक्तमिति। 'स दशरथापत्यं' रामः 'वः'[1]युष्माकं त्रैलोक्याधिपत्यं 'दिशतु' **दद्यात्।** त्रयो लोका एव त्रैलोक्यम्, अधिपतेर्भावः आधिपत्यम्, त्रैलोक्यस्य आधिपत्यं त्रैलोक्याधिपत्यम्। किंलक्षणं दशरथापत्यम्? 'अत्यद्भुतं' अत्याश्चर्यकारि। स कः? 'यः' रामः 'बालभावात्' शिशुत्वाद् 'अव्यक्तं' अस्पष्टं वचनं 'अभिदधे' अवदत्। किंलक्षणः? 'व्यक्तकर्त्ता' जगतः स्पष्टकर्त्ता। पुनः स कः? यो रामः बालभावाद् प्रचलितुं 'जनन्याः' कौशल्यायाः 'तर्जन्यालम्बनार्थी अभवत्' तर्जन्याः–प्रथमाङ्गुल्याः आलम्बनं अर्थयति–वाञ्छतीति तर्जन्यालम्बनार्थी। किंलक्षणः? 'दत्तविश्वावलम्बः' दत्तः विश्वस्मै अवलम्बः–आधारो धारणरूपो येनासौ दत्तविश्वावलम्बः। पुनः स कः? यो रामः 'भुवि' पृथिव्यां बालभावाद् 'मन्दं मन्दं' शनैः शनैः पदानि 'न्यधित' न्यस्तवान्। किंलक्षणः? 'पदैः' चरणैः 'क्रान्तलोकत्रयः' लोकानां त्रयं लोकत्रयम्, क्रान्तं लोकत्रयं येनासौ क्रान्तलोकत्रय इति॥ ४॥

*

रङ्गेणोत्सङ्गयन्ती तपनमिव शनैरुज्जिहानप्रतापा-
ऽऽध्मातं माता यमैन्द्री हरिदिव परितः सम्प्रकाशा चकाशे।

---

1 युष्मभ्यं त्रैलोक्याधिपत्यं 'दिशतु' ददातु पु०।

जातस्तातश्च बिभ्रच्चिरविरततमाः पूर्वशैलोपमेयः,
[1]श्रेयः शौरिः स दिश्यादलघुरघुकुले शैशवं निर्विशन् वः ॥ ५ ॥

[हृदयरञ्जनी]

रङ्गेणेति। 'स शौरिः' रामनामा शौरिः–विष्णुः 'वः' युष्माकं 'श्रेयः' कल्याणं 'दिश्यात्' दद्यात्, प्रार्थनायां लिङ्। किं कुर्वन्? 'अलघुरघुकुले' अलघु–विस्तीर्णं यद् रघुकुलं तत्र 'शैशवं निर्विशन्' शिशुत्वं–बालभावं निर्विशन्–अनुभवन् निर्गमयन् वा। स इति कः? 'माता' कौशल्या सप्रकाशा जाता सती 'चकाशे' शुशुभे रेजे। किं कुर्वाणा? 'रङ्गेण' प्रीत्या हर्षेण 'यं' रामं 'उत्सङ्गयन्ती' उत्सङ्ग–अङ्कं प्रापयन्ती अङ्कमारोपयन्ती। किंलक्षणं यम्? 'शनैः' दिने दिने, 'उज्जिहानप्रतापाध्मातं' उज्जिहानश्चासौ प्रताप[2]..............

[बालबोधिनी]

रङ्गेणेति। 'स शौरिः' रामः 'वः' युष्माकं 'श्रेयः' कल्याणं 'दिश्यात्' करोतु। किं कुर्वन्? अलघुरघुकुले 'शैशवं' [3]बालभावं 'निर्विशन्' अनुभवन्। न लघु अलघु, अलघु च तद् रघुकुलं च अलघुरघुकुलम्, रघोः कुलं रघुकुलं तस्मिन्। स कः? 'माता' कौशल्या 'यं' रामं 'रङ्गेण' वात्सल्येन कृत्वा 'उत्सङ्गयन्ती' अङ्के कुर्वन्ती 'परितः' सर्वतः 'सप्रकाशा' सानन्दा सती 'चकासे' रराज। कं केव? 'ऐन्द्री हरित् तपनमिव' यथा 'ऐन्द्री हरित्' पूर्वा दिक् 'तपनं' सूर्यं रङ्गेणोत्सङ्गयन्ती सती परितः सप्रकाशा सती काशते राजते। किं लक्षणं रामं तपनं च? 'शनैः' मन्दं 'उज्जिहानप्रतापाध्मातं' उज्जिहानः–वर्द्धमानो योऽयं प्रतापः तेनाऽऽध्मातं–[4]शोभमानम्। स कः? 'च' अन्यत् 'तातः' दशरथः 'यं' रामं 'बिभ्रद्' दधत् सन् 'चिरविरततमा जातः' चिरं–चिरकालीनं विरतं–गतं तमः–पापं पितृऋणलक्षणं यस्यासौ चिरविरततमाः। किंलक्षणः तातः? 'पूर्वशैलोपमेयः' पूर्वश्चासौ शैलश्च पूर्वशैलः–उदयाचलः तेनोपमेयः सदृश इत्यर्थः। उदयाचलोऽपि तपनं बिभ्रत् चिरविरततमा जायते तदा तमः–अन्धकारमिति ॥ ५ ॥

*

पुण्यानां प्राक्तनानां फलमिति जनकेनान्तरात्मेति मात्रा,
साक्षादक्षीयमाणः प्रणयनिधिरिति भ्रातृभिश्च त्रिभिर्यः।
नीतिर्मूर्त्तेत्यमात्यैः परपुरुष इति ज्ञानिभिर्ज्ञायमानः,
प्राप प्रौढिं क्रमेण [5]द्रढयतु निरघां राघवः स श्रियं वः ॥ ६ ॥

---

१ स्थेयः श्रेयः स दिश्या° भा २-३-४। २ अत्रान्तरे हृदयरञ्जनीटीकायाः पञ्चम-षष्ठे पत्रे त्रुटिते स्तः। ३ बालत्वं 'नि° पु०। ४ शोभायमानं पु०। ५ प्रथयतु भा २।

[बालबोधिनी]

पुण्यानामिति। 'स राघवः' रामः 'वः' युष्माकं 'निरघां' निष्पापां 'श्रियं' लक्ष्मीं 'द्रढयतु' दृढां करोतु–समर्थां करोतु। रघोरपत्यं राघवः। निर्गतं अघं यस्याः सा निरघा ताम्। स कः? यो रामः 'क्रमेण' अनुक्रमेण 'प्रौढिं' यौवनं 'प्राप' ययौ। किंलक्षणो रामः? 'जनकेन' पित्रा 'प्राक्तनानां' पूर्वजन्मकृतानां 'पुण्यानां' सुकृतानां इदं फलमिति ज्ञायमानः। पुनः किंलक्षणः? अतिवात्सल्याद् अन्तरात्मा इति 'मात्रा' कौशल्यया ज्ञायमानः। 'च' अन्यत् साक्षाद् 'अक्षीयमाणः' अक्षयः 'प्रणयनिधिः' प्रीतिकोश इति 'त्रिभिर्भ्रातृभिः' भरत-लक्ष्मण-शत्रुघ्नैर्ज्ञायमानः। 'च' अन्यद् 'मूर्त्ता नीतिः' मूर्त्तिमती 'नीतिः' नय इति 'अमात्यैः' सेवकैः ज्ञायमानः। पुनः किंलक्षणः? 'ज्ञानिभिः' विद्वद्भिः अयं 'परपुरुषः' साक्षात्कारब्रह्म इति ज्ञायमानः। परश्चासौ पुरुषश्च परपुरुषः ॥ ६॥

*

तारुण्यारम्भरम्यामनुभवति शनैरेधमानामवस्थां,
काकुत्स्थे यत्र मैत्रावरुणिनिगदिता[1]नागमानाददाने।
तातत्वेनातिरिक्तं दशरथमविदुस्तुल्यवात्सल्यवन्तः,
सन्तः सन्तत्युपेतद्रविणवितरणोपक्रियां स क्रियाद् वः ॥ ७॥

[बालबोधिनी]

तारुण्यारम्भेति। 'सः' रामः 'वः' युष्माकं सन्तत्युपेतद्रविणवितरणोपक्रियां 'क्रियात्' करोतु। सन्तत्या–प्रजया उपेतं युक्तं–सन्तत्युपेतम्, सन्तत्युपेतं च तद् द्रविणं–द्रव्यं च सन्तत्युपेतद्रविणम्, तस्य वितरणं–दानं तस्य उपक्रिया–समीपवर्त्ति कार्यं सन्तत्युपेतद्रविण-वितरणोपक्रिया ताम्। स कः? 'यत्र' यस्मिन् 'काकुत्स्थे' रामे 'शनैः' मन्दं मन्दं तारुण्यारम्भरम्यां 'एधमानां' वर्द्धमानां अवस्थां अनुभवति सति 'सन्तः' बुधाः 'तातत्वेन' जगद्गुरोः पितृतया दशरथं 'अतिरिक्तं' अधिकगुणं अविदुः। तरुणस्य भावः तारुण्यम्, तस्य आरम्भः तारुण्यारम्भः, तेन रम्या–मनोहरा तारुण्यारम्भरम्या ताम्। किंलक्षणाः सन्तः? 'तुल्यवात्सल्यवन्तः' तुल्यं–समानं वात्सल्यवत्त्वं–वल्लभत्वं येषां ते तुल्यवात्सल्यवन्तः। पुनः क सति 'यत्र' रामे 'मैत्रावरुणिनिगदितान्' वशिष्ठेनाध्यापितान् 'आगमान्' वेदान् आद-दाने सति ॥ ७॥

*

अंशाश्चातुर्भुजा ये श्रुतिषु चतसृषु ज्ञानवन्तश्चतुर्द्धा
भिन्नैरस्त्रैर्विधेयां व्यधिषत चतुरम्भोधिरुद्धां[2] धरित्रीम्।

---

१ °तान्यागमान्याद° भा २॥ २ °रुद्धां च धात्रीम् भा १॥

योऽभूज्ज्येष्ठस्तथा तेष्वनुजनिषु यथा पूरुषार्थेषु धर्मः
पुष्याद् वः शर्म घर्मद्युतिकुलतिलकः पालकः स त्रिलोक्याः ॥८॥

[बालबोधिनी]

अंशाश्चेति। 'सः' रामः 'वः' युष्माकं '[१]शर्म' सुखं 'पुष्याद्' वर्द्धयतु। किंलक्षणः? 'घर्मद्युतिकुलतिलकः' घर्माः–तीक्ष्णा द्युतयः–किरणानि यस्यासौ घर्मद्युतिः–सूर्यः, तस्य कुलं घर्मद्युतिकुलम्, तस्मिन् तिलकः–श्रेष्ठः घर्मद्युतिकुलतिलकः। पुनः किंलक्षणः? त्रिलोक्याः 'पालकः' रक्षकः त्रयाणां लोकानां समाहारः त्रिलोकी तस्याः त्रिलोक्याः, "द्विगोः" [पाणिनि० ४-१-२१] इति ङीप्। स कः? 'यः' श्रीरामः 'तथा' तेन प्रकारेण 'अनुजनिषु' त्रिषु भ्रातृषु भरत-लक्ष्मण-शत्रुघ्नेषु ज्येष्ठः अभूत्। अनु–पश्चाद् जनिः–जन्म येषां ते अनुजनयः तेषु अनुजनिषु। तथा कथम्? यथा पूरुषार्थेषु धर्मो ज्येष्ठोऽभूत्। पूरुषाणां अर्थाः–धर्मा-ऽर्थ-काम-मोक्षाः तेषु पूरुषार्थेषु। ते के? ये 'चातुर्भुजा' चतुर्भुजस्य–विष्णोः अंशाः। 'चतसृषु श्रुतिषु' चतुर्षु वेदेषु ज्ञानवन्तः सन्तः चतुरम्भोधिरुद्धां 'धरित्रीं' पृथिवीं 'चतुर्द्धा भिन्नैः' चक्र-गदा-शार्ङ्ग-खड्गरूपैः 'अस्त्रैः' आयुधैः कृत्वा 'विधेयां' स्ववशां 'व्यधिषत' चक्रुः। चतुर्भुजस्येमे चातुर्भुजाः। ज्ञानं विद्यते येषां ते 'ज्ञानवन्तः' विद्वांसः। अम्भांसि धीयन्ते एषां ते अम्भोधयः, चत्वारश्च ते अम्भोधयश्च चतुरम्भोधय, तैः अधिसर्वतो रुद्धा चतुरम्भोधिरुद्धा ताम् ॥ ८ ॥

*

नित्यं तेभ्यो गुणेभ्यः प्रणमत यतते [२]यद्वतः को न लब्धुं?,
सूनुर्गाधेरगाधे तरसि तपसि च व्यक्तशक्तिस्तथाहि।
आगत्यागारमाराद् दशरथनृपतिं यं प्रवीरं ययाचे,
याच्ञादैन्येन शून्यं जनयतु स धनं वैनतेयध्वजो वः ॥ ९ ॥

[हृदयरञ्जनी]

........व्यक्ता–प्रकटा द्वितीयसृष्टिनिर्माणलक्षणा शक्तिः–सामर्थ्यं येन यस्य वा। 'ननु यदि एवंविधशक्तिमान् विश्वामित्रः स्वतपःसामर्थ्याद् यागं रक्षतु, किं दशरथप्रार्थनया?' इति यैः आशङ्क्यते तान् प्रति उत्तरमाह 'तथाही'त्यादिना—हे लोकाः! यूयं 'नित्यं' सर्वदा 'तेभ्यः' प्रसिद्धेभ्यो गुणेभ्यः 'प्रणमत' प्रह्वीभवत। ततः किमायातम्? इत्याह–'यद्वतः' इति ये विद्यन्ते येषां यद्वन्तः, तान् यद्वतः–यद्गुणयुक्तान् पुरुषान् लब्धुं को न प्रयतते? सर्वोऽपि प्रयतत इति अर्थान्तरन्यासः। यथा—

१ 'शर्म' बलं 'पु० पु०॥ २ यद्वतः कोऽनुसर्तुं? भा १। यद्वतं को न लब्धुं! भा ३-४। एतत्पाठानुसारेण बालबोधिनी वर्त्तते॥

उक्तिसिद्ध्यर्थमन्यार्थन्यासो व्याप्तिपुरःसरः।
कथ्यतेऽर्थान्तरन्यासः श्लिष्टोऽश्लिष्टश्च स द्विधा ॥ १ ॥

[ ] इति।

एतदुक्तं भवति—असौ मुनिर्यागसंरक्षणव्याजेन रामरूपेण वर्त्तमानं विष्णुं प्राप्तुमभिललाषेति भावः ॥ ९ ॥

[बालबोधिनी]

नित्यं तेभ्यो इति। 'सः' श्रीरामः 'वः' युष्माकं याच्ञादैन्येन 'शून्यं' रहितं 'धनं' द्रव्यं 'जनयतु' उत्पादयतु। याच्ञया—प्रार्थनया दैन्यं—दीनत्वं याच्ञादैन्यं तेन। किंलक्षणः? 'वैनतेयध्वजः' विनतायाः अपत्यं वैनतेयः—गरुडः स ध्वजायां यस्यासौ वैनतेयध्वजः। स कः? 'गाधेः सूनुः' विश्वामित्रः 'अगारं' गृहं 'आरात्' समीपे दूराद्वा आगत्य यं 'प्रवीरं' प्रकर्षेण बलवन्तं दशरथनृपतिं ययाचे। नृणां पतिः नृपतिः, दशरथश्चासौ नृपतिश्च दशरथनृपतिः, तं दशरथनृपतिम्। किंलक्षणो गाधेः सूनुः? 'अगाधे' महति 'तरसि' शौर्ये अगाधे तपसि च 'व्यक्तशक्तिः' स्पष्टशक्तिः। स कः? 'तथाहीति' दृष्टान्ते। हे जनाः! तेभ्यो गुणेभ्यः 'नित्यं' प्रत्यहं 'प्रणमत' नमस्कुरुत। तेभ्यः केभ्यः? 'यद्व्रतं' यस्य—रामस्य गुणान् 'लब्धुं' प्राप्तुं को जनो न यतते? अपि तु सर्वे यतन्त एव ॥ ९ ॥

*

गाधेये राजसौधं प्रविशति मुदितं दुःखितं याचमाने,
यागत्राणाय पुत्रं तदनधिगमतः क्रुध्यमाने च भीतम्।
[1]तद्दानान्मोदमाने स्थितमुपरि तदा विष्टपानां त्रयाणां,
यस्योदारेण पित्रा स भवतु भवतां भद्रकृद् रामभद्रः ॥ १० ॥

[हृदयरञ्जनी]

गाधेय इति। सः 'रामभद्रः' रघुनाथः 'वः' युष्माकं भवतां 'भद्रकृत्' कल्याणकृत् शुभप्रदो भवतु। शुभप्रदत्वाद् रामभद्र इति पदमन्वर्थम्, रामयतीति रामः, भद्रं—कल्याणं यस्माज्जनानामिति रामभद्रः। कोऽसौ? इत्याह—'यस्य' रामस्य 'पित्रा' जनकेन दशरथेन ['मुदितं'] सुहृष्टमुदितेनाऽजनि। क्व सति? गाधेरपत्यं गाधेयः—विश्वामित्रः तस्मिन् 'राजसौधं' राजगृहं राजसभां प्रविशति सति, 'विश्वामित्रो मद्गृहं प्राप्तः' इति हर्षाकुलेन जातमित्यर्थः। अथ च 'दुःखितं च' पीडितं दुःखितेनाप्यभावि। क्व सति? यागत्राणाय तस्मिन् विश्वामित्रे पुत्रं याचमाने सति, 'बालोऽयं रामः, यागविघ्नकारिणो

---

१ यद्दाना° भा ३–४। एतत्पाठानुसारेणैव बालबोधिन्यां व्याख्या दृश्यते॥

राक्षसाः, तत्र तान् हत्वा स्वयं कुशली सन् कथमेष्यति ?' इति चिन्तया दुःखितोऽभूदित्यर्थः। विषाद-हर्षयोर्भावयोरत्र सन्धिः। किञ्च—तेन दशरथेन भीतं च त्रस्तं च। भये कारणमाह—क्व सति ? तस्मिन् गाधेये 'क्रुध्यमाने सति' आविर्भूतकोपे सति। कस्मात् ? 'तदनधिगमतः' तस्य—रामस्याप्राप्तेः, 'रामं न प्रेषयामीति, अमुं बालकं विहाय जीवितं क्षणमपि धारयितुं न शक्नोमि' इत्युक्ते मुनौ क्रुद्धे सति ['भीतं'] विभायेति वाक्यार्थः। अपरं तेन पित्रा उपरि स्थितम्। केषाम् ? त्रयाणां 'विष्टपानां' भुवनानां त्रयाणामपि लोकानाम्, 'लोकत्रयवासिभ्यो लोकेभ्योऽहमुत्कृष्टः' इत्यात्मानं मन्यते स्म। तत्र हेतुः— 'गाधेये' विश्वामित्रे 'तद्दानात्' तस्य समर्पणाद् 'मोदमाने' हृष्यमाणे सति, 'दत्तेन रामेण हेच्छतत्यो (?) जातः' इति मुनौ भाषमाणे सतीति भावः। त्रास-सादयोर्भावयोः सन्धिः। विरुद्धरसानामत्र सङ्करः ॥ १० ॥

[बालबोधिनी]

गाधेय इति। स रामभद्रः 'भवतां' युष्माकं 'भद्रकृत्' कल्याणकर्त्ता भवतु। स कः ? यस्य 'उदारेण' दात्रा 'पित्रा' दशरथेन 'गाधेये' विश्वामित्रे 'राजसौधं' भूपतिमन्दिरं प्रविशति सति 'मुदितं' हृष्टम्। पुनः स कः ? यस्योदारेण पित्रा गाधेये 'यागत्राणाय' यागरक्षणाय 'पुत्रं' रामं 'याचमाने' प्रार्थयमाने सति 'दुःखितं' दुःखयुक्तेन जातम्। पुनः स कः ? 'च' अन्यद् यस्य पित्रा 'तदनधिगमतः' तस्य—रामस्य अप्राप्तेः गाधेये 'क्रुध्यमाने सति' क्रोधं प्राप्नुवति सति 'भीतं' भयं प्राप्तम्। पुनः स कः ? यस्योदारेण पित्रा 'यद्दानाद्' यस्य—रामस्य दानाद् गाधेये 'मोदमाने' हर्षं प्राप्नुवति सति 'तदा' तस्मिन् अवसरे त्रयाणां 'विष्टपानां'—लोकानां उपरि स्थितम् ॥ १० ॥

*

इष्टिं निर्वृत्तवृष्टिर्यतिरकृत यदुत्पत्तये पावनांस्तान्,
संस्कारान् यत्र मन्त्रैः निगमनिगदितैरन्वतिष्ठद् वसिष्ठः।
विश्वामित्रः सुमित्रासुतयुतमशिषत् यं च विद्यामशेषां,
देवः पिष्याद्[1] द्विषां वः स किल मुनिजनानु[2]ग्रहेणोग्रहेतिः ॥११॥

[हृदयरञ्जनी]

इष्टिमिति। 'सः' रामाख्यो देवः 'वः' युष्माकं 'द्विषां' शत्रूणां 'पिष्यात्' "पिष पिष्टौ" आशीर्लिङ्, "जासिनिप्रहणनाटक्राथपिषां हिंसायाम्" [पाणि० २.३.५६]

---

१ °द् द्विषो वः सकल° भा ३-४। एतत्पाठानुसारेण बालबोधिन्यां व्याख्याऽस्ति ॥
२ °नुग्रहायोग्र° भा १ ॥

इति कर्मणि षष्ठी । 'किल' इति प्रसिद्धौ । किंलक्षणः सः ? 'मुनिजनानुग्रहेण उग्रहेतिः' मुनिजनानां—ऋष्यशृङ्ग-वसिष्ठ-विश्वामित्रमुखानां अनुग्रहेण उपदेशेन वा 'उग्रहेतिः' उग्राः—दुःसहाः राक्षसहननक्षमाः हेतयः—अस्त्राणि यस्य सः । 'शुद्धमुक्तस्वभावस्य परमेश्वरस्य रामस्य सर्वत्र समत्वादस्त्रधारणमयुक्तम्' इत्यत आह—'मुनिजनानुग्रहेणोग्रहेतिः' मुनिजनेषु अनुग्रहस्तेन उग्रहेतिः, अनुग्रहबुद्ध्या धृतशस्त्र इत्यर्थः ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ! ।
तदा तदाऽवतीर्याहं करिष्ये धर्मरक्षणम् ॥
[ ]

इति प्रतिज्ञा, तदर्थावतारत्वात् परमेश्वरस्य, अतो युज्यते शस्त्रधारणम् । मुनीनामनुग्रहं प्रतिपादयति—'यतिः' ऋष्यशृङ्गो मुनिः ['यदुत्पत्तये'] यस्य—रामस्य उत्पत्तये—जन्मने 'इष्टिं' पुत्रकामेष्टिं 'अकृत' विदधे । किंलक्षणो यतिः ? 'निर्वृत्तवृष्टिः' "द्वादशवार्षिक्यामनावृष्टौ सत्यां कारीरीयागेन वृष्टिं प्रवर्त्तयामास" इत्यागमः । वसिष्ठः कुलगुरुः 'यत्र' यस्मिन् रामे पावनान् 'संस्कारान्' जातकर्मादीन् 'अन्वतिष्ठत्' कृतवान् । कैः ? 'निगमनिगदितैः' वेदोक्तैर्मन्त्रैः । किञ्च—विश्वामित्रः 'सुमित्रासुतयुतं' लक्ष्मणसहितं 'यं' रामं अशेषां विद्यां धनुर्वि[? द्या]द्यां 'अशिषत्' पाठयामास । अत एव मुनिजनानुग्रह इति उग्रहेतिः शत्रुहननं चास्य युक्तमित्यर्थः ॥ ११ ॥

[बालबोधिनी]

इष्टिमिति । सः 'देवः' रामः 'वः' युष्माकं 'द्विषः' शत्रून् 'पिष्यात्' चूर्णीकरोतु । किंलक्षणः ? 'सकलमुनिजनानुग्रहेणोग्रहेतिः' मुनीनां जनः मुनिजनः, सकलश्चासौ मुनिजनश्च सकलमुनिजनः, तस्य अनुग्रहः सकलमुनिजनानुग्रहः, तेन सकलमुनिजनानुग्रहेण उग्राः—तीक्ष्णाः हेतयः—आयुधानि यस्यासौ [1]उग्रहेतिः । कथं सकलमुनिजनानुग्रहः ? तं प्रदर्शयन्नाह—'यदुत्पत्तये' यस्य—रामस्य उत्पत्तये—जन्मने 'यतिः' ऋष्यशृङ्गः इष्टिं 'अकृत' कृतवान् । किंलक्षणो यतिः ? 'निर्वृत्तवृष्टिः' निर्वृत्ता—निष्पादिता वृष्टिर्येनासौ निर्वृत्तवृष्टिः, 'पूर्वं हि तेन अनावृष्टिर्नाशिता' इति **पुराणे** प्रसिद्धम् । 'च' अन्यद् 'यत्र' यस्मिन् रामे वसिष्ठः तान् पावनान् जातकर्मादीन् संस्कारान् निगमनिगदितैः कृत्वा 'अन्वतिष्ठद्' अनुतस्थौ चकार । निगमेषु—वेदेषु निगदिताः—अधीताः निगमनिगदिताः, तैः निगमनिगदितैः, 'च' अपरं विश्वामित्रः 'सुमित्रासुतयुतं' लक्ष्मणयुक्तं यं रामं 'अशेषां' निःशेषां विद्यां 'अशिषत्' शिक्षयामास ॥ ११ ॥

*

१ उग्रहेतिः । स कः ? 'यदुत्पत्तये' पु० ॥

कालीमालीमिवालीं नरगलनलिकाकल्पितानल्पहारां,
व्याहारैर्भीषयन्तीमखिलमपि जगत् ताडकां ताडयित्वा ।
यत्र व्रीडाजडत्वं विदधति निदधे गाधिसूनुः प्रसन्नः,
सम्भारं जम्भकानां स भवपरिभवात् पातु वः पद्मनाभः ॥ १२॥

[हृदयरञ्जनी]

कालीमालीमिवालीमिति । 'सः' रामाभिधानः 'पद्मनाभः' हरिः 'वः' युष्मान् 'भवपरिभवात्' त्रिविधाद् आधिभौतिकादिपरिभवात् संसारदुःखात् 'पातु' रक्षतु । स कः ? 'यत्र' यस्मिन् रामे गाधिसूनुः 'प्रसन्नः' हृष्टः सन् 'जम्भकानां' अस्त्राणां 'सम्भारं' समूहं सामग्रीं वा 'निदधे' निक्षिप्तवान्, शस्त्रविद्यां रामाय उपदिदेशेत्यर्थः । किम्भूते रामे ? 'व्रीडाजडत्वं' लज्जया नम्रतां प्रह्वीभावं भजति । किं कृत्वा ? ताडकां राक्षसीं 'ताडयित्वा' हत्वा । किम्भूताम् ? 'कालीं' कृष्णाम्, कामिव ? 'आलीमालीमिव' अलीनां समूहः आलः तत्सम्बन्धिनीं आलीम्, स्त्रियां "टिड्ढाण-" [पाणि० ४.१.१५] इति ङीप्, 'आलीं' भ्रामरीं 'आलीमिव' पङ्क्तिमिव, तामिव 'कालीं' कृष्णां । पुनः किम्भूताम् ? 'नरगलनलिकाकल्पितानल्पहारां' नराणां—मनुष्याणां गलनलिका—कण्ठमाला तया कल्पितः—रचितो अनल्पः—महान् हारो यस्याः सा ताम् । पुनः किम्भूताम् ? 'व्याहारैः' वीनां—पक्षिणां आहारैः—अदनैः 'भीषयन्तीं' भयं जनयन्तीम् । पक्षीत्युपलक्षणमात्रं वा, 'व्याहारैः' अटव्यां भ्रमणैः भीषयन्तीं 'अखिलं जगत्' प्राणिमात्रमित्यर्थः । छेकानुप्रासः ॥ १२ ॥

[बालबोधिनी]

कालीमालीति । सः 'पद्मनाभः' रामः 'वः' युष्मान् भवपरिभवात् 'पातु' रक्षतु । पद्मं नाभौ यस्यासौ पद्मनाभः । भवस्य—संसारस्य परिभवः—पराभवः भवपरिभवः तस्माद् भवपरिभवात् । स कः ? 'यत्र' यस्मिन् रामे 'ताडकां' राक्षसीं 'ताडयित्वा' मारयित्वा 'व्रीडाजडत्वं' 'मया स्त्री हता' इति लज्जाजाड्यं 'विदधति' बिभ्रति सति 'गाधिसूनुः' विश्वामित्रः 'ईदृशीमपि हत्वा लज्जां बिभर्ति' इति प्रसन्नः सन् 'जम्भकानां' असुराणां सम्भारं नैर्ऋतघ्नं अस्त्रं 'निदधे' आरोपितवान् । किंलक्षणां ताडकाम् ? उत्प्रेक्ष्यते—'आलीं' भ्रमरसम्बन्धिनीं 'कालीं' कृष्णां 'आलीं' श्रेणिमिव, अतिशयेन कृष्णामित्यर्थः । पुनः किंलक्षणाम् ? 'नरगलनलिकाकल्पितानल्पहारां' नराणां—पुरुषाणां गलानि—ग्रीवाः नरगलानि, तेषां नलिकाः—अस्थिविशेषाः नरगलनलिकाः, ताभिः कल्पिताः—कृताः अनल्पाः—बहवो हारा यया सा नरगलनलिकाकल्पितानल्पहारा ताम् । पुनः किंलक्षणाम् ? 'व्याहारैः' शब्दैः कृत्वा 'अखिलं'

समग्रमपि जगद् भीषयन्तीम्, "तत् करोति तदाचष्टे" [पाणिनिवार्तिक पत्र ४२६] इति णिच् "भियो हेतुभये षुक्" [पाणिनि० ७-३-४०]इति षुक्, तेन भापयन्तीत्यपपाठः ॥ १२ ॥

*

यः सत्रे तत्र गच्छन्नपि परिकलितः सद्भिरन्तःपुरस्थ-
श्चक्रे यः कौशिकस्य द्विषदुपशमनं काकपक्षाश्रितोऽपि ।
सौमित्रौ सन्निधानं सततमपि भजत्यद्वितीयश्च योऽभूद्,
गो-भूमि-द्रव्यभव्यं वितरतु भवतामाधिपत्यं स नित्यम् ॥ १३ ॥

[हृदयरञ्जनी]

यः सत्र इति । 'सः' रामो भवतामाधिपत्यं 'नित्यं' सर्वदा 'प्रयच्छतु' ददातु । किंलक्षणम्? 'गोभूमिद्रव्यभव्यं' गावश्च भूमिश्च द्रव्यं च तैः भव्यं-साधु रमणीयम्, एषां स्वामित्वं प्रयच्छत्विति । स कः? 'यः' रामः 'तत्र सत्रे' तस्मिन् यागे 'गच्छन् सन्' व्रजन् सन्नपि सद्भिरन्तःपुरस्थ एव [परि]कलितः, नियमत्वात् । अर्थोक्तिः—यः परमेश्वरो यज्ञरूपत्वेन 'तत्र सत्रे' तस्मिन् यागे 'गच्छन्' तिष्ठन्नपि 'अन्तःपुरस्थः' पुरस्य अन्तः अन्तःपुरं—शरीरमध्यं तिष्ठतीति 'अन्तःपुरस्थः' अन्तःशरीरे वर्त्तमान एव 'सद्भिः' योगनिष्ठैः पुरुषैः ['परि] कलितः' अवगतः। किञ्च—यः 'काकपक्षाश्रितोऽपि' धृतचूडोऽपि 'कौशिकस्य' विश्वामित्रस्य 'द्विषदुपशमनं' द्विषां—शत्रूणां यागविघ्नकारिणां रक्षसामुपशमनं—अभावं 'चक्रे' कृतवान् । उक्तिः—बालोऽपि काकपक्षाश्रितोऽपि 'कौशिकस्य' इन्द्रस्य शत्रूपशमं चक्रे, यः वामनो भूत्वा शिखावानेव इन्द्रद्विषो बलिप्रमुखान् दानवान् निरास्थत् । 'काकपक्षाश्रितोऽपि' वायसपक्षपाती सन् कौशिकस्य दिवाभीतस्य द्विषदुपशमनं कथं कुरुते? इति विरोधाभासः । यः 'अद्वितीयश्चाभूत्' द्वितीयरहितो जातः । 'सततं' सर्वदा 'सौमित्रौ' लक्ष्मणे 'सन्निधानं भजति सति' समीपे तिष्ठत्यपि पौरुषेण तेजसा आकृत्या च एक एव ददृशे, अथ च 'एकमेवाद्वितीयं ब्रह्म' इति श्रुत्वा अद्वितीयः । अद्भुतो रसः, विरोधाभासोऽलङ्कारः, प्रसादो गुणः, वैदर्भी रीतिः, वर्णश्लेषश्च ॥ १३ ॥

[बालबोधिनी]

यः सत्रे इति । 'सः' रामः 'भवतां' युष्माकं 'नित्यं' सर्वदा आधिपत्यं 'वितरतु'[1] 'ददातु । किंलक्षणमाधिपत्यम्? 'गोभूमिद्रव्यभव्यं' गावश्च भूमिश्च द्रव्यं च गोभूमिद्रव्याणि, तैः भव्यं—मनोहरं गोभूमिद्रव्यभव्यम् । स कः? 'यः' रामः 'सद्भिः' सत्पुरुषैः

---

१ विस्तारयतु पु० ॥

तत्र 'सत्रे' यज्ञे गच्छन्नपि 'अन्तःपुरस्थः परिकलितः' हृदयस्थो ज्ञातः। अन्तः—मध्ये पुरं अन्तःपुरम्, तस्मिन् तिष्ठतीति अन्तःपुरस्थः, स्त्रीमध्यस्थित इव निःशङ्को जातः । पुनः स कः? यो रामः काकपक्षाश्रितोऽपि सन् 'कौशिकस्य' विश्वामित्रस्य 'द्विषदुपशमनं' वैरिणां मारणं चक्रे। षोडशवर्षः शत्रुशमने दक्षः काकपक्षः, तं आश्रितः काकपक्षाश्रितः । पुनः स कः? यो रामः 'च' अपरं 'सौमित्रौ' लक्ष्मणे 'सन्निधानं' समीपं 'सततं' निरन्तरं भजन्नपि सति 'अद्वितीयः' एक एव 'अभूद्' बभूव, सत्यपि द्वितीये एकेनैव रामेण वैरिणः शमं नीताः, उभयोरपि ऐक्याचाभूत् ॥ १३ ॥

*

कृत्वा बाणेन [1]शोणोपलविमलरुचा रुग्णबाहुं सुबाहुं,
मारीचं मारुतास्त्रव्यतिकरतरलं पातयित्वाऽब्धिपारे ।
यः स्तोमं सोमपानाममदयदभयं स्तोमसंरक्षणेन,
क्षोणीन्द्रत्वं क्षणादप्युपनयतु स वः केशवस्यैकदेशः ॥ १४ ॥

[हृदयरञ्जनी]

कृत्वा बाणेनेति । 'सः' रामः 'वः' युष्माकं 'क्षोणीन्द्रत्वं' भूपतिश्रेष्ठत्वं 'क्षणादपि' क्षणादेव 'उपनयतु' उपढौकयतु प्रापयतु। अपिशब्द एवार्थे, निपातानामनेकार्थत्वात् । किंलक्षणः सः? 'केशवस्यैकदेशः' केशवस्य—विष्णोः मुख्यांशः, एकशब्दः प्रधानवाची । स कः? यः 'सोमपानां' विश्वामित्रयागे सोमपानां ऋत्विजां 'स्तोमं' समूहं 'अमदयत्' अहर्षयद् मोदयति स्म। किंलक्षणं स्तोमम्? 'अभयं' निर्भयम्, अथवा क्रियाविशेषणम्, न विद्यते भयं यस्मिन् कर्मणि यथा स्यात्तथा। 'स्तोमसंरक्षणेन' स्तोमस्य—यागस्य संरक्षणं—पालनं तेन। किं कृत्वा? 'बाणेन' शरेण 'सुबाहुं' राक्षसं 'रुग्णबाहुं' बाहुविकलं 'कृत्वा' हत्वा। किम्भूतेन बाणेन? 'शोणोपलविमलरुचा' शोणोपलः—निकषपाषाणः तद्वद् विमला—उज्ज्वला रुक्—कान्तिर्यस्य तेन। अन्यत्— 'मारीचं' सुबाहुभ्रातरं 'अब्धिपारे' समुद्रस्य पारे 'पातयित्वा' निरस्य। किम्भूतं मारीचम्? 'मारुतास्त्रव्यतिकरतरलं' वायव्यास्त्रस्य व्यतिकरः—सम्पर्कः तेन तरलं—चपलम्। अद्भुतो रसः, ओजो गुणः, छेकानुप्रासः, शब्दालङ्कारः ॥ १४ ॥

[बालबोधिनी]

कृत्वा बाणेनेति । सः 'केशवस्यैकदेशः' वासुदेवस्य एकांशो रामः 'वः' युष्माकं 'क्षणादपि' क्षणमात्रेणापि 'क्षोणीन्द्रत्वं' भूस्वामित्वं 'उपनयतु' [2]ददातु । स कः? 'यः'

1 शाणोपल° भा ३-४। एतत्पाठानुसारेणैव बालबोधिन्यां व्याख्या वर्त्तते॥ 2 प्रापयतु पु०॥

रामः 'स्तोमसंरक्षणेन कृत्वा' यज्ञरक्षणेन कृत्वा अभयं यथा भवति तथा 'सोमपानां' ब्राह्मणानां 'स्तोमं' समूहं 'अमदयद्' अहर्षयत्। किं कृत्वा? 'शाणोपलविमलरुचा' घर्षणपाषाणनिर्मलकान्तिना 'बाणेन' शरेण कृत्वा 'सुबाहुं' असुरं 'रुग्णबाहुं' छिन्नहस्तं कृत्वा। पुनः किं कृत्वा? 'मारीचं' असुरं 'मारुतास्त्रव्यातिकरतरलं' वायव्यास्त्रस्य सम्पर्केण [1]चपलं 'अब्धिपारे' समुद्रस्य पारे पातयित्वा ॥ १४ ॥

*

तस्मिन् योगाभियोगस्थिरवपुषि ऋषौ क्षत्रियब्राह्मणे यः,
क्वाप्यग्रे क्वापि पश्चात् क्वचिदहतरुचिः पार्श्वयोर्वर्त्तमानः।
बभ्राजे भ्रातृयुक्तः सविधगतविधुः कर्मसाक्षीव मेरौ,
मारीचारिश्चिरं वो रमयतु स [2]मनः [3]सम्पदुत्पादनेन ॥ १५ ॥

[हृदयरञ्जनी]

तस्मिन् योगाभियोगेति। 'सः' रामः 'वः' युष्माकं मनः 'रमयतु' सहर्षं करोतु। केन? 'सम्पदुत्पादनेन' सम्पदां—ऐश्वर्याणां उत्पादनं—भजनं तेन। किंलक्षणः? 'मारीचारिः' मारीचस्य हन्ता, 'चिरं' चिरकालं सर्वदेति। स कः? 'यः' रामः तस्मिन् ऋषौ 'बभ्राजे' शुशुभे। किं कुर्वाणः? क्वापि पथि 'अग्रे वर्त्तमानः' मुनेः पुरस्ताद् गच्छन्, क्वापि मुनेः पश्चाद् वर्त्तमानः, क्वचित् पार्श्वयोः वर्त्तमानः, मार्गे गमनवशाद् ऋषेः क्वचिदग्रे चलति क्वचित् पृष्ठे क्वचित् पार्श्वयोरित्यर्थः। किम्भूतो रामः? 'अहतरुचिः' न हता अहता रुचिः—कान्तिर्यस्य सः, पथि चलतोऽपि तस्य कान्तिर्न हता श्रमेणेति वाक्यार्थः। किंलक्षणो रामः? 'भ्रातृयुक्तः' लक्ष्मणसहितः। किम्भूते ऋषौ? 'योगाभियोगस्थिरवपुषि' योगेऽभियोगः—अभ्यासः योगाभ्यासः तेन स्थिरं—निश्चलं तेजोयुक्तं वा वपुः—शरीरं यस्य तस्मिन्। पुनः किम्भूते? 'क्षत्रियब्राह्मणे' पूर्वं क्षत्रियः पश्चाद् ब्राह्मणः क्षत्रियश्चासौ ब्राह्मणश्च क्षत्रियब्राह्मणः तस्मिन्। क इव रेजे? 'कर्मसाक्षीव' सूर्य इव, यथा सूर्यो मेरौ क्वचिदग्रे क्वचित् पश्चात् क्वचित् पार्श्वयोः वर्त्तमानः शोभते तद्वदित्यर्थः। किंलक्षणः सूर्यः? 'सविधगतविधुः' सविधं—समीपं गतः—प्राप्तः विधुः—चन्द्रो यस्य सः। ऋषेर्मेरोरुपमानम्, रामस्य सूर्येणोपमानम्, लक्ष्मणस्य चन्द्रेण। जातिरलङ्कारः उपमा च। पाञ्चाली रीतिः, "द्वित्रिपदा पाञ्चाली लाटी पञ्च सप्त वा यावत्।" [इति। रसः शृङ्गारः। ऋषिविषया रतिः स्थायी भावः। अर्थव्यक्तिर्गुणः ॥ १५ ॥

---

१ चञ्चलं पु० ॥ २ बालबोधिनीकृता '**मनःसम्पदुत्पादनेन**' इति **समस्ततया** व्याख्यातमस्ति। ३ **सर्वसम्पादनेन** भा. २ ॥

[बालबोधिनी]

तस्मिन् योगेति। सः 'मारीचारिः' रामः 'वः' भवतः 'चिरं' चिरकालं मनःसम्पदुत्पादनेन 'रमयतु' क्रीडयतु। मारीचस्य अरिर्मारीचारिः। मनसः सम्पद्–इच्छा मनःसम्पत्, तस्या उत्पादनं–करणं मनःसम्पदुत्पादनं तेन मनःसम्पदुत्पादनेन। स कः? यो रामः तस्मिन् क्षत्रियब्राह्मणे 'ऋषौ' विश्वामित्रे 'क्वापि' कुत्रचिदपि 'अग्रे' पुरतः, क्वापि च 'पश्चाद्' अपरस्तात्, क्वचित् 'पार्श्वयोः' वाम-दक्षिणयोः पार्श्वयोः 'वर्त्तमानः' तिष्ठन् सन् 'बभ्राजे' रराज। किंलक्षणः? 'अहतरुचिः' निर्मलकान्तिः। किंलक्षणे ऋषौ? 'योगाभियोगस्थिरवपुषि' तपोऽभ्यासेन निश्चलवपुषि। पूर्वं क्षत्रियः पश्चाद् ब्राह्मणः क्षत्रियब्राह्मणः तस्मिन्, "पूर्वकालैक०" [पाणिनि० २-१-४९] इति समासः। कस्मिन् क इव? 'मेरौ कर्मसाक्षीव' यथा मेरौ पर्वते 'कर्मसाक्षी' श्रीसूर्यः क्वापि अग्रे क्वापि पश्चात् क्वापि च पार्श्वयोर्वर्त्तमानो अहतरुचिः सन् 'भ्राजते' शोभते। किंलक्षणो रामः? 'भ्रातृयुक्तः' लक्ष्मणेन युतः। किंलक्षणः कर्मसाक्षी? 'सविधगतविधुः' सविधं गतः–समीपं प्राप्तः विधुः–चन्द्रो यस्यासौ सविधगतविधुः ॥ १९ ॥

*

श्रृण्वन् पुण्याः कथास्ताः पथि कुशिकतनूजन्मना कथ्यमानाः,
स्नानं सानन्दचित्तः प्रतिनदि विदधद् दग्धदुःखाभिरद्भिः।
पश्यन् कान्तारपङ्क्तीः पिकनिकरवतीर्भूतलोद्भूतकन्या-
रत्नन्यासैकभाण्डं निमिनगरमटन् पातु वः कैटभारिः ॥ १६ ॥

[हृदयरञ्जनी]

श्रृण्वन्निति। सः 'कैटभारिः' कैटभस्य अरिः–शत्रुः रामः 'वः पातु' युष्मान् रक्षतु। किं कुर्वन्? 'निमिनगरं' जनकपुरं मिथिलां 'अटन्' गच्छन्। किम्भूतं नगरम्? 'भूतलोद्भूतकन्यारत्नैकभाण्डं' भूतलाद् उद्भूता चासौ कन्या च तदेव रत्नं तस्या भाण्डं–रत्नन्यासैकपेटी, कन्यारत्नं सीता तस्याः वासभूमिः। पुनः किं कुर्वन्? 'ताः कथाः श्रृण्वन्' 'ताः' प्रसिद्धाः पुण्याः पवित्राः कथाः 'श्रृण्वन्' आकर्णयन्। कास्ताः कथाः? 'कुशिकतनूजन्मना' कुशिकस्य तनूः–शरीरं तस्याः जन्म यस्य सः तेन विश्वामित्रेण 'कथ्यमानाः' वाच्यमानाः, **बालकाण्डे रामायणे** विश्वामित्रवचनव्याजेन वाल्मीकेन उक्ताः। पुनः किं कुर्वन्? 'प्रतिनदि' नद्यां नद्यां 'दग्धदुःखाभिरद्भिः' पानीयैः हतक्लेशैरुदकैः स्नानं 'विदधत्' कुर्वन्, अत एव 'सानन्दचित्तः' निर्मलचेताः। पुनः किं कुर्वन्? 'कान्तारपङ्क्तीः पश्यन्' वनश्रेणीर्विलोकयन्। कान्ताराणां पङ्क्तयः किंलक्षणाः?

ताः 'पिकनिकरवतीः' पिकानां निकरः—समूहः कोकिलसमूहो विद्यते यासु ताः। अथवा वर्णव्यत्ययेन 'कपिनिकरवतीः' वानरयुक्ताश्च। वर्णच्युतकालङ्कारः ॥ १६ ॥

[बालबोधिनी]

शृण्वन्निति। सः 'कैटभारिः' रामः 'वः' युष्मान् 'पातु' रक्षतु। किं कुर्वन्? 'निमिनगरं' विदेहान् 'अटन्' गच्छन्। किंलक्षणम्? 'भूतलोद्भूतकन्यारत्नन्यासैकभाण्डं' भुवः—पृथिव्याः तलं भूतलम्, तस्माद् उद्भूतं—सम्भूतं भूतलोद्भूतम्, कन्यारत्नमिव कन्यारत्नम्, भूतलोद्भूतं च तत् कन्यारत्नं च भूतलोद्भूतकन्यारत्नम्, तस्य न्यासः—गोपनं तस्य एकभाण्डं—एकमेव स्थानम्। पुनः किं कुर्वन्? 'पथि' मार्गे 'ताः' पुण्याः 'कथाः' वार्त्ताः शृण्वन्। किंलक्षणाः कथाः? 'कुशिकतनूजन्मना' विश्वामित्रेण कथ्यमानाः। तन्वाः जन्म यस्य स तनूजन्मा, कुशिकस्य तनूजन्मा कुशिकतनूजन्मा तेन। पुनः किं कुर्वन्? 'प्रतिनदि' नदीं नदीं प्रति 'दग्धदुःखाभिः' ज्वलितपापाभिः अद्भिः 'सानन्दचित्तः' हृष्टहृदयः सन् 'स्नानं' मज्जनं 'विदधत्' कुर्वन्। पुनः किं कुर्वन्? 'पिकनिकरवतीः' कोकिलसमूहवतीः 'कान्तारपङ्क्तीः' वनश्रेणीः पश्यन् ॥ १६ ॥

*

यस्तीर्थानामुपास्त्या गलितमलभरं मन्यते स्म स्वमेवं,
नाज्ञासीज्जज्ञिरे यन्मम चरणरजःपातपूतान्यमूनि।
पादस्पर्शेन कुर्वन् झटिति विघटितग्रावभावामहल्यां,[1]
कौशल्यासूनुरूनं व्यपनयतु स वः श्रेयसा च श्रिया च ॥ १७ ॥

[हृदयरञ्जनी]

यस्तीर्थानामिति। स कौशल्यासूनुः वः 'ऊनं' अल्पत्वं 'व्यपनयतु' दूरीकरोतु परिहरतु। केन? 'श्रेयसा' पुण्येन 'च' अपरं 'श्रिया' लक्ष्म्या च। अयमर्थः—स रामो 'वः' युष्माकं 'श्रेयसः' पुण्यस्य लक्ष्म्याश्च न्यूनं 'स्फेटयतु' पूर्णं करोतु। सः कः? यो रामः तीर्थानां 'उपास्त्या' सेवया स्नानादिपरिचर्यया 'स्वं' आत्मानं 'गलितमलभरं' गलितः—गतः मलभरः—पापभरो यस्य तं आत्मानं मन्यते स्म। यो राम एवं 'नाज्ञासीत्' नाववुद्ध[वान्]। एवमिति किम्? यद् 'अमूनि' तीर्थानि जलानि 'मम चरणरजःपातपूतानि जज्ञिरे' जातानीति, चरणयो रजः चरणरजः, तस्य पातः—पतनं तेन पूतानि—पवित्राणि तीर्थानि जातानीति। काकाक्षिगोलकन्यायेन तीर्थशब्द उभयतोऽपि योज्यः, जलवाचित्वात् तीर्थवाचित्वात् तीर्थशब्दस्य। तदेतद्विशेषणेन चरणरजसो माहात्म्यं प्रति-

१ °महिल्यां भा० १–२ ॥

पादयत्नाह। यः किं कुर्वन्? 'झटिति' तत्क्षणमेव 'पादस्पर्शेन' चरणयोः सम्पर्कमात्रेण 'अहल्यां' गौतमभार्यां 'विघटितग्रावभावां' विघटितः—विदलितः वियोजितः ग्रावभावः—पाषाणत्वं यस्याः सा तां कुर्वन्, राघवचरणरजःसम्पर्केण अहल्या शापप्राप्त-पाषाणत्वं त्यक्त्वा पुनः स्वदेहं लब्धवतीति तात्पर्यार्थः। तथा चोक्तं **हनुमता**—

क्षालयामि तव पादपङ्कजे, नाथ! दारु-दृषदोः किमन्तरम्?।
मानुषीकरणचूर्णमस्ति ते, पादयोरिति कथा गरीयसी ॥१॥ [महानाटके ३.४५]

अनुमानालङ्कारः। तथा चोक्तम्—

प्रत्यक्षाल्लिङ्गतो यत्र कालत्रितयवर्त्तिनः।
लिङ्गिनो भवति ज्ञानमनुमानं तदुच्यते ॥ १ ॥

[ ] ॥ १७ ॥

[बालबोधिनी]

यस्तीर्थेति। सः 'कौशल्यासूनुः' रामः 'वः' युष्माकं 'श्रेयसा' कल्याणेन 'श्रिया च' लक्ष्म्या च यद् 'ऊनं' न्यूनं तद् 'व्यपनयतु' निराकरोतु। स कः? 'यः' रामः तीर्थानां 'उपास्त्या' उपासनया 'स्वं' आत्मानं 'गलितमलभरं' गतपापभारं मन्यते स्म, परन्तु एवं 'नाज्ञासीद्' न जज्ञे। एवं कथम्? यद् 'अमूनि' तीर्थानि मम 'चरणरजःपातपूतानि' पादरेणुकापतनेन पवित्रितानि 'जज्ञिरे' बभूवुः। तत् कथम्? यस्मात् कारणात् 'पाद-स्पर्शेन' चरणालम्भनेन कृत्वा 'झटिति' शीघ्रं 'अहल्यां' गौतमपत्नीं 'विघटितग्रावभावां' नाशितशिलाभावां कुर्वन् वर्त्तते ॥ १७ ॥

*

क्षिप्तः पातालमूले बलिरिह महता येन यस्माच्च भिन्न-
ब्रह्माण्डान्मण्डयन्ती त्रयमपि जगतां निम्नगा निर्जगाम।
यश्चक्रे स्पर्शमात्रादपि दलितशिलाभावशल्यामहल्यां[1],
कल्याणं लम्भयन् वः स पृणतु चरणः शार्ङ्गिणो राममूर्त्तेः॥ १८॥

[हृदयरञ्जनी]

क्षिप्त इति। 'राममूर्त्तेः' रामावतारस्य 'शार्ङ्गिणः' विष्णोः चरणो 'वः' युष्माकं 'पृणतु' प्रीणयतु, तृप्तान् करोतु मनोरथैरित्यर्थः। 'रामो वः पृणतु' इति वक्तव्ये तस्य चरण इति वक्तुरयमभिप्रायः—वामनावतारो यस्यैवेति सूचनार्थः। किं कुर्वन्? कल्याणं 'लम्भयन्' उत्पादयन्। सः कः? 'येन' रामेण चरणेन 'इह' भूतले 'महता सता'

---

१ °महिल्यां भा० १-२ ॥

वर्द्धमानेन सता 'बलिः' दानवेन्द्रः 'पातालमूले' अधस्तात् 'क्षिप्तः' [? प्र]वेशितः प्रापितः । 'च' अन्यद् 'यस्मात्' चरणात् 'निम्नगा' गङ्गा 'निर्जगाम, निर्ययौ प्रादुर्बभूव । किम्भूतात् ? 'भिन्नब्रह्माण्डात्' भिन्नं-भेदितं ब्रह्माण्डं—ब्रह्मकटाहो येन तस्मात्, ब्रह्मलोकमभिव्याप्तवतः । किम्भूता निम्नगा ? जगतां त्रयमपि 'मण्डयन्ती' भूषयन्ती, एकैव गङ्गा अलकनन्दा-सीता-भागीरथीरूपेण भूत्वा त्रीन् लोकान् पुनातीत्यर्थः । 'च' अपरं 'यः' रामः चरणस्पर्शमात्रादेव अहल्यां ['दलितशिलाभावशल्यां'] दलितं शिलाभावशल्यं यस्याः सा तां 'चक्रे' विदधे इति स्पष्टम् ॥ १८ ॥

[बालबोधिनी]

क्षिप्तः पातालेति । सः शार्ङ्गिणः 'राममूर्त्तेः' रामस्य 'चरणः' पादः 'वः' युष्मान् 'कल्याणं' श्रेयः 'लम्भयन्' प्रापयन् सन् 'पृणतु' रक्षतु । स कश्चरणः ? येन महता चरणेन 'इह' भूतले 'बलिः' असुरः 'पातालमूले' रसातले क्षिप्तः । 'च' अपरं यस्माद् 'भिन्नब्रह्माण्डाद्' भेदितब्रह्माण्डात् चरणाद् 'जगतां' लोकानां त्रयमपि 'मण्डयन्ती' अलङ्कुर्वती 'निम्नगा' गङ्गा 'निर्जगाम' निष्क्रान्ता । निम्नं गमनं यस्याः सा निम्नगा । पुनः स कः ? 'यः' चरणः 'स्पर्शमात्रादपि' आलम्भमात्रेणापि अहल्यां दलितशिलाभावशल्यां 'चक्रे' कृतवान् । दलितं शिलाभावरूपं शल्यं यस्याः सा दलितशिलाभावशल्या ताम् ॥ १८ ॥

*

यं कृत्वा कौशिकोऽग्रे सममनुजनुषा पौरुषेणेव भाग्यं,
भोग्यां पुण्यैरगण्यैः श्रियमिव मिथिलां प्राप पत्याऽर्थितोऽस्याः ।
स श्रीकान्तावतारस्तरुणिमसमयारम्भशोभाभिरामो,
रामो वः कामितादप्यधिकमधिपतीभावमाविष्करोतु ॥ १९ ॥

[हृदयरञ्जनी]

यं कृत्वेति । 'सः' रामो वोऽधिपतीभावं 'आविष्करोतु' प्रकटयतु ददातु । किम्भूतम् ? 'कामितादप्यधिकं' अभिलषितादपि प्रभूतम् । कोऽसौ रामः ? 'श्रीकान्तावतारः' श्रीः कान्ता यस्य, स वा श्रियः कान्तः, तस्य अवतारः—हरिरूपी । पुनः किंलक्षणः ? 'तरुणिमसमयारम्भशोभाभिरामः' तरुणभावः तरुणिमा—तारुण्यं तस्य समयः—अवसरः तस्याऽऽरम्भः—उद्गमः तत्र या शोभा तज्जनिता वा शोभा—कान्तिः तया अभिरामः—सुन्दरः । स कः ? कौशिकः 'यं' रामं 'अग्रे' पुरस्तात् कृत्वा 'मिथिलां' जनकनगरीं 'प्राप' गतवान् । किंलक्षणो मुनिः ? 'अस्याः' मिथिलायाः 'पत्या' अधिपेन जनकेन 'अर्थितः'

आह्वातः । किम्भूतं यम्? 'अनुजनुषा' लक्ष्मणेन 'समं' भ्रातृयुक्तम् । केन युक्तं कमिव? पौरुषेणान्वितं भाग्यमिव । कामिव मिथिलां प्राप? 'श्रियमिव' लक्ष्मीमिव । किम्भूतां श्रियम्? 'अगण्यैः' अनेकैः 'पुण्यैः' सुकृतैः भोग्याम्, मिथिलाऽपि एवंविधा भवति । यथा कश्चन राजा पौरुषेण युक्तं भाग्यं पुरो विधाय सुकृतभोग्यां लक्ष्मीं प्राप्नोति तद्वद् मुनिर्लक्ष्मणसहितं रामं पुरस्कृत्येत्यर्थः । उपमाऽलङ्कारः । प्रसत्तिर्गुणः । यथा—झटित्यर्थार्पकः अयं (? कत्वं यत्) प्रसत्तिः सोच्यते यथा । अनुप्रासः । वैदर्भी रीतिः । तथा—

अस्पष्टदोषमत्राभिसमयगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्यं वैदर्भी रीतिरिष्यते ॥ १ ॥

[ ] ॥ १९ ॥

[बालबोधिनी]

यं कृत्वेति । सः 'रामः' रामचन्द्रः 'वः' युष्माकं 'कामितात्' वाञ्छितादपि 'अधिकं' बहु 'अधिपतीभावं' आधिपत्यं 'आविष्करोतु' प्रकटीकरोतु । अनधिपतेरधिपतेर्भावः अधिपतीभावः, तं अधिपतीभावम् । किंलक्षणः सः? 'श्रीकान्तावतारः' आदिपुरुषावतारः । पुनः किंलक्षणः? 'तरुणिमसमयारम्भशोभाभिरामः' तारुण्यावस्थाप्रारम्भश्रिया मनोहरः । स कः? 'कौशिकः' विश्वामित्रः 'अनुजनुषा समं' लक्ष्मणेन सह 'यं' रामं 'अग्रे कृत्वा' पुरस्कृत्य 'मिथिलां' विदेहां 'प्राप' प्राप्तवान् । केन सह कमिव अग्रे कृत्वा कामिव? श्रियमिव 'पौरुषेण' समं भाग्यं अग्रे कृत्वा, यथा कश्चित् पुमान् 'भाग्यं' प्राक्तनं कर्म अग्रे कृत्वा 'पौरुषेण' पुरुषार्थेन समं 'श्रियं' लक्ष्मीं प्राप्नोति । किंलक्षणां मिथिलां श्रियं च? 'अगण्यैः' बहुभिः पुण्यैः 'भोग्यां' भोगार्हाम् । किंलक्षणो विश्वामित्रः? 'अस्याः' मिथिलायाः 'पत्या' जनकेन 'अर्थितः' आकारितः ॥ १९ ॥

*

विश्वामित्रं विदित्वा नगरपरिसरप्राप्तमाशाय तस्मै,
सद्यः सम्पाद्य पाद्यप्रभृति च जनकः साकमृत्विग्जनेन ।
भूयो भूयोऽपि यस्मिन् निजदृशमदिशद् विस्मयस्मेरतारां,
संसारान्तःप्रचारं विरमयतु रमावल्लभः स प्रभुर्वः ॥ २० ॥

[हृदयरञ्जनी]

विश्वामित्रमिति । स प्रभुः 'संसारान्तःप्रचारं विरमयतु' संसारस्य अन्तःप्रचारं—मध्यभ्रमणं पुनः पुनः अवतरणं शमयतु । किंलक्षणः रामः? 'रमावल्लभः' लक्ष्मीकान्तः । स कः? राजा जनकः 'यस्मिन्' रामे 'भूयो भूयः' पुनः पुनः 'निजदृशं' स्वां दृष्टिं 'अदिशत्' आददौ निदधे । किंविधाम्? 'विस्मयस्मेरतारां' विस्मयेन

स्मेरा—चपला तारा—कनीनिका यस्याः सा ताम्, तदवलोकनेन चञ्चलो जात इत्यर्थः । किं कृत्वा ? विश्वामित्रं मुनिं नगरपरिसरं—नगरसमीपं प्राप्तं 'विदित्वा' ज्ञात्वा । 'च' अन्यद् 'आप्ताय' उपकारिणे 'तस्मै' विश्वामित्राय ऋत्विग्जनेन सह 'पाद्यप्रभृति' अर्हणां सद्यः 'सम्पाद्य' कृत्वा ॥ २० ॥

[बालबोधिनी]

विश्वामित्रं विदित्वेति । सः 'प्रभुः' रामः 'वः' युष्माकं 'संसारान्तःप्रचारं' संसारमध्ये गमनागमनं विरमयतु । किंलक्षणः ? 'रमावल्लभः' रमा वल्लभा यस्यासौ रमावल्लभः, रमाया वल्लभो रमावल्लभ इति वा । स कः ? 'जनकः' वैदेहः 'ऋत्विग्जनेन साकं' ऋत्विक्समूहेन सह विश्वामित्रं 'नगरपरिसरप्राप्तं' ग्रामनिकटवर्तिभूमिप्राप्तं 'विदित्वा' ज्ञात्वा तस्मै 'आप्ताय' हितकारिणे विश्वामित्राय 'सद्यः' तत्काले 'पाद्यप्रभृति' अर्चनं 'सम्पाद्य च' कृत्वा 'यस्मिन्' रामे 'भूयो भूयोऽपि' पुनः पुनरपि 'निजदृशं' स्वकीयां दृष्टिं 'अदिशद्' आरोपितवान् । किंलक्षणां निजदृशम् ? 'विस्मयस्मेरतारां' आश्चर्येण ईषद्धास्ययुक्तकनीनिकाम् ॥ २० ॥

*

[1]अप्रज्ञातेऽपि सम्यक् क्रतुपुरुषतया ज्ञायमाने जनानां,
धाम्ना स्वेनार्हणीये हरिणशिशुदृशां दर्शनीये श्रिया च ।
राजा सूर्यप्रशिष्यः किमपि किल विदन्नाऽऽदधेऽसौ विशिष्टां,
दृष्टिं यस्मिन्ननिष्टं स दहतु सहसा सैंहिकेयासुहृद् वः ॥ २१ ॥

[हृदयरञ्जनी]

अप्रज्ञातेऽपीति । सः 'सैंहिकेयासुहृत्' राहुप्राणहारी सः कृष्णावतारो रामः 'सहसा' झटिति 'वः' युष्माकं ['अनिष्टं'] अकल्याणं 'दहतु' भस्मीकरोतु । सिंहिकायाः अपत्यं सैंहिकेयः "स्त्रीभ्यो ढक्" [पाणि० ४.१.१२०] इति ढक् । सः कः ? 'किल' इति सत्ये आदरे वा । 'असौ' जनको राजा 'यस्मिन्' रामे 'विशिष्टां' विशेषेण सादरां 'दृष्टिं' दृशं 'किमपि विदन् सन्' किमप्येतदपूर्वदर्शनमिति जानन् 'आदधे' निदधे, राममादरपूर्वकं ददर्शेत्यर्थः । किंलक्षणो राजा ? 'सूर्यप्रशिष्यः' सूर्यस्य शिष्यो याज्ञवल्क्यः तस्य शिष्यो जनक इति कृत्वा सूर्यस्य प्रशिष्यः—शिष्यस्य शिष्यः । क सति 'क्रतुपुरुषतया' अयं यज्ञेश्वर इति ['सम्यग्'] विशेषतया 'अप्रज्ञातेऽपि' अज्ञातेऽपि । पुनः क सति ? 'स्वेन धाम्ना' स्वतेजसा 'जनानां' लोकानां 'अर्हणीये' पूज्ये 'ज्ञायमाने

---

१ अप्रज्ञाते च सम्यक् भा. ३–४ ।

सति' लोकैः को[प्य]ऽयमतितेजस्वी महापुरुष इति ज्ञाते सतीति। पुनः क सति? 'श्रिया' शोभया 'हरिणशिशुदृशां' मृगशावलोचनानां स्त्रीणां दर्शनीये जायमाने सति। हरिणस्य शिशुः हरिणशिशुः तस्य दृशाविव दृशौ यासां तास्तासां द्रष्टुं योग्यः दर्शनीयः तस्मिन्, कामिनीभिः 'साक्षात् काम एवायम्' इति दृष्ट इति व्यङ्ग्यम्। अद्भुत-शृङ्गारयोरलङ्कारः भावोदयः, प्रसत्तिर्गुणः, वैदर्भी रीतिः॥ २१॥

[बालबोधिनी]

अप्रज्ञातेऽपीति। सः 'सैंहिकेयासुहृद्' राहुवैरी रामः 'वः' युष्माकं '**अनिष्टं**' दुरितं 'सहसा' अकस्मादविचार्य 'दहतु' भस्मीकरोतु स। कः? असौ 'सूर्यप्रशिष्यः' याज्ञवल्कशिष्यः 'राजा' जनकः 'किल' इति सम्भावनायाम् 'किमपि' किञ्चिद् विदन् सन् 'यस्मिन्' रामे 'विशिष्टां' विशेषयुक्तां 'दृष्टिं' चक्षुः, अत्राप्यर्थे 'राजा तु सूर्यप्रशिष्यः, रामश्च सूर्यवंशोद्भवः, तेन किमपि विदन् 'आदधे' आरोपितवान्। किंलक्षणे रामे? सम्यग् अप्रज्ञातेऽपि। पुनः किंलक्षणे रामे? विश्वामित्रोपदेशात् 'क्रतुपुरुषतया' यज्ञपुरुषत्वेन ज्ञायमाने। पुनः किंलक्षणे? 'जनानां' पुरुषाणां मध्ये 'स्वेन धाम्ना' आत्मतेजसा 'अर्हणीये' पूजनीये। पुनः किंलक्षणे? 'च' अपरं 'श्रिया' स्वशरीरशोभया कृत्वा हरिणशिशुदृशां 'दर्शनीये' द्रष्टुं योग्ये। हरिणानां-मृगाणां शिशवः-बालाः हरिणशिशवः, हरिणशिशूनां दृश इव दृशः-चक्षूंषि यासां ता हरिणशिशुदृशः, तासां हरिणशिशुदृशाम्॥ २१॥

*

सम्भूतं भानुवंशे दशरथपितृकं [1]रामभद्राभिधानं,
क्रव्यादक्षोददक्षं [2]यमवगतवता गाधिपुत्रोपदेशात्।
राज्ञा पुत्रीप्रदानप्रगुणितमनसाऽनङ्गजिच्चापभङ्ग-
प्रत्यूहार्त्तेन जातं प्रतिहतविपदं सम्पदं वः स दिश्यात्॥ २२॥

[हृदयरञ्जनी]

सम्भूतं भानुवंशे इति। 'सः' रामः 'वः' युष्माकं सम्पदं '**दिश्यात्**' देयात्। किम्भूतां सम्पदम्? 'प्रतिहतविपदं' प्रतिहता-निवारिता विपत्-आपद् यस्याः सा तां अविनाशिनीम्। 'राज्ञा' जनकेन 'अनङ्गजिच्चापभङ्गप्रत्यूहार्त्तेन जातं' **बभूवे**, अनङ्गं जितवान् अनङ्गजित्-श्रीमहादेवः तस्य चापः-धनुः तस्य भङ्गः स एव प्रत्यूहः-विघ्नोऽन्तरायः स एव आर्त्तः-पीडा तेन पीडितेन दुःखितेन बभूवे। **किम्भूतेन?** 'गाधिपुत्रोपदेशात्' विश्वामित्रवचनाद् 'यं' रामं वक्ष्यमाणगुणोपेतं 'अवगतवता' जानता

१ रामराजाभि° भा. २॥ २ यमधिगत° भा. १॥

सता । पुनः किंलक्षणेन राज्ञा ? 'पुत्रीप्रदानप्रगुणितमनसा' पुत्र्याः–सीतायाः प्रदानं पुत्रीप्रदानं तत्र प्रगुणितं–प्रह्वीभूतं अनुकूलितं मनो यस्य तेन, यदि कन्याप्रदाने धनुर्भङ्गः पणो न कृतो भवेत् तदा तस्मै रामायेयं सीता दत्ता स्यादिति मनःपीडया पीडितमिति भावः । किम्भूतं रामम् ? 'भानुवंशे सम्भूतं' सूर्यवंशे जातम् । तथा 'दशरथपितृकं' दशरथः पिता यस्य स तं दशरथपितृकम् । तथा 'रामभद्राभिधानं' रामभद्र इत्यभिधानं–नाम यस्य स तं रामभद्राभिधानम् । तथा 'क्रव्यादक्षोददक्षं' क्रव्यं–मांसं अदन्ति क्रव्यादाः– राक्षसाः तेषां क्षोदः–हिंसनं तत्र दक्षः–पण्डितः चतुरः तम् । एवं सकलगुणवरोपेतं रामं दृष्ट्वा रामसाध्यः पणोऽयमिति मत्वा दुःखितोऽभूदित्यर्थः । गौडीया रीतिः, ओजो गुणः, ग्लानिचिन्तयोर्भावयोः सन्धिः । शब्दाः समासवन्तो भवन्ति यथाशक्ति गौडीयाः ॥ २२ ॥

[बालबोधिनी]

सम्भूतं भानुवंशे इति । स रामः 'वः' युष्माकं 'प्रतिहतविपदं' निराकृतापदं 'सम्पदं' समृद्धिं 'दिश्यात्' दिशतु । कथं सम्यग्ज्ञातः ? इत्यत आह–स कः ? 'यं' रामं 'गाधिपुत्रोपदेशाद्' विश्वामित्रकथनाद् 'अवगतवता' ज्ञातवता 'राज्ञा' जनकेन 'पुत्रीप्रदानप्रगुणितमनसा सीतासम्प्रदाने सज्जीभूतचित्तेन 'जातं' अभावि । किंलक्षणं रामम् ? 'भानुवंशे' सूर्यवंशे 'सम्भूतं, उत्पन्नम् । पुनः किंलक्षणम् ? दशरथपितृकं' दशरथः पिता यस्यासौ दशरथपितृकः, तं दशरथपितृकम् । पुनः किंलक्षणम् ? 'रामभद्राभिधानं' रामभद्रः अभिधानं–नाम यस्यासौ रामभद्राभिधानः, तं रामभद्राभिधानम् । पुनः किंलक्षणम् ? 'क्रव्यादक्षोददक्षं' क्रव्यं–अपक्वं मांसं अदन्तीति क्रव्यादाः–असुराः, तेषां क्षोदः–चूर्णीकरणं तस्मिन् दक्षः–चतुरः, तं क्रव्यादक्षोददक्षम् ? । किंलक्षणेन राज्ञा ? अनङ्गजिच्चापभङ्गप्रत्यूहार्त्तेन' अनङ्गं जयतीत्यनङ्गजिद्–महादेवः, तस्य चापं अनङ्गजिच्चापम्, तस्य भङ्गः स एव प्रत्यूहः–अन्तरायः तेन आर्त्तः–पीडितः सन् ॥ २२ ॥

*

आदेशात् कौशिकस्य स्मरमथनधनुः स्थापितं मैथिलेन,
क्षोणीन्द्रेणाऽऽत्मपुत्रीपरिणयनपणं तत्क्षणादेव वीक्ष्य ।
तस्मिन् भङ्गाभियोगं भुजग इव सुधाकुम्भलाभान्तराये,
यः प्रारेभे तरस्वी वितरतु [1]विभवं स प्रभूतं प्रभुर्वः ॥ २३ ॥

[हृदयरञ्जनी]

आदेशात् कौशिकस्येति । स प्रभुः 'वः' युष्माकं प्रभूतं 'विभवं' ऐश्वर्यं 'वितरतु' ददातु । किंलक्षणः ? 'तरस्वी' बलवान् । सः कः ? 'यः' रामः 'तस्मिन्'

1 विभवं वैनतेयध्वजो वः भा० १ ॥

स्मरमथनधनुषि 'भङ्गाभियोगं' भङ्गस्याभियोगः—उद्यमः तं भङ्गाभियोगं 'प्रारेभे' उपचक्रमे। किं कृत्वा? 'स्मरमथनधनुर्वीक्ष्य' ईशधनुः चापं 'वीक्ष्य' दृष्ट्वा। किम्भूतं धनुः? 'कौशिकस्यादेशाद्' विश्वमित्राज्ञया 'मैथिलेन' जनकेन 'क्षोणीन्द्रेण' राज्ञा पुरस्तात् स्थापितम्। किम्भूतं धनुः? 'आत्मपुत्रीपरिणयनपणं' आत्मनः—स्वस्य पुत्री—सीता तस्याः परिणयनं—विवाहः तदेव पणः—शुल्कं यस्य तत्, य इदं धनुर्नम्रीकरिष्यत्येनां परिणेष्यतीति पणो यत्र, तद् धनुर्वीक्ष्य तत्क्षणादेतद्भङ्गे प्रवृत्त इत्यर्थः। क इव? यथा पूर्वं 'भुजगः' सर्पाधीश्वरः 'सुधाकुम्भलाभान्तराये' अमृतकुम्भप्राप्तिविघ्ने भङ्गे प्रारम्भं चक्रे तद्वदित्यर्थः। तरस्वीति साभिप्रायं विशेषणम्, औत्सुक्यभावस्योदयः। श्लेषालङ्कारः। मधुरो गुणः। वैदर्भीरीतिः॥ २३॥

[बालबोधिनी]

आदेशादिति। सः 'प्रभुः' रामः 'वः' युष्माकं 'प्रभूतं' समृद्धं विभवं 'वितरतु' [1]ददातु। स कः? यः 'तरस्वी' बलवान् रामः 'कौशिकस्य' विश्वामित्रस्य 'आदेशाद्' आज्ञातः 'मैथिलेन' जनकेन 'क्षोणीन्द्रेण' राज्ञा 'स्थापितं' आरोपितं 'स्मरमथनधनुः' महारुद्रस्य चापं तत्क्षणादेव 'वीक्ष्य' दृष्ट्वा 'तस्मिन्' धनुषि 'भङ्गाभियोगं' भङ्गाभ्यासं 'प्रारेभे' प्रारब्धवान्। किं लक्षणं धनुः? मैथिलस्य 'आत्मपुत्रीपरिणयनपणं' सीताविवाहकारणम्। किं लक्षणे धनुषि? उत्प्रेक्ष्यते—'सुधाकुम्भलाभान्तराये भुजग इव' अमृतघटप्राप्तेः अन्तरायभूते सर्पे इव॥ २३॥

*

वैदेहे सन्दिहाने जपति मुनिजने सिद्धिदान् वेदमन्त्रान्,
सीतायां च स्मरन्त्यामचलदुहितरं ताम्यति ज्ञातिवर्गे।
आदायाऽऽकृष्य भङ्क्त्वा त्रिपुररिपुधनुर्यो न किञ्चिद् विचक्रे,
चक्री स प्रीतये वो भवतु कृतदिनाधीशवंशावतारः॥ २४॥

[हृदयरञ्जनी]

वैदेहे सन्दिहाने इति। कृतदिनाधीशवंशावतारः चक्री 'सः' रामः 'वः प्रीतये' 'वः' युष्माकं मुदे भवतु। 'चक्री' चक्रमस्यास्तीति चक्री—चक्रपाणिः। सः कः? यो 'न किञ्चिद् विचक्रे' विक्रियां न प्राप, विस्मयं न ययौ। किं कृत्वा? 'त्रिपुररिपुधनुः' त्रिपुराणां रिपुः—श्रीमहादेवः तस्य धनुः—चापं 'आदाय' गृहीत्वा च आकृष्य तद् धनुः

---

१ विस्तारयतु पु०॥

भङ्क्त्वाऽपि । क सति ? 'वैदेहे सन्दिहाने सति' जनके संशयं कुर्वति सति । तथा मुनिजने 'सिद्धिदान्' सिद्धिप्रदान् समर्थान् वेदमन्त्रान् 'जपति सति' पठति सति स्मरति सति । तथा सीतायां जानक्यां च 'अचलदुहितरं' गौरीं 'स्मरन्त्यां ध्यायमानायाम् । तथा 'ज्ञातिवर्गे ताम्यति सति' बन्धुवर्गे ग्लायमाने सति । एवं सति स रामः झटिति धनुरादाय आकृष्य बभञ्जेत्यर्थः । सौकुमार्योऽयं गुणः, "अनिष्ठुराक्षरत्वं यत् सौकुमार्यमुदाहृतम् ।" विशेषोक्तिरलङ्कारः । कारणसामग्र्यां सत्यां कार्योत्पत्तिरिति विशेषो लाक्षि(लक्ष)णम् । तत्र धनुर्भङ्ग लक्षणगर्वकारणसामग्री वर्त्तते, स्मयलक्षणं कार्यं रामेणोत्पद्यतामिति ॥ २४ ॥

[बालबोधिनी]

वैदेहे इति । सः 'चक्री' रामः 'वः' युष्माकं 'प्रीतये' प्रीत्यै 'भवतु' अस्तु । किं लक्षणः ? 'कृतदिनाधीशवंशावतारः' दिनस्य–अह्नः अधीशः दिनाधीशः–सूर्यः तस्य वंशः, कृतः दिनाधीशवंशे अवतारो येनासौ कृतदिनाधीशवंशावतारः । स कः ? 'यः' रामः 'त्रिपुररिपुधनुः' महादेवचापं 'आदाय' गृहीत्वा 'आकृष्य' ज्याधिरूढं कृत्वा 'भङ्क्त्वा' चूर्णीकृत्य च 'किञ्चित्' किमपि 'न विचक्रे' विकारं न प्राप्तः । क सति ? 'वैदेहे' जनके 'सन्दिहाने' सन्देहं [1]प्राप्नुवति । पुनः क सति ? 'मुनिजने' ऋषिसमूहे सिद्धिदान् वेदमन्त्रान् जपति सति । पुनः क सति ? सीतायां 'अचलदुहितरं' पार्वतीं स्मरन्त्यां च सत्याम् । पुनः क सति ? 'ज्ञातिवर्गे' [2]बन्धुजने 'ताम्यति' ग्लानिं [3]प्राप्नुवति सति ॥ २४ ॥

*

येनाधिज्यं धनुस्तन्मदनदमयितुर्लीलया भज्यमानं,
शब्देनाऽऽह्वानमुच्चैः किल परुषरुषो रैणुकेयस्य चक्रे ।
मन्दाक्षान्मन्दमक्षि प्रणयपरिचयाल्लोलमप्राप्तिभीते-
र्भीरु व्यापारयन्त्या जनक[4]तनुजया वीक्षितः सोऽवताद् वः ॥२५॥

[हृदयरञ्जनी]

येनाधिज्यमिति । 'सः' रामो 'वः' युष्मान् 'अवतात्' रक्षतात् । किंलक्षणो रामः ? जनकतनुजया 'विक्षितः' दृष्टः । किंलक्षणया ? 'अक्षि व्यापारयन्त्या' लोचनं प्रेरयन्त्या । किंलक्षणं चक्षुः ? कथं यथा भवति ? 'मन्दाक्षाद्' लज्जातो मन्दं यथा स्यात्तथा । [पुनः] किम्भूतं चक्षुः ? 'प्रणयपरिचयाल्लोलं' प्रणयस्य–स्नेहस्य प्रथमपरिचयः–सम्बन्धः तस्माल्लोलम्, प्रथमपरिचये सर्वोऽपि लोलो भवति । पुनः किंलक्षणम् ? 'अप्राप्तिभीतेर्भीरु'

---

१ भजति सति पु० ॥ २ पितृव्यजने 'ताम्यती 'लाभं डे ॥ ३ प्राप्यमाणे सति पु० ॥
४ °तनयया भा० ३-४ ॥ एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥

भयात्मकम्, अप्राप्तेः भीति :—-भयं तस्माद् विह्वलाम् । स इति कः ? 'येन' रामेण 'लीलया' हेलया 'भज्यमानं' द्विधाभवद् ['मदनदमयितुः धनुः'] मदनमथनधनुरुच्चैः शब्देन 'रैणुकेयस्य' रेणुकायाः अपत्यं रैणुकेयः तस्य परशुरामस्य 'आह्वानं' आकारणं चक्रे अकृत इव अभावे लुप्तोत्प्रेक्षा वा । किलशब्दः उत्प्रेक्षायाम् । किम्भूतस्य ? 'परुषरुषः' परुषा—निर्दया रुट्—कोपो यस्य तस्य । अयमर्थः—हे रैणुकेय! शीघ्रमेहि त्वम्, त्वद्गुरोर्महादेवस्य धनुरनेनाभाजि इति आह्वानं विदधदिव चक्रे, कर्त्तरि लिट् । किंलक्षणम्? 'अधिज्यं' अधिकृता ज्या यस्य तत्, अर्थान्तरन्यासश्च—यः किल केनापि ताड्यमानः सन् स्वपक्षपातिने स्वामिने वा कथयन् उच्चैरारटते । उत्तरार्द्धे उत्कण्ठालक्षणो विप्रलम्भः शृङ्गारः । चपलतात्रासयोर्भावयोः सन्धिः भावोदयोऽलङ्कारश्च ॥ २५ ॥

[बालबोधिनी]

येनाधिज्यमिति । 'सः' रामः 'वः' युष्मान् 'अवताद्' रक्षतु । किंलक्षणः? 'जनकतनयया' सीतया 'वीक्षितः' दृष्टः । किंलक्षणया जनकतनयया ? 'अक्षि' चक्षुः 'व्यापारयन्त्या' आन्दोलयन्त्या । किंलक्षणं अक्षि? मन्दाक्षाद् 'मन्दं' अतिनिश्चलम् । पुनः किंलक्षणम्? 'प्रणयपरिचयाद्' अनेकजन्मप्रीत्यभ्यासाद् 'लोलं' चपलम् । पुनः किंलक्षणम्? 'अप्राप्तिभीतेः' रामस्याप्राप्तिभयाद् 'भीरु' भययुक्तम् । स कः ? 'येन' रामेण तद् 'मदनदमयितुः' महादेवस्य 'अधिज्यं' ज्याधिरूढं 'धनुः' चापं 'लीलया' अक्लेशेन 'भज्यमानं' द्वेधा क्रियमाणं सद् 'उच्चैः' महता शब्देन 'किल' सम्भावनायां 'रैणुकेयस्य' परशुरामस्य 'आह्वानं' आकारणं चक्रे । किंलक्षणस्य रैणुकेयस्य? 'परुषरुषः' कठोरस्य ॥ २५ ॥

*

तत्कालोत्तालनेत्रानलतरलशिखाङ्गारितानङ्गमूर्त्ते-
र्देवस्यावेक्ष्य चापं सपदि विदलितं मोदमानो मनोभूः
सीतासंज्ञं स्वकीयं गुणवदिव धनुः प्राबिभर्त्ति स्म यस्मै,
हेम क्षेमान्वितं वः किसलयतु जयश्रीललामं स रामः ॥ २६ ॥[2]

---

१ °त्ताननेत्र° भा० ३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्या विद्यते ॥

२ एतत्काव्यानन्तरं डे १ आदर्शे

भग्ने भूतेशचापे पुलकिनि जनके कौशिके सम्प्रहृष्टे
सव्रीडे राजवृन्दे व्रजति निजनिजं स्थानमप्राप्तकामे ।
मालामाधत्त कण्ठे नरपतिकुमरी कामिनीभिर्वृताङ्गी
सव्रीडालोकरम्यस्मितमधुरमुखी यस्य स स्ताद् विभूत्यै ॥

इदमधिकं काव्यमुपलभ्यते । नेदं काव्यं वृत्तिकृद्भ्यां व्याख्यातमस्तीति प्रक्षिप्तं ज्ञेयम् ।

[हृदयरञ्जनी]

तत्कालोत्तालेति । स रामो 'वः' युष्माकं क्षेमान्वितं 'हेम' सुवर्णं 'किसलयतु' पल्लवयतु वर्द्धयतु । किंलक्षणम्? 'जयश्रीललामं' जयलक्ष्मीरेव ललामं—रत्नं यस्य तत् । [किंलक्षणो रामः? 'यस्मै' रामाय 'मनोभूः' मदनः] सीतासंज्ञं स्वकीयं द्वितीयं वा धनुः 'प्राबिभर्त्ति स' दध्रे । किम्भूतं धनुः? 'गुणवत्' गुणः—ज्याऽस्यास्तीति गुणवत् सगुणम्, सीताऽपि गुणवती । किंलक्षणो मदनः 'मोदमानः' हृष्यन् । मोदे किं कारणं? सपदि 'देवस्य' शम्भोः 'चापं' धनुः दलितं ['अवेक्ष्य'] दृष्ट्वा आलोक्य । किंलक्षणस्य शम्भोः? 'तत्कालोत्तालनेत्रानलतरलशिखाङ्गारितानङ्गमूर्त्तेः' तत्कालः—स चासौ कालश्च तत्कालः तस्मिन् उत्तालः—ऊर्द्ध्वीभूतश्चासौ नेत्रानलश्च—लोचनवह्निः तस्य तरला चासौ या शिखा च—ज्वाला तया अङ्गारिता—अङ्गारमिता प्रापिता सञ्जाता वा अनङ्गमूर्तिः—कामशरीरं येन सः तस्य, ["तदस्य सञ्जातं] तारकादिभ्य इतच्" [पाणि० ५.२.३६] । अयमभिप्रायः—स्वशत्रुभूतस्य देवस्य धनुर्दलितं दृष्ट्वा तत्क्षणमेव मोदमानो [मनोभूः] रामाय उपकारिणे सीतालक्षणं गुणवद् धनुर्ददावित्यर्थः, लोके यथा कश्चन यस्मात् स्वशत्रुतिरस्कारं पश्यति स्वयं मोदमानस्तस्मै उपकरोतीति ध्वनिः, अर्थान्तरन्यासश्च, असङ्गतिरलङ्कारश्च । यथा धनुर्भङ्गलक्षणं कारणं रामे तज्जनितहर्षलक्षणं कार्यं मदने दृश्यते इति । लक्षणं च—

> यत्र कारणमन्यत्र कार्यमन्यत्र ज्ञायते ।
> असङ्गश्चा(त्य)भिधान(नं) तमलङ्कारं विदुर्बुधाः ॥ १ ॥ इति ।

वैदर्भीगौडीययोः साङ्कर्यम् । आरभटीवृत्तिः, वीररसावस्थानसूचकत्वात् शृङ्गारो त्रि(रस्त्रि)गुणीभूतः, हर्षावेगयोः सन्धिः ॥ २६ ॥

[बालबोधिनी]

तत्कालोत्तालेति । 'स रामः' रामचन्द्रः 'वः' युष्माकं जयश्रीललामं जयशोभाचिह्नं 'कुशलयतु' कुशलं करोतु । किंलक्षणम्? 'हेमक्षेमान्वितं' समृद्धिकल्याणान्वितम् । स कः? 'यस्मै' रामाय अर्थे 'मनोभूः' कामः 'मोदमानः' हर्षमाणः सन् 'सीतासंज्ञं' सीतानामकं स्वकीयं धनुश्चापमिव 'प्राबिभर्त्ति स्म' धृतवान् । किंलक्षणं धनुः? 'गुणवत्' प्रत्यञ्चावत् । स कामः किं कृत्वा? 'सपदि' तत्कालं 'देवस्य' महादेवस्य 'चापं' धनुः 'विदलितं' भग्नं 'अवेक्ष्य' दृष्ट्वा । किंलक्षणस्य देवस्य? 'तत्कालोत्तालनेत्रानलतरलशिखाङ्गारितानङ्गमूर्त्तेः' तत्क्षणे तृतीयनेत्राग्नेः चपलशिखया ज्वालितकन्दर्पदेहस्य ॥ २६ ॥

*

यं सव्रीडा सनीडावसथपथगतं वीक्षमाणा गवाक्षाद्,
[1]यन्नामाख्यानकेलिं कलयति च किल स्त्रीजने जातमन्युः।
यत्सम्बन्धोत्कबुद्धिः समयमगमयन्मैथिली तं कथञ्चित्,
सानाथ्यं स क्रियाद् वः क्शितशितगलोद्दण्डकोदण्डधामा ॥२७॥

[हृदयरञ्जनी]

यं सव्रीडेति। 'सः' रामो 'वः' युष्माकं 'सानाथ्यं' सनाथस्य भावः सानाथ्यं–सस्वामित्वं 'क्रियाद्' विदध्यात्। किम्भूतः सः? 'क्शितशितगलोद्दण्डकोदण्डधामा' शितं–मेचक[वर्णं]गलं–कण्ठो यस्य सः शितगलः–महादेवस्तस्य उद्दण्डः–प्रचण्डश्चासौ कोदण्डः–स्वचापं तस्य धाम–तेजः, क्शितं–नाशितं शितगलोद्दण्डकोदण्डधाम येन सः क्शितशितगलोद्दण्डकोदण्डधामा। सः कः? 'मैथिली' सीता 'यत्सम्बन्धोत्कबुद्धिः सती' यस्य-रामस्य सम्बन्धः–पाणिग्रहणलक्षणः तत्र उत्का–सोत्कण्ठा बुद्धिः–मतिः यस्याः सा। सीता 'कथञ्चित्' महता कष्टेन 'तं समयं' तत्प्राप्तिसमयं 'अगमयद्' गमयति स्म अतिवाहयाञ्चक्रे। किंलक्षणा सीता? सव्रीडा सती 'गवाक्षाद्' गवाक्षे स्थित्वा रामं 'वीक्षमाणा' पश्यन्ती, ल्यब्लोपे पञ्चमी। किंलक्षणं रामम्? 'सनीडावसथ(पथ)गतं' नीडेन सह वर्त्तमानानि सनीडानि-सवलभीनि यानि आवसथानि–गृहाणि तेषां पन्थाः—मार्गस्तं गतं-प्राप्तम्, राजमार्गं गच्छन्तं यज्ञमण्डपप्रदेशाद् राजगृहं प्रत्यागच्छन्तमित्यर्थः। पुनः किम्भूता? 'जातमन्युः किल' इति अलीककृतकोपा। क्व सति? 'स्त्रीजने' स्त्रीलोके 'यन्नामाख्यानकेलिं' यस्य–रामस्य नाम्नः [आख्यानं–ग्रहणं तद्विषयां] केलिं–क्रीडां वा यन्न(न्ना)म्ना विनोदं 'कलयति सति' 'रामोऽयमायातः, त्वं परिणेष्यसि' इत्यादि वारं वारं नाम गृहीत्वा विनोदमुपहासं कुर्वति सति मिथ्यासञ्जातकोपेत्यर्थः। अनुप्रासः शब्दालङ्कारः। उत्कण्ठा ईर्ष्या चात्र विप्रलम्भशृङ्गारः। व्रीडाऽसूयाचपलतानां भावानां सन्धिः। माधुर्यो गुणः। "सरसार्थपदत्वं यत् तन्माधुर्यमुदाहृतम्" ॥ २७ ॥

[बालबोधिनी]

यं सव्रीडेति। 'सः' रामः 'वः' युष्माकं 'सानाथ्यं' स्वामित्वं 'क्रियात्' करोतु। किंलक्षणः? 'क्शितशितिक(ग)लोद्दण्डकोदण्डधामा' क्शितं महादेवस्य महतो धनुषस्तेजो येन स क्शितशितिक(ग)लोद्दण्डकोदण्डधामा। स कः? 'यत्सम्बन्धोत्कबुद्धिः' यस्य–रामस्य सम्बन्धे उत्कण्ठितमतिः सती 'मैथिली' सीता 'कथञ्चिद्' महता कष्टेन 'तं समयं' तं कालं 'अगमयद्' अक्षिपत्। स कः? किंलक्षणा सा? 'गवाक्षाद्' उच्चोपवेशनप्रदेशविशेषात्

१ यन्नाममाहकेलिं भा० ३-४। एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते॥

'सव्रीडा' सलज्जा सती 'यं' रामं 'वीक्षमाणा' पश्यन्ती वर्त्तते। किंलक्षणं रामम्? 'सनीडावसथपथगतं' समीपगृहमार्गे गतागतं कुर्वाणम्। पुनः स कः? किंलक्षणा च सा? 'च' परं 'यन्नामग्राहकेलिं कलयति' यस्य-रामस्य नाम गृहीत्वा गृहीत्वा क्रीडां विदधति 'स्त्रीजने' सखि(खी)समूहे 'किल' इति मिथ्या 'जातमन्युः' कृतकोपा वर्त्तते ॥ २७ ॥

*

आहूताऽऽयातजन्यक्षितिपकरिघटा[1]सङ्कटोद्यानदेशं,
वैदेहाऽऽदेशबद्धप्रतिगृहसुबृहत्तोरणस्रक्सहस्रम्।
आनन्दस्फीतगीताकुलकुलवनिताभूषणोद्भूतकान्ति,
प्रक्रान्ते यद्विवाहे तिमिनगरमभूदस्तु स श्रेयसे वः ॥ २८ ॥

[हृदयरञ्जनी]

आहूतायातेति। 'सः' रामः 'वः' युष्माकं 'श्रेयसे' कल्याणाय 'अस्तु' भवतु, श्रेयस्कारी भूयादिति सम्बन्धः। सः कः? 'यद्विवाहे' यस्य-रामस्य विवाहे-पाणिग्रहणे 'प्रक्रान्ते' उपक्रान्ते सति 'तिमिनगरं' कर्तृ मिथिलानगरी एवंविधगुणविशिष्टमभूत्। किम्भूतं तिमिनगरम्? 'आहूतेति०' आहूताश्च ते आयाताश्च, जन्याश्च क्षितिपाश्च जन्यक्षितिपाः, आहूतायाताश्च ते जन्यक्षितिपाश्च तेषां करिघटाः-गजसमूहाः ताभिः सङ्कटः-सम्बन्धः सम्मर्दः उद्यानदेशो यस्य तत्, आहूताऽऽकारिताऽऽगतमनुष्यलोकनृपतिगजसमूहनिरुद्धोद्यानप्रदेशम्। पुनः किम्भूतम्? 'वैदेहेति०' वैदेहस्य-जनकस्य आदेशःवैदेहादेशस्तस्माद् बद्धं प्रतिगृहं सुबृहत्तोरणानां-आम्रपल्लवानां स्रक्सहस्रं-मालासहस्रं-यस्मिन्। तेन अपरं किम्भूतम्? आनन्देन-हर्षेण स्फीतानि-मनोहराणि च तानि गीतानि च तेष्वाकुलाः-गानतत्पराः याः कुलवनिताः सुवासिन्यः तासां भूषणानि ता एव भूषणानि तैरुद्भूता-उद्गता कान्तिः-शोभा यस्य तत्। छेकानुप्रासः, आरभटी वृत्तिः, गौडीया रीतिः, ओजो गुणः, वास्तवालङ्कारः स्वभावोक्तिः, लोके विवाहे क्रियमाणे राज्ञा नगरे उत्साहः कार्यत इति ॥ २८ ॥

[बालबोधिनी]

आहूतायातेति। 'सः' रामः 'वः' युष्माकं श्रेयसेऽस्तु। स कः? 'यद्विवाहे' यस्य-रामस्य विवाहे 'प्रक्रान्ते' वर्त्तमाने 'तिमिनगरं' वैदेहपुरं ईदृशं 'अभूद्' जातम्। कीदृशम्? 'आहूतायातजन्यक्षितिपकरिघटासङ्कटोद्यानदेशं' पूर्वं आहूताः-आकारिताः सन्तः आयाताः-आगता ये लोका राजानश्च तेषां हस्तिसमूहैः सङ्कटः वाटिकाप्रदेशो यस्मिन् तत्।

१ सङ्कुलोद्यान° भा० १। सङ्कटोद्यान° भा० २-३-४ ॥

पुनः कीदृक्? 'वैदेहाऽऽदेशबद्धप्रतिगृहसुबृहत्तोरणस्रक्सहस्रं' जनकस्याऽऽज्ञया बद्धानि गृहं गृहं प्रति महान्ति तोरणानां मालानां च सहस्राणि यस्मिन् तत्। पुनः कीदृशम्? 'आनन्दस्फीतगीताकुलकुलवनिताभूषणोद्भूतकान्ति' हर्षेण प्रवृद्धानि तानि च गानानि तैः आकुलाः—व्यग्रा याः कुलवृद्धाः स्त्रियः तासामाभरणैः उत्पन्नकान्तिः ॥ २८ ॥

*

लक्ष्मीमिक्ष्वाकुराजः स च धरणिसुता सा च देयादमेयां,
युष्मभ्यं येन यस्याः करसरसिरुहं ग्राहयित्वा महर्षिः।
ऐक्यं किञ्चित् तथाऽसौ व्यधित किल यथाऽन्योन्यमन्तर्गतस्य,
द्वन्द्वस्योद्दामदैवव्यवहितवपुषोऽप्यस्य नाऽऽसीत् पृथक्त्वम् ॥ २९ ॥

[हृदयरञ्जनी]

लक्ष्मीमिक्ष्वाकुराज इति। 'सः इक्ष्वाकुराजः' रामश्च [सा च] 'धरणिसुता' वैदेही च 'युष्मभ्यं' भवद्भ्यः 'अमेयां' अपरिमितपुष्कलां 'लक्ष्मीं' श्रियं 'देयात्' दद्यात्, प्रार्थनायां लिङ्। स कः? 'महर्षिः' विश्वामित्रः 'येन' रामेण 'यस्याः' सीतायाः 'करसरसिरुहं' करकमलं 'ग्राहयित्वा' चारयित्वा 'तथा' तेन प्रकारेण 'किञ्चिद्' अनिर्वचनीयं निर्वक्तुमशक्यं [ऐक्यं] 'व्यधित' कृतवान् यथाऽस्य 'द्वन्द्वस्य' मिथुनस्य 'अन्योन्यं' परस्परं 'अन्तर्गतस्य' चित्तस्य पृथक्त्वं 'नाऽऽसीद्' नाभूत्, उभयोश्चित्तमैक्यमभजदित्यर्थः। किंलक्षणस्य? 'उद्दामदैवव्यवहितवपुषोऽपि' उद्दामं—उत्कटं यद्दैवं—भागधेयं तेन व्यवहितं—व्यवधानीकृतं वपुः—देहो यस्य स तस्यापि, यद्यप्युभौ स्वशरीरसौभाग्यमदेन मदवन्तौ तथापि रूपादिमात्सर्यपरित्यागेनैकचित्तावभूतामित्यर्थः, अथवा शरीरेण पृथगभूतां न चित्तत इति। अनुप्रासः। रसः शृङ्गारो नुराख्यः भावोदयोऽलङ्कारः ॥ २९ ॥

[बालबोधिनी]

लक्ष्मीति। सः 'इक्ष्वाकुराजः' रामः सा च 'धरणिसुता' सीता च 'युष्मभ्यं' भवद्भ्यः 'अमेयां अपरिमितां 'लक्ष्मीं' श्रियं 'देयाद्' ददातु। स कः? सा च का? 'येन' रामेणासौ 'महर्षिः' वसिष्ठः 'यस्याः' सीतायाः 'करसरसिरुहं' हस्तकमलं 'ग्राहयित्वा' पाणिग्रहणं कारयित्वा किञ्चित् तथा 'ऐक्यं' एकत्वं 'व्यधित' कृतवान् यथा अस्य 'अन्तर्गतस्य' मध्यवर्त्तिनः 'द्वन्द्वस्य' हिरण्मयशरीरद्वयस्य 'उद्दामदैवव्यवहितवपुषोऽपि' उच्छृङ्खलप्राक्तनैः कर्मभिः अन्तर्हितशरीरस्यापि 'किल' इति सत्ये 'अन्योन्यं' परस्परं 'पृथक्त्वं' 'नाऽऽसीद्' न बभूव ॥ २९ ॥

°पुषो यस्य भा० ३-४ ॥

सानन्दं गीयमानः कुलयुवतिजनैर्बन्दिभिः स्तूयमानो,
लोकैरालोक्यमानश्चिरमवतु स वस्ताडकारिस्तदानीम् ।
देव्याः क्षोणिप्रसूतेस्त्रिभुवनविदितं येन पाणिर्गृहीतः,
[1]कामप्रत्यक्षमस्याः कृतकृतकरुषस्त्वाददे पादपद्मम् ॥ ३० ॥

[हृदयरञ्जनी]

सानन्दमिति । सः 'ताडकारिः' रामः 'चिरं' सर्वदा 'वः' युष्मान् 'अवतु' रक्षतु । किंलक्षणः ? 'तदानीं' तस्मिन् समये 'कुलयुवतिजनैः' सुवासिनीभिः 'सानन्दं' सहर्षं 'गीयमानः' गीयते स्म, 'बन्दिभिः' मङ्गलपाठकैः स्तूयमानः, तथा 'लोकैः' तत्र तत्र समेतैः मीलितैः जनैः 'आलोक्यमानः' दृश्यमानः; सानन्दमिति सर्वत्र सम्बन्ध्यम् । तदानीमिति किम् ? यदा 'येन' रामेण त्रिभुवनविदितं यथा भवति तथा 'क्षोणिप्रसूतेः' क्षितिसुतायाः 'देव्याः' सीतायाः पाणिर्गृहीतः । यदा यो रामः सप्तपदीक्रमणसमये 'काम-प्रत्यक्षं' कामेन—अभिलाषेन प्रत्यक्षं यथा स्यात्तथा 'अस्याः' सीतायाः 'पादपद्मं' चरण-कमलमाददे । किम्भूतायाः अस्याः ? 'कृतकृतकरुषः' कृता कृतका—मिथ्या रुट्—कोपो यया तस्याः । उक्तिः—यः कामी भवति स प्रणयकलहान्ताया वल्लभायाः चरणे पतति, तस्याः चरणप्रापणव्याजेन ननामेति उत्प्रेक्षा ॥ ३० ॥

[बालबोधिनी]

सानन्दमिति । सः 'ताडकारिः' रामः 'वः' युष्मान् 'चिरं' चिरकालं 'अवतु' पातु । किंलक्षणः ? 'सानन्दं' सहर्षं यथा भवति तथा 'कुलयुवतिजनैः' स्वकुलवृद्ध-स्त्रीसमूहैः गीयमानः । पुनः किंलक्षणः ? 'बन्दिभिः' स्तावकजनैः स्तूयमानः । पुनः किं-लक्षणः ? 'लोकैः' जनैरालोक्यमानः । स कः ? 'येन' रामेण 'तदानीं' तस्मिन्नवसरे 'त्रिभु-वनविदितं' स्वर्ग-मृत्यु-पातालप्रसिद्धं यथा भवति तथा 'क्षोणिप्रसूतेः देव्याः' सीतायाः 'पाणिः' करो गृहीतः । 'तु' अपरं पुनः 'कामः' कन्दर्पः अस्याः 'कृतकृतकरुषः' मिथ्याकृतकोपायाः सीतायाः 'प्रत्यक्षं' समक्षं यथा भवति तथा 'पादपद्मं' चरणकमलं 'आददे' गृहीतवान् ॥ ३० ॥

*

अन्योन्यालोक[2]लुभ्यन्नयननलिनयोः युग्ममन्यो[3]न्यजल्प-
श्रद्धालुश्रोत्रयोस्तज्जनक-दशरथापत्ययोः पातु युष्मान् ।

---

१ कामः प्र°. भा. ३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥ २ °लुब्धं नयन° भा. ३–४ । एतत्पाठभेदानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥ ३ बालबोधिन्यां अन्योन्यजल्पश्रद्धालु इति पृथक्पदम् ॥

अन्योन्यस्वान्तचौरं स्मरधरणिपतौ स्नेहपाशेन बद्ध्वा,
सज्जीभूते प्रहर्त्तुं यदभवदवनायालमन्योन्यमेव ॥ ३१ ॥

[हृदयरञ्जनी]

अन्योन्यालोकेति । 'जनक-दशरथापत्ययोः' जनकापत्यं सीता दशरथापत्यं रामः तयोर्युग्मं—द्वन्द्वं युष्मान् 'पातु' रक्षतु । किम्भूतयोः ? 'अन्योन्यालोकलुभ्यन्नयन-नलिनयोः' अन्योन्यं—परस्परं आलोकः—दर्शनं तत्र लुभ्यती—लोभं गच्छन्ती चपले लोले नयननलिने—नेत्रकमले ययोस्ते तयोः । पुनः किम्भूतयोः ? 'अन्योन्यजल्पश्रद्धालु-श्रोत्रयोः' अन्योन्यं जल्पः—मिथ्याभाषणं तत्र श्रद्धालुनी—उत्कण्ठिते श्रोत्रे—श्रवणे ययोस्ते तयोः, अन्योन्यभाषणश्रवणे कुतूहलयोः । तदिति किम् ? 'यद्' युग्मं 'अन्योन्यं' परस्परं 'अलं' अत्यर्थं 'अवनाय' रक्षणायाभवत् । क्व सति ? 'स्मरधरणिपतौ' स्मर एव धरणिपतिः—राजा तस्मिन् स्मरधरणिपतौ 'स्नेहपाशेन' स्नेहः—प्रीतिरेव पाशः—रज्जुः तेन अन्योन्यस्वान्तचौरं युग्मं बद्ध्वा प्रहर्त्तुं सज्जीभूते सति । यथा कस्मिंश्चिद् राजनि अन्योन्यस्वान्तचौरं परस्परद्रव्यापहारिणौ पुरुषौ पाशेन बद्ध्वा हन्तुमुद्युक्ते सति तौ यथा आत्मानं 'अवतः' रक्षतः । अत्र संयोग(? सम्भोग)शृङ्गारललनालम्बनोद्दीपनकारणेन रतिः स्थायी भावो जनितः, अन्योन्यदर्शन-संलाप-कटाक्षविक्षेपैः कार्यै अनुभावैः प्रतीतियोग्यः व्रीडा-चपलादिव्यभिचारिभावैरुपचरितः ।

चेष्टा भवति पुष्णार्योर्या रत्युत्थातिरिक्तयोः(?) ।
शृङ्गारो विप्रलम्भश्च ।

तत्राऽऽद्ये यद्यपि परस्परालोकयोर्नान्योन्यभावोपपत्तिरि[ति] चुम्बनाद्यनन्तभेदो भवति, तद्भेदा वक्तुं न शक्यन्ते, अत एव एक इत्युच्यते । ओजो गुणोऽत्र यद्यपि रसप्रतिकूलोऽपि माधुर्यादिगुणसाहचर्यादनुप्रासालङ्कारानुरोधाच्च न विरोधी, अतो गौडीया रीतिः ।

समस्तात्युल्बणपदमोजः कान्तिगुणाङ्कितम् ।
गौडीयामपि गायं चीरीटिविचक्षणः(?) ॥ १ ॥

[ ] ॥ ३१ ॥

[बालबोधिनी]

अन्योन्येति । तद् 'जनक-दशरथापत्ययोर्युग्मं' सीता-रामयुग्मं युष्मान् पातु । किंलक्षणं तत् ? 'यद्' युग्मं 'स्मरधराणिपतौ' कन्दर्परूपे राजनि 'स्नेहपाशेन बद्ध्वा' वात्सल्यरूपेण पाशेन बद्ध्वा 'प्रहर्त्तुं' मारयितुं सज्जीभूते सति 'अन्योन्यं' परस्परमेव

'अवनाय' रक्षणाय 'अलं' समर्थमभवत्। स्मरे धरणिपतित्वं कुतः ? सीता-रामयोः स्मरवशत्वात्। किंलक्षणं युग्मम् ? 'नयननलिनयोः' चक्षुःपद्मयोः 'अन्योन्यालोकलुब्धं' परस्परदर्शने लोभयुक्तम्। पुनः किंलक्षणम् ? 'श्रोत्रयोः' कर्णयोः 'अन्योन्यजल्पश्रद्धालु' परस्परवचने श्रद्धायुक्तम्। पुनः किंलक्षणम् ? 'अन्योन्यस्वान्तचौरं' परस्परं चित्तहारि ॥३१॥

*

वैदेहीवल्लभो वः स भवतु विभवोत्पत्तये यत्प्रियायाः,
सर्वानापृच्छ्य बन्धून् पतिभवनमभि प्रस्थितायास्तदानीम्।
सावश्यायाम्बुलेशं कमलमिव गलद्बाष्पमालोक्य वक्त्रं,
को वा नाऽऽविश्चकार द्रवदिव हृदयं मूर्त्तमश्रुच्छलेन ? ॥ ३२ ॥

[हृदयरञ्जनी]

वैदेहीति। सः 'वैदेहीवल्लभः' सीतारमणः 'वः' युष्माकं 'विभवोत्पत्तये' ऐश्वर्योत्पादनाय भवतु। वैदेहीवल्लभः इति साभिप्रायं विशेषणम्, कथम् ? "अङ्के निषण्ण-सीता यं भजतां कल्पभूह....।" इति अनुमानालङ्कारोऽपि सूचितः। स कः ? तदानीं 'यत्प्रियायाः' यस्य प्रिया—सीता तस्याः 'वक्त्रं' मुखं आलोक्य 'अश्रुच्छलेन' अश्रु-व्याजेन 'मूर्त्तं' मूर्त्तीभूतं 'हृदयं' मनः द्रवदिव वा को न आविश्चकार ?, उत्प्रेक्षते द्रवदिव। किम्भूतं वक्त्रम् ? 'गलद्बाष्पं' गलन्तः बाष्पाः—अश्रूणि यस्मिन् तत्। किमिव वर्त्तमानम् ? कमलमिव। किम्भूतं कमलम् ? 'सावश्यायाम्बुलेशं' अवश्यायः—नीहारः तस्य अम्बु—पानीयं तस्य लेशः—कणः तेन सह वर्त्तते सावश्यायाम्बुलेशम्। कदा यदा किम्भूतायाः यत्प्रियायाः ? 'पतिभवनमभि प्रस्थितायाः' भर्तृगृहमभि चलितायाः। किं कृत्वा ? सर्वान् बन्धून् 'आपृच्छ्य' आमन्त्र्य। असङ्गतिरलङ्कारः। निर्वेदो व्यभिचारी रसीभूतः करुणतामवलम्बते, वास्तवालङ्कारश्च। कन्यायां पतिगृहं प्रस्थितायां बन्धूनां हृदयं द्रवीभवतीति स्वभावः। तथा चोक्तं **कालिदासेन शाकुन्तले—**

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमहो ! स्नेहादरण्यौकसः,
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ॥ इति।

[अङ्क ४ श्लो० ५] ॥ ३२ ॥

[बालबोधिनी]

वैदेहीति । सः 'वैदेहीवल्लभः' रामः 'वः' युष्माकं विभवोत्पत्तये भवतु । विभवस्य–समृद्धेरुत्पत्तिः विभवोत्पत्तिः तस्यै । स कः ? 'यत्प्रियायाः' सीतायाः 'तदानीं' तस्मिन्नवसरे 'वक्त्रं' मुखं 'आलोक्य' दृष्ट्वा 'अश्रुच्छलेन' अश्रुमिषेण कृत्वा मूर्त्तमिव द्रवद् अश्रुद्रवद् हृदयं को वा नाऽऽविश्चकार ? अपि तु सर्वेऽपि आविश्चक्रुरेव । किंलक्षणं वक्त्रम् ? उत्प्रेक्ष्यते 'सावश्यायाम्बुलेशं कमलमिव' नीहारोदककणसहितं पद्ममिव । किंलक्षणम् ? यद् : 'गलद्बाष्पं' गलन्ति–पतन्ति बाष्पाणि–अश्रूणि यस्मात् तद् गलद्बाष्पम् । किंलक्षणायाः सीतायाः ? 'तदानीं' तस्मिन्नवसरे 'सर्वान् बन्धून्' भ्रातृ-सख्यादीन् आपृच्छय 'पतिभवनं' रामगृहं अभि 'प्रस्थितायाः' प्रस्थानं कुर्वन्त्याः । यद्यपि हृदयं मूर्त्तं नास्ति तथापि तस्मिन्नवसरे सर्वेषां जनानां हृदयं मूर्त्तमिव जातं ततोऽश्रूणि द्रवदिव ॥ ३२ ॥

*

एकः पात्राय दत्त्वा श्रियमिव तनयां मन्यमानः कृतार्थं,
स्वात्मानं सिद्धविद्यामिव तनयवधूं प्राप्य भूयो द्वितीयः ।
आप्रष्टुं तौ प्रवृत्तौ कथमपि च मिथो बद्धसर्वस्वबुद्धी,
यत्रैकत्रैकलोकं पृथुगुणसुभगौ स्तान्मुदे वः स देवः ॥ ३३ ॥

[हृदयरञ्जनी]

एकः पात्रायेति । 'सः' रामाख्यो देवः 'वः' युष्माकं 'मुदे' हर्षाय 'स्ताद्' भूयात् । स्तादिति कः ? 'यत्र' यस्मिन् रामे एकत्रैकलोकं यथा भवति तथा, एकत्र–एकस्मिन् रामे एकमुखो लोकः–जनो यस्मिन् कर्मणि तद् एकत्रैकलोकं 'तौ' जनक-दशरथौ बद्धसर्वस्वबुद्धी अभूताम्, बद्धा सर्वस्वबुद्धिर्याभ्यां तौ । किम्भूतौ ? 'पृथुगुणसुभगौ' पृथवश्च ते गुणाश्च तैः सुभगौ, महद्गुणयुक्तावित्यर्थः । पुनः किम्भूतौ ? 'मिथः' अन्योन्यं 'कथमपि' महता कष्टेन गन्तुं आप्रष्टुं प्रवृत्तौ, स्वं स्वं नगरं प्रति गन्तुमापृच्छ्यमानौ । तौ कौ ? तयोर्द्वयोर्मध्ये 'एकः' जनकः 'स्वं' आत्मानं कृतार्थं मन्यमानः । किं कृत्वा ? 'पात्राय' रामाय 'तनयां' सीतां पुत्रीं दत्त्वा । कामिव ? श्रियमिव । 'द्वितीयः' दशरथः 'तनयवधूं प्राप्य' स्नुषां प्राप्य आत्मानं कृतार्थं मन्यमानः सिद्धविद्यामिव, यथा कोंचन पात्रे उक्तलक्षणे लक्ष्मीं निक्षिप्य सिद्धविद्यां च लब्ध्वा कृतकृत्यौ भवतः तद्वदित्यर्थः । उपमा ॥ ३३ ॥

---

१ °कत्रैव लोकम्पृणगुण° एतत्पाठानुसारेण बालबोधिन्यां व्याख्याऽस्ति ॥

[बालबोधिनी]

एकः पात्रायेति । 'स देवः' रामः 'वः' युष्माकं 'मुदे' हर्षाय 'स्ताद्' अस्तु । स कः ? 'तौ' जनक-दशरथौ यत्र 'एकत्रैव' रामे बद्धसर्वस्वबुद्धी सन्तौ 'कथमपि' महता कष्टेनापि 'मिथः' परस्परं आप्रष्टुं तौ 'प्रवृत्तौ' कृतोद्यमौ जातौ । बद्धा सर्वस्व-बुद्धिर्याभ्यां रामे तौ बद्धसर्वस्वबुद्धी । किंलक्षणे यत्र ? 'लोकम्पृणगुणसुभगे' लोकान् पृणन्ति–पूरयन्तीति लोकम्पृणाः, ते च ते गुणाश्च तैः सुभगः–सुन्दरः तस्मिन् लोकम्पृणगुण-सुभगे । किंलक्षणौ तौ ? तयोर्मध्ये 'एकः' राजा जनकः 'पात्राय' रामाय 'तनयां' सीतां दत्त्वा स्वात्मानं 'कृतार्थं' कृतकार्यं मन्यमानः । कामिव ? 'श्रियमिव' यथा कश्चित् पुमान् पात्राय श्रियं दत्त्वा स्वात्मानं कृतार्थं मन्यते । 'द्वितीयः भूयः' दशरथश्च तनयवधूं प्राप्य स्वात्मानं कृतार्थं मन्यमानः । कामिव ? 'सिद्धविद्यामिव' यथा कश्चित् पुमान् सिद्धां–सिद्धिप्रदां विद्यां प्राप्य स्वात्मानं कृतार्थं मन्यते ॥ ३३ ॥

*

तैर्ज्ञातैर्दुर्निमित्तैर्मखमथनधनुर्भङ्गतुङ्गीकृतभ्रू-
भङ्गेऽभ्यायाति भास्वत्तरपरशुशिखाजागृवौ जामदग्न्ये ।
मुख्यो वैखानसानामयमिति समिति क्षुण्णराजान्वयश्चे-
त्यासीद् यस्तद्दिदृक्षारसरसिकमतिः पातु स श्रीपतिर्वः ॥ ३४ ॥

[हृदयरञ्जनी]

तैर्ज्ञातैरिति । स श्रीपतिः 'वः' युष्मान् पातु । स इति कः ? 'यः' रामः 'इति' हेतोः 'तद्दिदृक्षारसरसिकमतिरासीत्' तस्य दिदृक्षा तस्याः रसः तेन रसिका–रस-वती मतिः–बुद्धिर्यस्य सः परशुरामदर्शनोत्सुकमतिः । इतीति किम् ? 'अयं' परशुरामः 'वैखानसानां' वानप्रस्थानां 'मुख्यः' आद्यः श्रेष्ठः, अपरं जामदग्न्यः 'समिति' सङ्ग्रामे 'क्षुण्णराजान्वयः' क्षुण्णः–परास्तः राजान्वयः–क्षत्रियवंशो येन सः, अत एव तदीक्षण-रसिकः, निर्वेदोत्साहवर्द्धितयोः शान्त-वीररसयोरुदयः । क्व सति ? 'तैः' प्रसिद्धैः 'ज्ञातैः' अवगतैः 'दुर्निमित्तैः' दिग्दाह-प्रचण्डप्रतिकूलमारुत-शृगालशब्दादिभिः शकुनैः सह 'जाम-दग्न्ये' परशुरामे अभ्यायाति सति, सहोक्तिरलङ्कारः । जमदग्नेरपत्यं जामदग्न्यः तस्मिन् परशुरामे, परशुना–कुठारेण उपलक्षितो रामः परशुरामः तस्मिन् अभिमुखमागच्छति सति । किम्भूते जामदग्न्ये ? 'मखमथनधनुर्भङ्गतुङ्गीकृतभ्रूभङ्गे' मखमथनस्य–श्रीमहादेवस्य धनुः–कार्मुकं तस्य भङ्गः तेन तुङ्गीकृतः–ऊर्ध्वीकृतः ललाटं प्रापितः भ्रूभङ्गः–भ्रूरचना येन स

तस्मिन्। पुनः किम्भूते जामदग्न्ये ? 'भास्वत्तरपरशुशिखाजागृवौ' अतिशयेन भास्वन्ती भास्वत्तरा, सा चासौ परशुशिखा च-कुठारधारा तस्यां जागृविः-जागरूकः तस्मिन् ॥ ३४ ॥

[बालबोधिनी]

तैर्ज्ञातैरिति। सः 'श्रीपतिः' रामः 'वः' युष्मान् पातु। स कः ? यो रामः 'इति' कारणाद् 'जामदग्न्ये' परशुरामे तद्दिदृक्षारसरसिकमतिः 'आसीद्' बभूव। तस्य-परशुरामस्य द्रष्टुमिच्छायां योऽयं रसस्तस्मिन् रसवती मतिः-बुद्धिर्यस्यासौ। इतीति किम् ? 'अयं' परशुरामः 'वैखानसानां मुख्यः' ऋषीणां अग्रणीः, 'च' अपरं 'समिति' सङ्ग्रामे 'क्षुण्णराजान्वयः' चूर्णीकृतक्षत्रियवंशः। किंलक्षणे जामदग्न्ये ? तैर्ज्ञातैरपि 'दुर्निमित्तैः' दुष्टकारणैः 'अभ्यायाति' अभ्यागच्छति। पुनः किंलक्षणः ? 'मखमथनधनुर्भङ्गतुङ्गीकृतभ्रूभङ्गे' महादेवस्य चापभङ्गेन दीर्घीकृतवक्राक्षे। पुनः किंलक्षणे ? 'भास्वत्तरपरशुशिखाजागृवौ' दीप्तिमती या कुठारधारा तस्यां जागरूके ॥ ३४ ॥

*

सावज्ञस्तत्र राज्ञि प्रणमति पुरतः [१]सर्वपात्रे वसिष्ठे,
तिष्ठत्यक्षिप्तचक्षुः कुशलयति जने साञ्जलौ बद्धमौनः।
भङ्क्त्वा भूतेशचापं क्व गत इति रुषा भाषमाणो महर्षिः,
काकुत्स्थेनोप[२]तस्थे स्मितमधुरमुखं येन सोऽव्याच्चिरं वः ॥ ३५ ॥

[हृदयरञ्जनी]

सावज्ञस्तत्रेति। सः 'वः' युष्मान् 'अव्याद्' रक्षतु। स कः ? येन 'काकुत्स्थेन' रामेण 'स्मितमधुरमुखं' स्मितेन-हासेन मधुरं-मनोज्ञं मुखं यस्मिन् कर्मणि तत्। 'महर्षिः' जामदग्न्यः 'उपतस्थे' प्राप्तः। कर्मणि लकारः। किम्भूतो महर्षिः ? 'इति रुषा भाषमाणः' 'इति' वक्ष्यमाणप्रकारेण 'रुषा' कोपेन 'भाषमाणः' वदन्निति। किम् ? हे राम ! भूतेशचापं भङ्क्त्वा 'क्व गतः' कं प्रदेशं गतोऽसि ? इति, पलाय्येति शेषः, क्व गच्छसि वा ?। पुनः किंलक्षणो महर्षिः ? 'तत्र राज्ञि' दशरथे 'प्रणमति सति' नमस्कारं कुर्वति सति 'सावज्ञः' अवज्ञया सह वर्त्तते सावज्ञः, अथवा प्रणमति दशरथे सावज्ञः तमपश्यदित्यर्थः। पुनः किंलक्षणः ? 'सर्वपात्रे' सर्वेषां-राज-ब्रह्मर्षीणां पात्रे-पूज्ये 'पुरतः' अग्रे तिष्ठति वसिष्ठे 'अक्षिप्तचक्षुः' न क्षिप्तं चक्षुः-नेत्रं येन सः अक्षिप्तचक्षुः। वसिष्ठ-

१ सार्घपात्रे भा. १.२.३.४.। एतत्पाठभेदानुसारेण बालबोधिन्यां व्याख्याऽस्ति ॥
२ °पविष्टे स्मित° भा. ३ ॥

विशेषणद्वयमपि पूज्यत्वाव्यवधानसूचकम् । पुनः किंलक्षणः ? [? 'जने'] मन्त्रिलोके अमात्यवर्गे **सुमन्त्र**प्रभृत्यमात्यजने 'बद्धमौनः' बद्धं मौनं येन स बद्धमौनः । किम्भूते मन्त्रिजने 'साञ्जलौ' अञ्जलिसहिते सादरनमस्कारपरे । पुनः किंलक्षणे ? 'कुशलयति' कुशलं पृच्छति । रामे धृतेर्भावस्योदयः, इतरेषु विषाद-त्रास-जडतादीनां भावानामुदयः । जामदग्न्यगतभयानकरसप्रतीतिः रामगतवीररसप्रतीतिः । वैदर्भी रीतिः ॥ ३५ ॥

[बालबोधिनी]

सावज्ञ इति । स रामः 'वः' युष्मान् 'चिरं' चिरकालं 'अव्याद्' रक्षतात् । स कः ? येन 'काकुत्स्थेन' रामेण 'महर्षिः' परशुरामः स्मितमधुरमुखं यथा भवति तथा 'उपतस्थे' उपस्थितम् । सस्मितं-ईषद्धास्ययुतं अत एव मनोहरं वक्त्रम् । किंलक्षणो महर्षिः ? 'रुषा' कोपेन कृत्वा इति भाषमाणः । इतीति किम् ? 'भूतेशचापं' ईश्वरधनुः 'भङ्क्त्वा' चूर्णीकृत्य 'क्व गतः?' कुत्र गतः? । पुनः किंलक्षणः ? 'पुरतः' अग्रतः 'प्रणमति' नमस्कुर्वति राज्ञि दशरथे 'सावज्ञः' अवगणनासहितः । पुनः किंलक्षणः ? 'सार्घपात्रे' सार्घे वसिष्ठे 'तिष्ठति' स्थिते अक्षिप्तचक्षुः, पुरःस्थितमपि वसिष्ठं न पश्यतीत्यर्थः । पुनः किंलक्षणः ? 'कुशलयति' कुशलं-कल्याणं आचक्ष्याने 'जने' लोके 'साञ्जलौ' अञ्जलिसहिते बद्धमौनः "तत् करोति तदाचष्टे" [पाणिनिवार्त्तिकम्] इति णिच् । लोकाः कुशलं आचक्षते 'स्वामिन् ! कुशलम्' इति तत्र वदति ॥ ३५ ॥

*

देवो यः शस्त्रविद्याभ्यसनभुवि मया स्कन्दमास्कन्द्यमानं,
दृष्ट्वा स्वामिद्रुहोऽपि व्यधित मम समं हैमवत्या प्रसादम् ।
श्रुत्वा तस्यापि चापक्षयमहमनहङ्कारितारिर्विपद्ये,
नाद्यापीति ब्रुवाणं मुनिमभि विमनीभावशून्यः स वोऽव्यात्
॥ ३६ ॥

[हृदयरञ्जनी]

देवो यः शस्त्रविद्येति । 'सः' रामो 'वः' युष्मान् 'अव्यात्' पातु । किम्भूतः ? मुनिं 'अभि' लक्षीकृत्य तदुद्दिश्य 'विमनीभावशून्यः' अविमनाः विमनाः सम्पद्यते विमनीभावः, तेन शून्यः-रहितः दुर्मनस्त्वरहितः, निर्भयत्वं व्यङ्ग्यम् । किंलक्षणं मुनिम् ? 'इति ब्रुवाणं' 'इति' अमुना प्रकारेण कथयन्तम् । इतीति किम् ? 'तस्यापि' महेशस्यापि 'चापक्षयं' धनुर्भङ्गं 'श्रुत्वा' आकर्ण्य येन रामेण 'अहं' जामदग्न्यः

---

१ मनु वि° भा १-२-३-४ । एतत्पाठानुसारेण बालबोधिनीव्याख्या ॥

अद्यापि 'अनहङ्कारितारिः' अहङ्कारः—अभिमानोऽस्यास्तीति अहङ्कारी तस्य भावः तत्ता अहङ्कारितागुणः, न विद्यते अहङ्कारिता यस्य सः अनहङ्कारितः, स चासावरिश्च अनहङ्कारितारिः। अथवा अहङ्कारः सञ्जातः अहङ्कारितः, स चासौ अरिश्च अहङ्कारितारिः, न अहङ्कारितारिः अनहङ्कारितारिः [न विपद्ये], अजाताहङ्कारं मां जानातीत्ययं राम इत्यर्थः। धनुर्भङ्गे जामदग्न्यस्य अहङ्कारः किं कारणं तत् प्रतिपादयितुं देवस्य सहिष्णुं दर्शयति। तस्येति कः? 'यो देवः' महेशः स्वामिद्रुहो मम प्रसादं 'व्यधित' चक्रे। कया सह? 'समं हैमवत्या' देव्या पार्वत्या सह, न केवलं महेशः 'प्रसादं' कृपां चक्रे किन्तु जगज्जनन्यपि पार्वती चक्रे इति वाक्यार्थः। किं कृत्वा? दृष्ट्वाऽपि, कम्? 'कुमारं' स्कन्दं दृष्ट्वाऽपि। किंलक्षणं स्कन्दम्? 'शस्त्रविद्याभ्यसनभुवि' शस्त्राभ्यासभूमिकायां 'मया' परशुरामेण 'स्कन्द्यमानं' पराभूयमानं निर्जितं दृष्ट्वाऽपि ममोपरि प्रसादमेव कृतवान्, न कोपमित्यर्थः, मम वीर्यातिशयेन हृष्ट इत्यर्थः। पराक्रमेण ईशपुत्रादधिकोऽहमिति व्यङ्ग्यम्। स्मृत्यसूययोर्व्यभिचारिभावयोः सन्धिः। वीररसस्योदयः॥ ३६ ॥

[बालबोधिनी]

देवो यः शस्त्रविद्येति। 'सः' रामः 'वः' युष्मान् 'अव्याद्' रक्षतात्। स कः? यो रामः इति 'ब्रुवाणं' वदन्तं 'मुनिमनु' परशुरामे 'विमनीभावशून्यः अभूद्' दुष्टचित्तत्वरहितो बभूव। इतीति किं ब्रुवाणम्? अहं 'तस्यापि' देवस्य 'चापक्षयं' धनुर्भङ्गं 'श्रुत्वा' आश्चर्यं अद्यापि 'न विपद्ये' अद्यापि जीवन्नस्मि, विपत्तिं न प्राप्नोमि। किंलक्षणोऽहम्? 'अनहङ्कारितारिः' अहङ्कारं त्याजिता रिपवः येन सः। असौ कः? तस्य कस्य? यः 'देवः' महादेवः 'शस्त्रविद्याभ्यसनभुवि' धनुर्विद्याभ्यासपृथिव्यां 'मया' परशुरामेण 'स्कन्दं' कार्त्तिकेयं 'आस्कन्द्यमानं' आक्रुष्यमाणं दृष्ट्वा 'स्वामिद्रुहोऽपि' गुरुद्रोहिणोऽपि मम 'हैमवत्या' पार्वत्या समं 'प्रसादं' स्तुतिं 'व्यधित' अकृत॥ ३६ ॥

*

यस्मिन्नुत्तुङ्गशृङ्गे श्रयति शिखरिणः पश्चिमस्य प्रतिष्ठां,
न [1]प्राप क्षिप्रमस्तं न दशशतकरः कार्त्तवीर्योऽयमेव।
कल्पान्तोद[2]श्वदर्चिःकवचितहुतभुक्कल्परूपाय तस्मै,
धीरो नीरोष-भीतिर्मुनिरिति नतवान् यः स दुःखं धुनाद् वः ॥३७॥

---

१ प्राप्तः क्षिप्र° भा ३-४। एतत्पाठभेदानुसारेण बालबोधिनी व्याख्या वर्त्तते। प्राप्त क्षिप्र° भा १-२॥ २ दन्तदर्चिः भा ३-४। एतत्पाठभेदानुसारेण बालबोधिनीप्रत्यन्तरे व्याख्या वर्त्तते॥

[हृदयरञ्जनी]

यस्मिन्नुत्तुङ्गेति । सः 'वः दुःखं द्यतात्' युष्माकं दुःखं खण्डयतु । स कः ? 'यः' रामः 'तस्मै' जामदग्न्याय अयं 'मुनिरिति' "क्षत्रियाणां मुनिर्वन्द्यः" इति मत्वा 'नतवान्' नमश्चकार। किम्भूतः रामः ? 'धीरः' धीरोदात्तत्वात् । पुनः कीदृशः ? 'नीरोष-भीतिः' रोषश्च भीतिश्च रोष-भीत्यौ, निर्गते रोष-भीत्यौ—कोप-भये यस्मात् स नीरोषभीतिः, गाम्भीर्यं व्यङ्ग्यम् । किंविधाय मुनये ? 'कल्पान्तेति०' कल्पान्ते—कल्पक्षये उदञ्चन्ति यानि अर्चींषि—ज्वालाः तैः कवचितः—जटिलो व्याप्तः य ईषदसमाप्तो हुतभुग् हुतभुक्कल्पं रूपं यस्य स तस्मै कल्पान्तोदञ्चदर्चिःकवचितहुतभुक्कल्परूपाय । आत्मनो वीर्यशृङ्गं प्रकटयन्नाह—'कार्त्तवीर्यः' राजा सहस्रार्जुनः पश्चिमस्य 'शिखरिणः' पर्वतस्य उत्तुङ्गशृङ्गे 'प्रतिष्ठां' अवस्थानं न लेभे [इति न], भूर्लोके वा अवस्थानं नाऽऽप, सूर्यः [क्षिप्रं] अस्ताचलं प्राप्तं भार्गवं दृष्ट्वा, अस्तं गतवानित्यर्थः। सूर्योऽपि 'दशशतकरः' [सहस्र]किरणः। उपमा, शब्दश्लोकोऽपि (? श्लेषोऽपि), छेकानुप्रासः ॥ ३७ ॥

[बालबोधिनी]

यस्मिन्नुत्तुङ्गेति । 'सः' रामः 'वः' युष्माकं 'दुःखं' अनिष्टं 'द्यतात्' अवखण्डयतु। स कः ? यो रामः 'तस्मै' परशुरामाय अयं 'मुनिः' ऋषीश्वरो वन्द्यः 'इति' कारणाद् 'नतवान्' नम्रोऽभूत्, न भीत्या । किंलक्षणो रामः? 'नीरोष-भीतिः' क्रोध-भयरहितः । किंलक्षणाय तस्मै ? 'कल्पान्तोद[1]ञ्चदर्चिःकवचितहुतभुक्कल्परूपाय' जगतोऽन्ते ऊर्ध्वा याः शिखास्ता एव सन्नाहीकृता येन अग्निना असौ कल्पान्तोद[2]ञ्चदर्चिःकवचितहुतभुक्, तस्य कल्पं—तत्समानं रूपं—स्वरूपं यस्यासौ तस्मै। तस्मै कस्मै ? यस्मिन् 'उत्तुङ्गशृङ्गे' उच्चैस्तरस्कन्धे परशुरामे 'कार्त्तवीर्यः' राजा सहस्रार्जुनः 'क्षिप्रं' वेगेन 'अस्तं' क्षयं न प्राप्त इति न, किन्तु प्राप्त एव। किंलक्षणे यस्मिन् ? 'पश्चिमस्य शिखरिणः' अस्ताचलस्य 'प्रतिष्ठां' उपमां 'श्रयति' आश्रयति । क इव ? 'अर्यमा इव' यथा अर्यमा सूर्यः पश्चिमे शिखरिणि क्षिप्रमस्तं न प्राप्नोतीति न, किन्तु प्राप्नोत्येव । अर्थवशाद् विभक्तिविपरिणामः, अत्र यद्यपि षष्ठी तथापि सप्तमी व्याख्यायते । किंलक्षणोऽर्यमा कार्त्तवीर्यश्च ? 'दशशतकरः' सहस्रांशुः एकः सहस्रबाहुरपरः । किंलक्षणे पश्चिमे शिखरिणि ? 'उत्तुङ्गशृङ्गे' उच्चैस्तरशिखरे ॥ ३७ ॥

*

शस्त्रं शम्भोर्विभिद्य व्रणिततनु घुणश्रेणिभिः क्षत्रशाव !,
क्षीबो मा भूस्तदेतन्नमय[3] ननु धनुर्वैष्णवं चेत् त्वमु[4]ष्णः ।

१-२ °दन्तद° भा ३-४ ॥ ३ °य मम धनु° भा १ ॥ ४ °मुग्रः भा १ ॥

इत्युक्त्वा भार्गवेण प्रकटभ्रकुटिना प्रत्तमादाय चक्रे,
तन्नीचैर्यस्तदीयं मदमिव स मुदामास्पदं वः करोतु ॥ ३८ ॥

[हृदयरञ्जनी]

शस्त्रमिति। 'सः' रामो 'वः' युष्मान् 'मुदां' आनन्दानां 'आस्पदं' स्थानं करोतु। यो रामः 'तत् तदीयं' परशुरामसम्बन्धि धनुः 'नीचैश्चक्रे' नम्रं चक्रे, नमयति स्मेति। किं कृत्वा? 'आदाय' गृहीत्वा। किंलक्षणं धनुः? भार्गवेण इति उक्त्वा 'प्रत्तं' दत्तम्। किंलक्षणेन भार्गवेण? 'प्रकटभ्रकुटिना' प्रकटा भ्रकुटिः—ललाटरेखा यस्य स प्रकटभ्रकुटिः तेन। किमुक्त्वा? इत्याह—'हे! क्षत्रशाव!' क्षत्रियपोतडिम्भ! 'क्षीबो मा भूः' मत्तः सगर्वो मा भव। किं कृत्वा? शम्भोः 'शस्त्रं' धनुः 'विभिद्य' भङ्क्त्वा। किंलक्षणं धनुः? 'घुणश्रेणिभिः' काष्ठकीटपङ्क्तिभिः 'व्रणिततनु' व्रणं सञ्जातमस्य, व्रणिता तनुर्यस्य, कीटकैर्भक्षितत्वान्निःसारमित्यर्थः, घुणोत्कीर्णमिति। 'वा' अथवा चेत् त्वं 'उष्णः' सगर्वोऽसि, महेशधनुर्भङ्गेन जातगर्वोऽसि चेत् तर्हि एतद् 'वैष्णवं धनुर्नमय' नारायणीयं धनुरधिज्यं कुरुष्वेति। किमिव नीचैश्चकार? 'तदीयं मदमिव' परशुरामस्य 'मदमिव' गर्वमिव [न केवलं] धनुर्नीचं चक्रे किन्तु मदमपि चक्रे। उत्प्रेक्षालङ्कारः, धनुषा समं तस्य परशुरामस्य मदमपीति सम्भवत्सदुक्त्यलङ्कारः। अनुप्रासः ॥ ३८ ॥

[बालबोधिनी]

शस्त्रं शम्भोर्विभिद्येति। 'सः' रामः 'वः' युष्मान् 'मुदां' हर्षाणां 'आस्पदं' स्थानं करोतु। स कः? 'यः' रामः तद् वैष्णवं 'धनुः' चापं 'आदाय' गृहीत्वा 'नीचैः' नम्रं ज्याधिरूढं 'चक्रे' कृतवान्। किंलक्षणं धनुः? उत्प्रेक्ष्यते—'तदीयं मदमिव' तस्य-परशुरामस्य सारमिव। पुनः किंलक्षणं तत्? 'भार्गवेण' परशुरामेण 'इत्युक्त्वा' इति कथयित्वा 'प्रत्तं' दत्तम्। किंलक्षणेन भार्गवेण? 'प्रकटभ्रकुटिना' प्रसिद्धवक्राक्षेण। इतीति किम्? 'क्षत्रशाव!' हे क्षत्रशिशो राम! 'शम्भोः' ईश्वरस्य 'शस्त्रं' धनुः 'विभिद्य' भङ्क्त्वा 'क्षीबः' मत्तो 'मा भूः' मा भव, "माङि लुङ्" [पाणिनि० ३-३-१७५] इति माङ्योगे लुङ्विधानात्। कीदृशं शस्त्रम्? 'घुणश्रेणिभिः' काष्ठकीटपङ्क्तिभिः 'व्रणिततनु' सच्छिद्रशरीरम्। 'चेद्' यदि त्वं उष्णस्तर्हि 'एतद्' इदं 'वैष्णवं धनुः' विष्णोर्धनुः 'नमय' नम्रं कुरु ॥ ३८ ॥

*

रामः श्यामद्युतिर्वो नव इव जलदः सम्मदायास्तु यस्मिन्,
विभ्राणे[2] जिष्णुचापं प्रशमयति सतामप्रियं चामृतेन[3]।

---

१ °माश्रयं वः भा १॥ २ °णे राजसौधं प्र° भा १॥ ३ सूनृतेन भा ३-४। एतत्पाठभेदानुसारेण बालबोधिन्यां व्याख्याऽस्ति॥

ग्रीष्मेणेव प्रयातं भृगुकुलपतिना केकिनेव प्रहृष्टं,
तातेनोर्वीध्रवेनोच्छ्वसितमचलयेवाचलोत्पन्नया च ॥ ३९ ॥

[हृदयरञ्जनी]

रामः श्यामद्युतिरिति। रामः 'वः' युष्माकं 'सम्मदाय' हर्षायास्तु प्रीतये भूयात्। किंलक्षणः ? 'नवः' तरुणः किम्भूतः ? श्यामद्युतिः श्यामा द्युतिः—कान्तिर्यस्य स श्यामद्युतिः सजलजलदकान्तिः। क इव नवः ? 'जलद इव' मेघ इव। 'भृगुकुल-पतिना' भार्गवेण 'प्रयातं' निर्गतम्। केनेव ? 'ग्रीष्मेणेव' ऊष्मागमेनेव ग्रीष्मेण यथा गम्यते। क्व सति ? 'यस्मिन्' रामे 'जिष्णुचापं' जिष्णोः—नारायणस्य चापं 'बिभ्राणे सति' धृते सति ग्रीष्मेण गम्यते तथा। का उपमा ? तथा 'ऊर्वीधवेन' भूभृता 'तातेन' दशरथेन 'हृष्टं' मुदितम्। केनेव ? 'केकिनेव' मयूरेणेव, यथा मयूरेण हृष्यते। क्व सतीति पूर्ववत्। 'अचलोत्पन्नया' सीतया 'उच्छ्वसितं' रोमाञ्चितम्, अचला—पृथ्वी तस्या उत्पन्ना तया। कयेव ? 'अचलयेव' भूम्येव, यथा भूम्या उच्छ्वस्यते, न चलतीति अचला, "अचला स्थिरा धरित्री" इत्यमरः[2]। क्व सतीति पूर्ववत्। किंलक्षणे रामे ? 'अमृतेन' अमृततुल्येन दर्शनेन वचनेन वा 'सतां' सत्पुरुषाणां 'अप्रियं' अविनयं 'शमयति' पराकुर्वति। किंलक्षणे मेघे ? 'अमृतेन' उदकेन 'सतां' लोकानां 'अप्रियं' अनावृष्टि-लक्षणं शमयति, तस्मिन्निति। क्व सतीति पूर्ववत्। मालोपमा ॥ ३९ ॥

[बालबोधिनी]

रामः श्यामेति। स रामः 'वः' युष्माकं 'सम्मदाय' हर्षाय 'अस्तु' भवतु। स कः ? 'यस्मिन्' रामे 'सूनृतेन' सत्यप्रियेण वचसा कृत्वा सतां 'अप्रियं' अनिष्टं प्रशमयति। 'जिष्णुचापं' विष्णुधनुर्बिभ्राणे सति 'भृगुकुलपतिना' परशुरामेण 'प्रयातं' गतम्। कीदृशो रामः ? 'नवो जलद इव' प्रावृषेण्यो मेघ इव। कीदृशो रामो मेघश्च ? 'श्यामद्युतिः' श्यामा–कृष्णा द्युतिः–कान्तिर्यस्य स श्यामद्युतिः। कस्मिन् केनेव ? यथा नवे जलदे 'जिष्णुचापं' इन्द्रधनुर्बिभ्राणे 'अमृतेन' उदकेन कृत्वा सतां 'अप्रियं' देहतापं प्रशमयति सति ग्रीष्मेण प्रयायते तदा **"अप्रियं चामृतेन"** इति पाठः। अपरं रामे जिष्णुचापं बिभ्राणे सति 'उर्वीधवेन' राज्ञा 'तातेन' पित्रा दशरथेन प्रहृष्टम्। केनेव ? केकिनेव, यथा नवे जलदे जिष्णुचापं बिभ्राणे सति 'केकिना' मयूरेण प्रहृष्यते। अपरं यस्मिन् रामे जिष्णुचापं बिभ्राणे सति 'अचलोत्पन्नया' सीतया उच्छ्वसितम्। कयेव ? अचलयेव,

---

१ °धनेनो° इसि पाठानुसारेण बालबोधिन्यां व्याख्या दृश्यते ॥ २ इदं कोशावतरणं अमरकोशे नोपलभ्यते ॥

यथा नवे जलदे जिष्णुचापं बिभ्राणे सति अचलयोच्छ्वस्यते। अत्र सर्वत्र भावे प्रत्ययाः "तयोरेव कृत्यक्तखलर्थाः" [पाणिनि० ३-४-७०] इत्येतयोरेव क्तविधानाद् अनुक्तकर्तृत्वात् अनभिहिते कर्त्तरि "कर्तृकरणयोः" [पाणिनि० २-३-१८] इति तृतीयेति ॥ ३९ ॥

*

पत्नीं पश्यन् नवोढां तरुणिमनि नवे वर्त्तमानः प्रभावं,
पुष्णन् दोष्णोर्नवं[1] च प्रणयमपि[2] नवं दर्शयन्नाश्रितेषु ।
प्रक्रान्तः काननान्तर्गतिकृतमतिना भूमिभर्त्ता नवो यः,
कर्त्तुं पित्रा पुराणः स्वयमथ च पुमान् स क्षणाद्[3] वः[4] पृणातु ॥ ४० ॥

[हृदयरञ्जनी]

पत्नीं पश्यन्निति। 'सः' रामः 'वः' युष्मान् 'क्षणात्' तत्क्षणात् 'पृणातु' प्रीणयतु, वितृष्णान् करोत्वित्यर्थः। किंलक्षणो रामः ? 'नवोढां' नवपरिणीतां 'पत्नीं' जानकीं सीतां पश्यन्। पुनः किंलक्षणः ? नवे 'तरुणिमनि' तारुण्ये 'वर्त्तमानः' तिष्ठ-[न्नि]ति। तथा किं कुर्वन् ? 'दोष्णोः' भुजयोर्नवं 'प्रभावं' सामर्थ्यं 'पुष्णन्' प्रकटयन्। तथा च आश्रितेषु जनेषु नवं 'प्रणयं' स्नेहं दर्शयन्। पुनः किंलक्षणः ? 'पित्रा' दशरथेन नवो भूमिभर्त्ता यो रामः कर्त्तुं प्रक्रान्तः, यं रामं भूभर्त्तारं कर्त्तुमिच्छ-तेत्यर्थः। किंलक्षणेन पित्रा ? काननान्तर्गतिकृतमतिना काननस्य—अरण्यस्य अन्तः—मध्यं तत्र गतिः—गमनं तत्र कृता मतिः—बुद्धिर्येन सः तेन। अथ यः स्वयं च 'पुराणः पुमान्' पुराणपुरुषः, यः पुराणः पुरुषः स कथं नवः क्रियते ? इति विरोधः। **दीपकमलङ्कारः।** यथा—

यत्रैकमनेकेषां वाक्यार्थानां क्रियापदं भवति।
तद्वत् कारकपदमपि तदेतदिति दीपकं द्वेधा ॥

अत्र प्रक्रान्त इत्यनेन निष्ठान्तक्रियापदेन सर्वेषां कारकपदानां सम्बन्ध इति कारक-दीपकम्। परिकरालङ्कारश्च। यथा—

साभिप्रायैः सम्यग् विशेषणैर्वस्तु यद् विशेष्येत।
द्रव्यादिभेदभिन्नं चतुर्विधः परिकरः स इति ॥ ॥ ४० ॥

---

१ °र्नैवत्वं प्रण° भा ३-४ ॥ २ °मभिनवं इति पाठानुसारेणापि बालबोधिन्यां व्याख्या वर्त्तते ॥ ३ क्षताद् भा ३-४। एतत्पाठभेदानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥ ४ वः पुनातु भा १-३ ॥

[बालबोधिनी]

पत्नीं पश्यन्निति। 'सः' रामः 'वः' युष्मान् 'क्षताद्' भयात् 'पृणातु' रक्षतु। स कः? 'यः' रामः 'पित्रा' दशरथेन 'स्वयं' आत्मना पुराणः पुमानपि 'नवः' नूतनः 'भूमिभर्त्ता' राजा कर्त्तुं प्रक्रान्तः। किंलक्षणेन पित्रा? 'काननान्तर्गतिकृतमतिना' वनमध्यगमने कृता बुद्धिर्येनासौ तेन, 'अहं वनं गमिष्यामि, अस्मै रामाय राज्यं प्रयच्छामि' इति पितुर्मतिः। किं कुर्वन्? 'नवोढां' नवपरिणीतां 'पत्नीं' सीतां पश्यन्। किं क्रियमाणः (? कुर्वाणः)? 'नवे' नूतने 'तरुणिमनि' तारुण्ये वर्त्तमानः। पुनः किं कुर्वन्? 'दोष्णोः' बाह्वोः 'प्रभावं' बलवृद्धिं [नवं] 'पुष्णन्' पोषणं कुर्वन्। पुनः किं कुर्वन्? 'आश्रितेषु' भक्तेषु स्वसेवकेषु वा 'अभिनवं प्रणयं' अनेकप्रकारां प्रीतिं दर्शयन्॥ ४०॥

*

स्वोद्भूतैस्तैश्चतुर्भिर्मधुजिदिव भुजैः पौरुषोत्कर्षवद्भि-
र्वक्त्रैर्वेदावदातैः कमल[1]तलचतुःशालशायीव देवः।
राजा विभ्राजमानः क्षितिभरधरणश्रान्तचित्तस्तमुच्चै-
र्योग्ये यस्मिन् निधित्सुर्दृशमनिशमदादस्तु स स्वस्तिकृद् वः॥४१॥

[हृदयरञ्जनी]

स्वोद्भूतैरिति। 'सः' रामो 'वः' युष्माकं 'स्वस्तिकृत्' कल्याणकृत् शुभङ्करोऽस्तु। स कः? 'राजा' दशरथः 'यस्मिन्' रामे उच्चैः 'तं' क्षितिभरं 'निधित्सुः सन्' निक्षेप्तुकामः सन् 'दृशमदात्' दृष्टिं ददौ, इच्छां चक्रे। किंलक्षणो राजा? 'क्षितिभरधरणश्रान्तचित्तः' क्षितेर्भरः तस्य यद् धरणं—वहनं तेन श्रान्तं—क्लान्तं चित्तं—चेतो यस्य। किंलक्षणो राजा? विभ्राजमानः—शोभमानः। कैः? 'स्वोद्भूतैः' तनयैः, स्वस्मादुद्भूताः—उत्पन्नाः तैः, 'तैः' प्रसिद्धैः तनयैः। कैः क इव? 'मधुजिदिव [भुजैः'] हरिरिव यथा हरिः स्वोद्भूतैः चतुर्भिर्भुजैः शोभते। किंलक्षणैः तनयैः? चतुर्भिः रामादिभिः। चतुर्भिः किंलक्षणैः तनयैः भुजैश्च? 'पौरुषोत्कर्षवद्भिः' पौरुषोत्कर्षः—पराक्रमातिशयो येषामस्तीति पौरुषोत्कर्षवन्तः तैः। पुनः कैः क इव? वेदावदातैः चतुर्भिः 'वक्त्रैः' मुखैः 'देव इव' ब्रह्मेव। किंलक्षणो ब्रह्मा? 'कमलतलचतुःशालशायी' कमलतलमेव चतुःशालं कमलतलचतुःशालं तत्र शेते शायी, कमलासन इत्यर्थः। भुजा अपि पौरुषोत्कर्षवन्तः तदा अपि मालोपमा। भिन्नैकस्य च बाहूपमानोपादाने मालोपमा भवति॥ ४१॥

---

१ 'लदल' भा १॥

[बालबोधिनी]

स्वोद्भूतैस्तैरिति। 'सः' रामः 'वः' युष्माकं 'स्वस्तिकृत्' कल्याणकृदस्तु । स कः ? 'राजा' दशरथः 'यस्मिन्' रामे 'अनिशं' निरन्तरं 'दृशं' दृष्टिं 'अदाद्' आरोपितवान् । किंलक्षणो राजा ? 'यस्मिन्' योग्ये रामे तं उच्चैर्महद्राज्यभारं 'निधित्सुः' निधातुमिच्छन् । पुनः किंलक्षणो राजा ? 'क्षितिभरधरणश्रान्ताचित्तः' पृथिव्याः भारस्य उद्धरणेन श्रान्तमनाः । किं कुर्वाणो राजा ? 'तैः चतुर्भिः स्वोद्भूतैः पुत्रैः' राम-भरत-लक्ष्मण-शत्रुघ्नैः कृत्वा 'विभ्राजमानः' दीप्यमानः । कैः क इव ? 'भुजैर्मधुजिदिव' यथा मधुजिद्–वासुदेवः चतुर्भिः स्वोद्भूतैः–स्वशरीरादुत्पन्नैः भुजैः कृत्वा विभ्राजते–दीव्यति। किंलक्षणैर्भुजैः स्वोद्भूतैश्च ? 'पौरुषोत्कर्षवद्भिः' पुरुषार्थाधिक्यवद्भिः । पुनः कैः क इव ? 'वक्त्रैः कमलतलचतुःशालशायीव देवः' कमलस्य तलं चतुःशालं–चतुरस्रमिव तस्मिन् शयितुं शीलं स्वभावो यस्यासौ, यथा कमलतलचतुःशालशायी देवो ब्रह्मा स्वोद्भूतैश्चतुर्भिर्वक्त्रैः कृत्वा विभ्राजति । किंलक्षणैः वक्त्रैः ? स्वोद्भूतैश्च ? 'वेदावदातैः' वेदैः–श्रुतिभिः ऋग्-यजुः-सामा-ऽथर्वभिः पवित्रितैः ॥ ४१ ॥

*

भद्रं श्रीरामभद्रः प्रथयतु भवतां यं नृपत्वाभिषेक-
प्राप्तं सा प्रेषयन्ती विषमवनपथे मन्थरामन्त्रितेन ।
अम्बा जम्बालमित्रैः क्षितितलमयशोराशिभिर्लिम्पति स्म,
प्रायः को वा कलङ्कं जगति न लभते नीचवाक्यानुवर्त्ती ? ॥४२॥

[हृदयरञ्जनी]

भद्रं श्रीरामभद्र इति। स रामभद्रो भवतां 'भद्रं' क्षेमं 'प्रथयतु' विस्तारयतु । स कः? 'यं' रामं 'अम्बा' कैकयी 'विषमवनपथे' वनस्य पन्थाः वनपथः, विषमश्चासौ वनपथश्च तस्मिन्, निमित्तसप्तमी, दुर्गमवनवासनिमित्तं प्रेषयन्ती सती 'अयशोराशिभिः' अपकीर्त्तिपुञ्जैः क्षितितलं लिम्पति स्म, यथा गोमयेन धरणीतलं लिम्पति तथेति । किंलक्षणं रामम्? 'नृपत्वाभिषेकप्राप्तं' नृपत्वस्य अभिषेकः तं प्राप्तं अभिषेकार्थमागतम्। श्लेषः। केन ? 'मन्थरामन्त्रितेन' मन्थरावाक्येन, "मन्थरा किल स्वर्गात् कृत्या मन्थरारूपेण दशरथगृहे स्थिता सती रामस्य वनवासमासादयामास रावणादीनां दैत्यानां वधार्थम्" **इत्यागमः,** यथा इन्द्रादीनां तत्तत्तिर्यग्योनिषु अवतारस्तथा कृत्याया अपि दास्यामिति । किंलक्षणैः यशोभिः ? 'जम्बालमित्रैः' कर्दमसदृशैः, अपयशसः कृष्णत्वात् कर्दमेन सदृशम् । अयं भावः—मन्थरावाक्येन यं रामं वनवासं प्रेषयन्ती 'अम्बा' माता कैकेयी आत्मानमयशोभाजनं

चकारेति वाक्यार्थः, युक्तोऽयमर्थः। को वा पुरुषः 'नीचवाक्यानुवर्त्ती' नीचः—तुच्छजनः तस्य वाक्यं—वचनं अनुवर्त्तत इति अनुवर्त्ती—अनुसरणशीलः पृथग्जनवचनकर्त्ता सन् 'जगति' लोके 'कलङ्कं' निन्दादोषं न लभते?, सर्वोऽपि प्राप्नोतीत्यर्थः। अर्थान्तरन्यासोऽलङ्कारः ॥ ४२ ॥

[बालबोधिनी]

भद्रं श्रीरामेति। स श्रीरामभद्रः भवतां भद्रं 'प्रथयतु' विस्तारयतु। स कः? 'अम्बा' माता कैकेयी 'यं' रामं 'मन्थरामन्त्रितेन' कृत्वा(? कृत्या)दासीकथनेन कृत्वा 'विषमवनपथे प्रेषयन्ती' अकलनीये वनमार्गे प्रेरयन्ती सती 'अयशोराशिभिः' अपकीर्तिसमूहैः 'लिम्पति स्म' अलिम्पत्। किंलक्षणं यम्? 'नृपत्वाभिषेकप्राप्तं' राज्याय अभिषेकप्राप्तम्। किम्? यथा 'जम्बालमित्रैः क्षितितलं' यथा कर्दमोदकाभ्यां कृत्वा पृथिवीतलं लिम्पति। युक्तं चैतत्—'प्रायः' बाहुल्येन 'नीचवाक्यानुवर्त्ती' निकृष्टवचनकर्त्ता पुमान् 'जगति' संसारे को वा कलङ्कं न लभते? अपि तु सर्वे लभन्त एव ॥ ४२ ॥

*

दोषाः केचिद् गुणानाम[1]पि? किमपि कृतं दुष्कृतं श्रेयसा किं?,
व्यामोहः किं विधेरप्यनृत[2]हृतफलाः किं वसिष्ठाशिषोऽपि?।
इत्थं यत्र प्रवृत्ते चलितुमनुवनं दुःखितानां जनाना-
माविर्भूता वितर्काश्चिरमवतु हरिः सोऽर्कवंशस्थि[3]तो वः ॥ ४३ ॥

[हृदयरञ्जनी]

दोषाः केचिद् गुणानामिति। सः हरिः 'वः' युष्मान् पातु। किंलक्षणः हरिः? 'अर्कवंशे स्थितः' सूर्यवंशे स्थितः कृतावतारः 'चिरमिति' सर्वकालं। स कः? ['यत्र'] यस्मिन् 'अनुवनं' वनं लक्षीकृत्य उद्दिश्य 'चलितुं' गन्तुं प्रवृत्ते सति 'जनानां' लोकानां 'इत्थम्' एते 'वितर्काः' विचाराः 'आविर्भूताः' उत्पन्नाः। किंलक्षणानां जनानाम्? 'दुःखितानां' सञ्जातदुःखानाम्, रामवियोगजनितदुःखपीडितानाम्। ते के वितर्काः? तानाह—'किमिति' वितर्के, गुणानामपि केचिद् दोषा भवन्ति?, किं गुणैः दोषाः क्रियन्ते उत्पाद्यन्ते? इति वितर्कः। 'श्रेयसा' पुण्येनापि 'दुष्कृतं' पापं कृतं भवेत्?, किं पुण्येनापि पापं क्रियते? किं यत्र पुण्यं तत्र पापभावः?। अथ 'वसिष्ठाशिषोऽपि किम-

---

१ °मपि कृतमकृतं? दु° भा ३-४। °मथ कृतमकृतं? दु°, एतत्पाठानुसारेण बालबोधिन्यां व्याख्या विद्यते ॥ २ °तहृत° भा १। °तकृत° भा ३-४, एतत्पाठभेदानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥ ३ °स्थितोऽपि भा २ ॥

नृतहृतफला: ' वसिष्ठमहर्षे: ' चिरं राज्यं कुरु, पृथ्वीं पालय ' इत्याद्याशिषः—आशिर्वादा इष्टाशंसनलक्षणा यास्ता आशिषोऽपि अनृतेन—असत्येन हृतं फलं यासाम्, ता वा अनृताः सत्यः हृतफला भवेयुः ?। ' इत्थं ' अमुना प्रकारेणाऽऽविर्भवेदिति। सन्देहालङ्कारः। वितर्क-विषादयोर्व्यभिचारिभावयोः सन्धिः। करुणरसोदयः ॥ ४३ ॥

[बालबोधिनी]

दोषाः केचिदिति। सः ' अर्कवंशस्थितः ' सूर्यवंशे स्थितो ' हरिः ' श्रीरामः ' वः ' युष्मान् चिरं ' अवतु ' रक्षतु। स कः ? ' यत्र ' रामे ' अनुवनं ' वने ' चलितुं ' गन्तुं प्रवृत्ते सति ' दुःखितानां ' दुःखयुक्तानां ' जनानां ' लोकानां ' इत्थं ' अमुना प्रकारेण ' वितर्काः ' विचाराः ' आविर्भूताः ' प्रकटीभूता उत्पन्नाः। इत्थं कथम् ? गुणानामपि केचिद् दोषाः ?, अथ किं कृतं अकृतम् ?, अथवा किं श्रेयसा दुष्कृतम् ?, अथ च किं ' विधेरपि ' ब्रह्मणोऽपि ' व्यामोहः ' महामोहो जातः ?, किं वशिष्ठाशिषोऽपि अनृतकृतफलाः ? निष्फला इत्यर्थः ॥ ४३ ॥

*

पायाद् वः पीतवासाः स विहितवसतिर्वासराधीशवंशे,
कुर्वन्त्या द्रागदृश्यं रविमिव विधुना यं सहैवानुजेन।
सद्यः सम्पादयन्त्या जननयनघनोद्भ्रान्तवारिप्रवाहान्,
कैकेय्या प्रावृषेव त्रिभुवनमखिलं सान्धकारं व्यधायि ॥ ४४ ॥

[हृदयरञ्जनी]

पायाद् व इति। ' पीतवासाः ' पीतं वासः—वस्त्रं यस्य स पीतवासाः, " स हरिता-लसमाननवांशुकः " इति **माघे**[सर्ग ४ पद्य २१], ' सः ' रामः वः पायात्। किंलक्षणः पीतवासाः ? ' वासराधीशवंशे ' वासराः—दिवसाः तेषां अधीशः—सूर्यः तस्य वंशे सूर्यान्वये ' विहितवसतिः ' कृता वसतिः—अवतारो येन। एवंविधः स वः पायादित्याशीः। स इति कः ? एवं कुर्वत्या कैकेय्या अखिलमपि त्रिभुवनं सान्धकारं ' व्यधायि ' कृतम्, शोकान्धकारे निहितमिति भावः। किं कुर्वत्या ? ' यं ' रामं ' अनुजेन ' लक्ष्मणेन ' सहैव ' इति एकेन लक्ष्मणेनेति एवकारार्थः, ' द्राग् ' झटिति ' अदृश्यं ' लोचनपथातीतं कुर्वाणया। कयेव ? ' प्रावृषा ' वर्षासमयेनेव। किं कुर्वत्या प्रावृषा ? ' विधुना ' चन्द्रमसा सह रविं शीघ्रं अदृश्यं विदधत्या। पुनः किं कुर्वत्या ? ' सद्यः ' तत्क्षणमेव ' जननयनघनोद्भ्रान्तवारिप्रवाहान् ' जन-नयनान्येव घनाः—मेघाः जलमुचः उद्भ्रान्ताः—निर्गताः वारिप्रवाहास्तान् ' सम्पादयन्त्या '

जनयन्त्या कुर्वन्त्या । प्रावृषाऽपि मेघोद्गतजलप्रवाहा उत्पाद्यन्ते, अखिलमपि जगत् सान्धकारं क्रियते, उपमालङ्कारः सहोक्तिश्च ॥ ४४ ॥

[बालबोधिनी]

पायाद् वः इति । सः 'पीतवासाः' रामः 'वः' युष्मान् 'पायाद्' रक्षतु । किंलक्षणः ? 'वासराधीशवंशे' सूर्यवंशे 'विहितवसतिः' कृता वसतिर्येनासौ । स कः ? 'अनुजेन' लक्ष्मणेन सहैव 'यं' रामं 'द्राक्' शीघ्रं 'अदृश्यं' अदर्शनीयं कुर्वन्त्या कैकेय्या 'अखिलं' समस्तं त्रिभुवनं '[1]सान्धकारं' सदुःखं 'व्यधायि' अकृत । कं कयेव ? 'रविं प्रावृषेव' यथा प्रावृषा-वर्षाकालेन 'विधुना' चन्द्रमसा सहैव रविमदृश्यं कुर्वन्त्या 'अखिलं' समग्रं त्रिभुवनं [2]सान्धकारं विधीयते । किंलक्षणया कैकेय्या ? 'सद्यः' तत्क्षणं 'जननयनघनोद्वान्तवारिप्रवाहान् सम्पादयन्त्या' लोकचक्षुर्भ्यो बहु यद् उद्वान्तं-निर्गतं वारि-उदकं अश्रु तस्य प्रवाहास्तान् कारयन्त्या । किंलक्षणया प्रावृषा च ? घनोद्वान्तवारिप्रवाहान् सम्पादयन्त्या ॥ ४४ ॥

*

चैतन्येनाग्रिमायाः सह सुजनतया मध्यमायाश्च मातुः,
पुत्रेणाप्यन्तिमायाः पितुरवनिपतेः प्राणितव्येन तूर्णम् ।
आनन्देन प्रजानां मुनिजनमनसा[3] पूःश्रिया सीतया च,
प्राविक्षत् काननं यः स जनयतु परां राघवः श्लाघ्यतां वः ॥ ४५ ॥

[हृदयरञ्जनी]

चैतन्येनेति । सः 'राघवः' रामो 'वः' युष्माकं 'पराम्' उत्कृष्टां 'श्लाघ्यतां' लोकेषु स्तुत्यं जनयतु । स कः ? [यः] 'काननम्' अटवीं 'प्राविक्षत्' विवेश । कथं विवेश ? इति सहोक्तिमालालङ्कारेणाऽऽह—'अग्रिमायाः' ज्येष्ठाया मातुः 'चैतन्येन सह' कौशल्याचैतन्यं गृहीत्वा वनं प्राविक्षदिति सर्वत्र योज्यम् । 'मध्यमाया मातुश्च' कैकेय्याः 'सुजनतया सह' सुजनतां गृहीत्वेति । अपरम् 'अन्तिमायाः मातुः पुत्रेण' लक्ष्मणेन सह लक्ष्मणं गृहीत्वेति । अन्यद् 'अवनिपतेः' राज्ञो दशरथस्य पितुः 'प्राणितव्येन सह' जीवेन सह पितुः प्राणान् गृहीत्वेति । 'च' अन्यत् 'प्रजानां' लोकानां 'आनन्देन' हर्षेण सह हर्षं गृहीत्वेति । 'मुनिजनमनसा' मुनिजनानां मनोभिः सह मुनिमानसानि गृहीत्वेति । 'पूःश्रिया' नगरशोभया सह अयोध्यायाः शोभां गृहीत्वेति । अनच 'सीतया

१-२ 'साध्वकारं' भा १-२ ॥ ३ °साऽऽसश्रिया इति पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥

सह ' सीतां गृहीत्वेति । एवं प्रतिवाक्यं योज्यम् । वनं प्राविक्षदिति क्रियाकारकसम्बन्धः । कारकदीपकालङ्कारश्च । वैदर्भी रीतिः ॥ ४५ ॥

[बालबोधिनी]

चैतन्येनेति । सः ' राघवः ' रामः ' वः ' युष्माकं ' परां ' उत्कृष्टां ' श्लाघ्यतां ' स्तुतियोग्यत्वं ' जनयतु ' उत्पादयतु । स कः ? ' यः ' रामः ' आप्तश्रिया ' प्राप्तलक्ष्म्या सीतया सह ' काननं ' वनं ' प्राविक्षत् ' प्राप्तवान् । ' च ' अपरं ' मुनिजनमनसा ' ऋषिसमूहचेतसा ' काननं ' वनं प्राविक्षत् । च ' अग्रिमायाः ' प्रथमायाः ' मातुः ' कौशल्यायाः ' चैतन्येन ' मनसा सह ' काननं ' वनं प्राविक्षत्, सा शून्या जातेत्यर्थः । ' च ' अपरं ' मध्यमायाः ' द्वितीयस्याः ' मातुः ' कैकेय्याः ' सुजनतया सह ' सौजन्येन सह काननं प्राविक्षत् । ' च ' अपरं यो रामः ' अन्तिमायाः ' तृतीयस्याः ' मातुः ' सुमित्रायाः ' पुत्रेण ' लक्ष्मणेन सह काननं प्राविक्षत् । स कः ? यो रामः ' तूर्णं ' वेगेन ' अवनिपतेः ' राज्ञः पितुः प्राणितव्येन सह काननं प्राविक्षत् । ' च ' अपरं यो रामः ' प्रजानां ' लोकानां ' आनन्देन ' हर्षेण सह काननं प्राविक्षत् ॥ ४५ ॥

*

श्वश्रूणामश्रुपूरान्तरितनयनता साधु सद्भिर्न मेने,
यस्मात् ताभिस्तदानीं कृतचरणनतिस्तूर्णमापृच्छमाना ।
सार्द्धं येन प्रयातुं विषममपि वनं स्मेरवक्त्रारविन्दा,
वैदेही नाऽऽलुलोके स दहतु दुरितं दानवारिश्चिरं वः ॥ ४६ ॥

[हृदयरञ्जनी]

श्वश्रूणामिति । स दानवारिः ' वः ' युष्माकं ' दुरितं ' पापं चिरं दहतु । ' सद्भिः ' सत्पुरुषैः ' श्वश्रूणां ' कौशल्याप्रभृतीनां श्वश्रूणां ' अश्रुपूरान्तरितनयनता ' अश्रूणां–बाष्पाणां पूरः–प्रवाहः तेन अन्तरिता–आच्छादिता नयनता–नेत्रत्वलक्षणो धर्मः साधु ' न मेने ' न ज्ञाता । [' यस्मात् '] यतः कारणात् ' ताभिः ' श्वश्रूभिः सा ' वैदेही ' सीता ' नाऽऽलुलोके ' न दृष्टा ' तदानीं ' तस्मिन् समये । कः समयः ? यदा रामेण ' सार्द्धं ' सह ' विषममपि ' दुर्विगाहमपि वनं ' प्रयातुं ' गन्तुमापृच्छमाना सीता न दृष्टेति । किम्भूता ? ' कृतचरणनतिः ' विहितपादवन्दना । पुनः किंलक्षणा ? ' स्मेरवक्त्रारविन्दा ' सहासमुखकमला । यत एवंविधाऽपि सीता ताभिर्न दृष्टा अतः कारणाल्लोकैस्तासां नयनवत्त्वलक्षणो धर्मो निन्दितः निष्फल इति । करुणरसः ॥ ४६ ॥

[बालबोधिनी]

श्वश्रूणामिति । सः ‘दानवारिः’ असुररिपू [१]रामः ‘वः’ युष्माकं ‘दुरितं’ अनिष्टं चिरं दहतु । स कः ? ‘सद्भिः’ सत्पुरुषैः तत् ‘साधु’ समीचीनं ‘न मेने’ न स्वीकृतं ‘श्वश्रूणां’ कौशल्या-कैकेयी-सुमित्राणां ‘अश्रुपूरान्तरितनयनता’ अश्रुसमूहैः अन्तर्हितनेत्रत्वम्। तत् कस्मात् ?, ‘यस्मात्’ कारणात् ‘ताभिः’ श्वश्रूभिः ‘येन’ रामेण ‘सार्द्धं’ सह विषममपि वनं ‘प्रयातुं’ गन्तुं ‘स्मेरवक्त्रारविन्दा’ ईषद्धास्ययुक्तं मुखकमलं यस्याः सा । ईषद्धासयुक्ता सती ‘वैदेही’ सीता ‘न आलुलोके’ न दृष्टा अतः कारणात् सद्भिः साधु न मेने। किंलक्षणा वैदेही ? ‘तदानीं’ तस्मिन्नवसरे ‘कृतचरणनतिः’ विहितः श्वश्रूणां पादेषु नमस्कारो यया सा कृतचरणनतिः सती ‘तूर्णं’ वेगेन ‘आपृच्छमाना’ सर्वान् इष्टवर्गान् ‘अहं गच्छामि’ इति पृच्छन्ती ॥ ४६ ॥

*

कौशल्यायां सशल्यः, पितरि परवशे प्राप्तखेदः, समृद्धौ
बद्धावज्ञः, कलत्रेऽप्यनुजिगमिषति प्रेषित[२]भ्रूनिमेषः ।
कैकेय्यामप्रचेताः, समधिगतमहामत्सरो मन्थरायां,
सौमित्रिर्यत्र[३] भक्तो विपिनमनुययौ भुक्तिदो[४] वः स भूयात् ॥४७॥

[हृदयरञ्जनी]

कौशल्यायामिति । स रामः ‘वः’ युष्माकं ‘भुक्तिदो भूयात्’ इष्टभोगप्रदो भवतु, भुक्तिः—भोज्यं तत्प्रदोऽस्तु । स कः ? ‘यत्र’ यस्मिन् रामे ‘भक्तः’ भक्तिमान् सेवकः ‘सौमित्रिः’ लक्ष्मणः विपिनम् ‘अनुययौ’ राममनु—पश्चात् जगाम। कुतोऽस्य भक्तत्वम् ? तत् प्रतिपादयितुं विशिष्यते—किंलक्षणः सौमित्रिः ? कौशल्यायां ‘सशल्यः’ शल्येन सह वर्त्तते इति सशल्यः, कौशल्यां दृष्ट्वा शल्यविद्ध इव जायते । पुनः किंलक्षणः ? ‘परवशे’ पराधीने स्त्र्यायत्ते ‘पितरि’ दशरथे ‘प्राप्तखेदः’ पित्राऽनुचितमनुष्ठितमिति खेदवान् । किंलक्षणः ? ‘समृद्धौ’ राज्यसम्पदि ‘बद्धावज्ञः’ बद्धा अवज्ञा—अनादरो येन सः, रामेण विना रामं विना कीदृग् राज्यमिति निःस्पृहः । तथा किंलक्षणः ? ‘अनुजिगमिषति’ अनुव्रजितुमिच्छति ‘कलत्रे’ ऊर्मिलायां ‘प्रेषितभ्रूनिमेषः’ प्रेषितः-निक्षिप्तः भ्रूनिमेषो येन, भ्रूसंज्ञया निषिद्धकलत्र इत्यर्थः । पुनः किंलक्षणः ? कैकेय्याम् ‘अप्रचेताः’

---

१ रामचन्द्रः ‘वः’ पु० ॥ २ भ्रूनिषेधः भा ३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्याऽस्ति ॥ ३ °त्र सक्तो भा ३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्या विद्यते ॥ ४ भुक्तये वः भा १-२-३-४ । एतत्पाठभेदानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥

अप्रसन्नमनाः कलुषितचित्तः । पुनः किंलक्षणः ? 'मन्थरायां' दास्यां 'समधिगतमहामत्सरः' समाधिगतः—प्राप्तः महान्—अधिको मत्सरः—कोपो यस्य, मन्थरायां समुत्पन्नकोपः। निर्वेद-विषादा-ऽसूया-ऽमर्षा-ऽऽवेगोग्रतानां व्यभिचारिभावानां सन्धिः, रसानां सङ्करश्च ॥४७॥

[बालबोधिनी]

कौशल्येति । स रामो 'वः' युष्माकं 'भुक्तये' भोगाय 'भूयात्' अस्तु । स कः ? 'यत्र' रामे 'सौमित्रिः' सुमित्रापुत्रो लक्ष्मणः 'सक्तः' आसक्तः सन् विपिनं अनु—पश्चाद् ययौ—गतः । किंलक्षणः ? कौशल्यायां सशल्यः । पुनः किंलक्षणः ? 'परवशे' कैकेयीवशे 'पितरि' दशरथे 'प्राप्तखेदः'[१]आप्तदुखः । 'समृद्धौ' गृह—राज्यसमृद्धौ 'बद्धावज्ञः' बद्धा अवज्ञा—अनादरो येनासौ । अनुजिगमिषति पश्चाद्गमनं कर्त्तुमिच्छति 'कलत्रेऽपि' जायायामपि 'प्रेषितभ्रूनिषेधः' प्रेरितः भ्रुवा निषेधो येनासौ । पुनः किंलक्षणः ? कैकेय्यां 'अप्रचेताः' तत्र मन एव न कृतम् । पुनः किंलक्षणः ? 'मन्थरायां' दास्यां 'समधिगतमहामत्सरः' सम्यक्प्रकारेण प्राप्तः महाक्रोधो यस्यासौ समधिगतमहामत्सरः ॥ ४७ ॥

*

दूरे तिष्ठन्तु सन्तः पशुभिरपि भृशं दुःखितैरश्रु मुक्तं,
कासारैरप्यहासैर्गतसितविहगव्रातदम्भादभावि ।
उद्यानैरप्यनुद्यद्ध्वनिकपिकतया नूनमन्यूनमौनैः,[२]
सञ्जातं याति यस्मिन् वनमवनमनाः सोऽस्तु वः कौस्तुभाङ्कः ॥४८॥

[हृदयरञ्जनी]

दूरे तिष्ठन्त्विति । 'सः कौस्तुभाङ्कः' कौस्तुभः—मणिः सोऽङ्कः—चिह्नं यस्य स रामः 'वः' युष्माकं 'अवनमनाः' अवनं—रक्षणं तत्र मनः—चित्तं यस्य सः रक्षणतत्परोऽस्तु। स कः ? 'यस्मिन्' रामे 'वनम्' अरण्यं 'याति' गच्छति सति 'पशुभिरपि' मृगादिभिरपि प्राणिभिर्दुःखितैः सद्भिः 'अश्रु' बाष्पः नेत्रजलं 'मुक्तं' अरोदि, 'सन्तः' सत्पुरुषा दूरे तिष्ठन्तु, सद्भिः—ज्ञानिभिः सुख-दुःखाभिज्ञैः अरोदीत्यत्र का कथा ? का वार्त्ता ?, यत्र पशूनां दुःखं जातं [तत्र] मनुष्याणां सदसद्विवेकिनां जातमिति किं वक्तव्यम् ? । अन्यगतदुःखेन अन्यत्र दुःखोत्पत्तिरित्यसङ्गतिरलङ्कारः विषमालङ्कारश्च ।

तदिति चतुर्द्धा विषमं यत्राण्वपि नैव गुर्वपि च कार्यात् ।
कार्यं कुर्यात् कर्त्ता हीनोऽपि तरौ(? न वा)ऽधिकोऽपि न वा ॥ [ ]

---

१ °सखेदः भा ॥ २ नूनमापन्नमौनैः भा १-२ ॥

तथा 'कासारैः' तडागैः 'अहासैः' हासशून्यैरभावि, तडागैर्हासः त्यक्त । कस्मात् ? 'गतसितविहगव्रातदम्भाद्' गताश्च ते सितविहगाः—हंसास्तेषां व्रातः—समूहः तस्य दम्भाद्—व्याजात्, कासारेभ्यो हंसैर्न गतं किन्तु हास्यं दुःखवशात् त्यक्तम् । 'उद्यानैरपि' उपवनैरपि 'अन्यूनमौनैः' अन्यूनम्—अधिकं मौनं येषां तानि अन्यूनमौनानि, तैः बद्धमौनैरभावि मूकैः सद्भिः 'सञ्जातं' स्थितम् । कया ? 'अनुद्यद्ध्वनिकपिकतया' ध्वनिरेव ध्वनिकः, स्वार्थे कप्रत्ययः, अनुद्यन् ध्वनिर्येषां ते अनुद्यद्ध्वनयः पिकाः येषु तानि तेषां भावः तत्ता तया, निःशब्दपिकत्वेन दुःखितानि तूष्णीं तिष्ठन्ति, जातिः सद्भिः पशुभिः कासारैरुद्यानैस्तत्तद्धर्मपरित्यागाद् दुःखितैरभावीति वाक्यार्थः । अन्तःक्रियादीपक अलङ्कारः अनुप्रासः, प्रसादो गुणः, करुणरसः, वैदर्भी रीतिः । यथा—

श्रुतिमात्रेण शब्दानां येनार्थप्रत्ययो भवेत् ।
साधारणः समग्राणां स प्रासादो गुणः स्मृतः ॥

'समग्राणामिति' सर्वासां रीतीनाम् ॥ ४८ ॥

[बालबोधिनी]

दूरे तिष्ठन्त्विति । सः 'कौस्तुभाङ्कः' रामः 'वः' युष्माकं 'अवनमनाः' रक्षणचेताः अस्तु । स कः ? यस्मिन् वनं याति सति सन्तो दूरे तिष्ठन्तु, पशुभिरपि 'भृशं' अत्यर्थं 'दुःखितैः' दुःखयुक्तैः 'अश्रु' बाष्पं मुक्तम् । पुनः स कः ? यस्मिन् वनं याति सति 'कासारैः' तडागैरपि 'गतसितविहगव्रातदम्भाद्' गतः शुक्लपक्षीणां—हंसानां व्रातः—समूहः तच्छलात्—तन्मिषाद् 'अहासैः' अहास्ययुक्तैः 'अभावि' जातम्, यदा रामो वनं गतस्तदा तडागस्था हंसा, मानसे गताः अतः अहासैः अभावि । पुनः स कः ? यस्मिन् वनं याति सति 'उद्यानैरपि' वाटिकाभिरपि 'नूनं' निश्चितं अनुद्यद्ध्वनिकपिकतया कृत्वा 'अन्यूनमौनैः' पूर्णमौनैः सञ्जातम् । न उद्यद् अनुद्यत्, तच्च ध्वनिः—शब्दश्च अनुद्यद् ध्वनिः, अनुद्यद्ध्वनयः पिकाः—कोकिलाः 'येषु उद्यानेषु ते अनुद्यद्ध्वनिकपिकाः, तेषां भावः अनुद्यद्ध्वनिकपिकता तया ॥ ४८ ॥

*

ऐश्वर्ये वंशलक्ष्म्याः प्रसभमपहृते केकयाधीशपुत्र्या,
तं स्मृत्वा भर्तृदत्तं वरमवरमतेर्मन्थरायाः कथाभिः ।
यस्तल्लेभेऽन्यथापि प्रतिदिनमचलोत्पन्नया सेव्यमानः,
पश्यन् भक्तिं गुहस्य प्रकटजटशिराः सोऽस्तु शौरिः श्रिये वः ॥४९॥

[हृदयरञ्जनी]

ऐश्वर्यं वंशलक्ष्म्याः इति। 'सः शौरिः वः श्रियेऽस्तु' शूरस्य—वसुदेवस्य अपत्यं 'शौरिः' श्रीवासुदेवः 'वः' युष्माकं 'श्रिये' लक्ष्म्यै 'अस्तु' भवतु। किंलक्षणः शौरिः? 'प्रकटजटशिराः' प्रकटाः—दृश्यमानाः जटा यस्मिन् तत् प्रकटजटम्, प्रकट-जटं शिरो यस्य सः 'प्रकटजटशिराः' जटावान्। स कः? 'यः' रामः 'तद्' ऐश्वर्यं 'अन्यथा' प्रकारान्तरेण 'लेभे' प्राप्तवान्। क्व सति? ['केकयाधीशपुत्र्या'] कैकेय्या मध्यममात्रा 'प्रसभं' बलाद् वंशलक्ष्म्याः 'ऐश्वर्ये' समृद्धि(? द्धौ) अपहृते सति। किं कृत्वा अपहृते सति? 'अवरमतेः' नीचमतेः मन्थरायाः कथाभिः भर्तृदत्तं वरं स्मृत्वा। कथं कया रीत्या प्राप? इत्याह—प्रतिदिनं 'अचलोत्पन्नया' सीतया लक्ष्म्या 'सेव्यमानः' आराध्यमानः। पुनः किं कुर्वन्? 'गुहस्य' निषादाधिपतेः 'भक्तिं' सेवां पश्यन्, यद्यपि असौ राज्यलक्ष्मीं जहौ तथापि एनं सा लक्ष्मीः सीताव्याजेन आ[....]।

विना कारणसद्भावं यत्र कार्यस्य दर्शनम्।
नैसर्गिकगुणोत्कर्षभावना सा विभावना इति॥ ४९॥

[बालबोधिनी]

ऐश्वर्यं वंशेति। 'सः' रामः 'वः' युष्माकं 'श्रिये' लक्ष्म्यै अस्तु। किंलक्षणः? 'प्रकटजटशिराः' प्रकटा जटा यस्मिन् तत् प्रकटजटं तत् शिरः—मस्तकं यस्यासौ। स कः? 'यः' रामः 'तद्' ऐश्वर्यस्वामित्वं 'अन्यथाऽपि' प्रकारान्तरेणापि 'लेभे' प्राप्तवान्। किं कुर्वाणः? 'प्रतिदिनं' दिनं दिनं प्रति 'अचलोत्पन्नया' सीतया सेव्यमानः। किं कुर्वन्? 'गुहस्य' निषादस्य 'भक्तिं' सेवां पश्यन्। क्व सति? 'केकयाधीशपुत्र्या' कैकेय्या 'वंशलक्ष्म्याः' राज्यश्रियः 'ऐश्वर्ये' स्वामित्वे 'प्रसभं' बलात्कारेण 'अपहृते सति' गृहीते सति। किं कृत्वा? 'अवरमतेः' निकृष्टमतेर्मन्थराया दास्याः 'कथाभिः' वार्त्ताभिः तं 'भर्तृदत्तं' दशरथेन दत्तं वरं स्मृत्वा॥ ४९॥

*

श्रीवत्सः कुत्सितं वः शमयतु तमसातीरनीरोक्षिताङ्गः,
कुर्वाणः सर्वमुर्वीजनमपि तमसा व्याकुलं विप्रयोगात्।
सम्प्राप्तस्याथ यस्य प्रतिभवनभवत्सोमयागे प्रयागे,
कान्ता तासां नदीनां समजनि तिसृणां मङ्गलार्थं चतुर्थी॥ ५०॥

---

१ 'मुर्वीतलमपि भा २॥

[हृदयरञ्जनी]

श्रीवत्सः कुत्सितमिति । सः 'श्रीवत्सः' रामः विष्णुः 'वः' युष्माकं पापं 'शमयतु' स्फेटयतु । किंलक्षणः? 'तमसातीरनीरोक्षिताङ्गः' तमसाया नद्याः तीरनीरं–जलं तेन उक्षितं–सिक्तं अङ्गं–शरीरं यस्य सः, तमसाजले कृतस्नान इत्यर्थः । किं कुर्वन्? 'विप्रयोगाद्' विरहात् 'सर्वमुर्वीजनं' सकलं भूलोकं व्याकुलं 'तमसा' मोहेन 'दुर्मनसं कुर्वन्' उत्सुकं विदधानः । स कः? 'यस्य' रामस्य 'कान्ता' जानकी त्रैलोक्यजननी प्रयागे ['तासां तिसृणां] नदीनां' गङ्गा-यमुना-सरस्वतीनां चतुर्थी 'समजनि' सम्पन्ना, सीताया अपि तीर्थरूपत्वात् । उत्प्रेक्षते—'मङ्गलार्थमिव' तिसृणां नाम मङ्गलं भवति अत एतासां मध्ये स्वयं चतुर्थी जाता । 'पुण्यश्लोका च वैदेही' इति स्मरणात् !

अहल्या द्रौपदी सीता तारा मन्दोदरी तथा ।
पञ्च कन्याः स्मरेन्नित्यं महापातकनाशनम् ॥

इति स्मरणाच्चेति तीर्थरूपत्वम् । किंलक्षणे प्रयागे? 'प्रतिभवनभवत्सोमयागे' भवनं भवनं प्रति प्रतिभवनं सोमयागो यस्मिन् तत्र, प्रयागे प्रतिसदनं सोमयाजी वर्त्तत इत्यर्थः । किम्भूतस्य रामस्य? प्रयागं प्राप्तस्य, प्रयागशब्दस्य विभक्तिव्यत्ययेन पुनः प्रयोगः । उत्प्रेक्षा ॥ ५० ॥

[बालबोधिनी]

श्रीवत्सः कुत्सितमिति । सः 'श्रीवत्सः' रामः 'वः' युष्माकं 'कुत्सितं' दुरितं 'शमयतु' शान्तिं प्रापयतु । किं कुर्वाणः? सर्वमपि 'उर्वीजनं' पृथिवीलोकं 'विप्रयोगाद्' वियोगात् 'तमसा' दुःखेन कृत्वा 'व्याकुलं' व्यग्रं कुर्वाणः । किंलक्षणः? 'तमसातीरनीरोक्षिताङ्गः' तमसायाः तीरं तमसातीरम्, तमसातीरस्य नीरं–उदकं तस्मिन् उक्षितं–प्रक्षालितं अङ्ग–गात्रं येनासौ । स कः? 'यस्य' रामस्य 'कान्ता' सीता 'तासां तिसृणां नदीनां' गङ्गा-यमुना-सरस्वतीनां मध्ये मङ्गलार्थं चतुर्थी 'समजनि' बभूव । किंलक्षणस्य यस्य? अथ प्रयागे सम्प्राप्तस्य । किंलक्षणे प्रयागे? 'प्रतिभवनभवत्सोमयागे' गृहं गृहं प्रति भवन्तः सोमयागा यस्मिन् स प्रतिभवनभवत्सोमयागः तस्मिन् ॥ ५० ॥

*

रामः क्षेमं क्रियाद् वः [1]प्रतिपदमपि यत्पादुकोपास्तियत्ना-
पन्नैकान्नपिण्डाशनकृशतनुना [2]माडवीवल्लभेन ।

---

१ प्रतिदिनमपि भा ३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥ २ माण्डवी° भा १-२-३-४, एष एव पाठः समीचीनः, एतत्पाठानुसारेण बालबोधिन्यां व्याख्याऽस्ति ॥

तन्मेध्यत्वं धरायां समधिगतमसावश्वमेधः स्वमातु-
र्येनासीद् दुष्टदासीकथितपथगतब्रह्महत्यां दधत्याः ॥ ५१ ॥

[हृदयरञ्जनी]

रामः क्षेममिति । स रामो 'वः' युष्माकं क्षेमं क्रियात् । स कः? येन 'माडवीवल्लभेन' केनचिद्राज्ञा ऋषिणा वा 'तन्मध्यं समधिगतं' तन्मध्यं—राममध्यं रामान्तःपातिना जातम्, तत्र लीनमित्यर्थः । किम्भूतेन? 'प्रतिपदमपि' पदे पदे 'यत्पादुकोपास्तियत्नापन्नेन' यस्य रामस्य पादुके तयोरुपास्तिः—उपासना सेवा तस्यां यत्नः—प्रयत्नः प्रयतनं आपन्नेन—प्राप्तेन, "प्राप्तापन्ने च०" [पाणिनि० २-२-४] इति द्वितीयासमासः । पुनः किंलक्षणेन? 'एकान्नपिण्डाशनकृशतनुना' एकश्चासौ अन्नपिण्डश्च वा एकं च तद् अन्नं च तस्य पिण्डः—कवलः तस्य अशनं—भक्षणं तेन कृशा तनुः—शरीरं यस्य तेन, 'च' अपरं धरायां येन असौ अश्वमेधश्च 'समधिगतः' कृतः । किमर्थम्? 'स्वमातुः कृते' स्वजनन्यर्थे । किंलक्षणायाः स्वमातुः? 'दुष्टदासीकथितपथगतब्रह्महत्यां दधत्याः' दुष्टा या दासी तया कथितपथः—वचनमार्गः तेन गता ब्रह्महत्या तां दधत्याः, कार्या-ऽकार्यानभिज्ञचेटीवचनानुरोधेन समधिगतं ब्रह्माननं(?) धारयन्त्याः । अयमर्थः—यो माडवीवल्लभः स्वमातुः ब्रह्महत्यापनोदार्थं अश्वमेधाख्यं यागमनुष्ठितवान् । तथा च **श्रुतिः**—"तरति ब्रह्महत्यां योऽश्वमेधेन यजते" [ ] इति ॥ ५१ ॥

[बालबोधिनी]

रामः क्षेमं क्रियेति । स रामः 'वः' युष्माकं 'क्षेमं' कल्याणं 'क्रियात्' करोतु । कीदृशः सः? येन 'माण्डवीवल्लभेन' भरतेनानुजेन भ्रात्रा प्रतिदिनमपि 'यत्पादुकोपास्तियत्नात्' यस्य-रामस्य पादुकायाः उपासनप्रयत्नाद् 'धरायां' पृथिव्यां यद् 'मेध्यत्वं' पावित्र्यं 'समधिगतं' आप्तं 'तत्' पावित्र्यं 'स्वमातुः' कैकेय्या असौ अश्वमेध आसित् । कीदृशाः स्वमातुः? 'येन' कारणेन 'दुष्टदासीकथितपथिगतिब्रह्महत्यां दधत्याः' दोषयुक्तदास्युक्तमार्गगमनेन ब्रह्महत्यां बिभ्रत्याः । कीदृशेन माण्डवीवल्लभेन? 'एकान्नपिण्डाशनकृशतनुना' एको यो अन्नस्य पिण्डः तस्य भक्षणेन दुर्बलशरीरेण ॥ ५१ ॥

*

भारत्या सन्मुनीनां मुहुरमृतमुचा स्तोकयन् तातशोकं
भारत्या भक्तिमत्या वचनरचनया दत्तचित्तप्रसादः ।

---

१ °पथिगतिब्र° भा १-३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्या क्रियते ॥ २ अपव्याख्यानमिदम् । अत्रार्थे 'माण्डवीवल्लभेन-भरतेन' इति बालबोधिनीव्याख्यानमेव सुसङ्गतम् ॥ ३ °चा मोचयंस्तात° भा १ ॥

कान्ताराति विराधं प्रधनभुवि नयन्नाशुगैराशु नाशं,
कान्ताराभ्यागतो वः स भवतु भगवान् भोगसंयोगकर्ता ॥५२॥

[हृदयरञ्जनी]

भारत्येति । 'स भगवान्' रामः 'वः' युष्माकं 'भोगसंयोगकर्त्ता भवतु' [भोगः—] स्रक्-चन्दन-वनितादिलक्षणः तस्य संयोगः—सम्बन्धः उत्पत्तिः तस्य कर्त्ता—निमित्तकारणं भवतु । किंलक्षणः रामः ? 'कान्तारं—दुर्गमं वर्त्म [ततः] अभ्यागतः—आभिमुख्येन सम्मुखत्वेन प्राप्तः । किंकुर्वन् ? 'सन्मुनीनां' सन्तश्च ते मुनयश्च तेषां महात्मनां 'अमृतमुचा' पीयूषस्राविण्या 'भारत्या' वाण्या 'तातशोकं' जनकाधिपतिश्रवणजनितदुःखं 'स्तोकयन्' अल्पीकुर्वन् विस्मरन्, सन्मुनीनां 'मुहुः' वारं वारं प्रबोधवचनेन शान्तदुःखो जात इत्यर्थः । चान्यत् किंलक्षणः ? 'दत्तचित्तप्रसादः' दत्तः चित्तप्रसादो यस्मै, निर्मलीकृतचेता इत्यर्थः । कया ? 'भारत्या' भरतसम्बन्धिन्या 'वचनरचनया' वचनानां रचनया वचनपरिपाट्या । किंलक्षणया ? 'भक्तिमत्या' भक्तिरस्यामस्तीति भक्तिमती तया, अकृत्रिमादरातिशयप्रकाशिन्या भ्रातृभरतवचनरीत्या प्रसन्नचेता इति । पुनः किंकुर्वन् ? 'प्रधनभुवि' रणभूमौ 'आशुगैः' बाणैः, आशु—शीघ्रं गच्छन्तीत्याशुगाः तैः 'आशु' शीघ्रं विराधं नाम राक्षसं 'नाशं नयन्' क्षयं कुर्वन् । किंलक्षणं विराधम् ? 'कान्ताराति' कान्तायाः अरातिः—शत्रुः तम्, राम-लक्ष्मणयोर्मध्यवर्त्तिनीं सीतामपहृत्य विदु(? वियत्यु)-त्पतन्तं राक्षसं रामो जघानेति वाक्यार्थः । निर्वे[द]-धृत्यमर्षाणां भावानां सन्धिः, शान्त-वीरयोर्विरोधिनोः सङ्करः ॥ ५२ ॥

[बालबोधिनी]

भारत्या सन्निति । 'स भगवान्' रामः 'वः' युष्माकं 'भोगसंयोगकर्त्ता भवतु' भोगस्य संयोगः तस्य कर्त्ता अस्तु । कीदृशः ? 'कान्ताराभ्यागतः' वनातिथिः । किं 'कुर्वाणः[1] ? 'प्रधनभुवि' सङ्ग्रामाङ्गणे 'कान्ताराति' वनितारिपुं 'विराधं' राक्षसं 'आशुगैः' बाणैः 'आशु' शीघ्रं 'नाशं नयन्' नाशं प्रापयन् । कीदृशः ? 'सन्मुनीनां' साधुऋषीणां 'भारत्या' वाण्या 'तातशोकं' पितृशोकं 'स्तोकयन्' अल्पीकुर्वन् । कीदृश्या भारत्या ? 'मुहुः' वारं वारं 'अमृतमुचा' अमृतं मुञ्चतीत्यमृतमुक् तया । पुनः कीदृशः ? 'भारत्या' सरस्वत्या वचनरचनया कृत्वा 'दत्तचित्तप्रसादः' दत्तः चित्तस्य प्रसादो यस्मै स तादृक् । कीदृश्या भारत्या ? भक्तिमत्या भक्तियुक्तया ॥ ५२ ॥

*

१ कुर्वन् ? पु० ॥

वैचित्र्यं चित्रकूटे कटकविटपिनामीक्षमाणः समक्षं,
लक्ष्म्याः सीताभिधायाः स धुरि धनवतां श्रीधरो वः करोतु ।
कैकेयी तं [1]सुवित्वा सुतमतनुगुणं यं च कृत्वा विभूति-
भ्रष्टं शुक्लाष्टमीव स्फुटमजनि जने सप्रकाशाऽप्रकाशा ॥ ५३ ॥

[हृदयरञ्जनी]

वैचित्र्यमिति । 'स श्रीधरः' श्रीभर्त्ता रामावतारः 'वः' युष्मान् 'धनवतां' लक्ष्मीवतां 'धुरि' प्रथमं 'करोतु' मुख्यं विदध्यादिति । किंकुर्वाणः ? 'सीताभिधायाः' सीतेति अभिधा—नाम यस्याः सा तस्या लक्ष्म्याः 'समक्षं' सन्निधाने 'चित्रकूटपर्वते' चित्राणि—नानाप्रकाराणि कूटानि—शिखराणि यस्य तस्मिन् 'कटकविटपिनां' कटकः—नितम्बः तत्र ये विटपिनः—वृक्षास्तेषां वैचित्र्यं—विचित्रतां 'ईक्षमाणः' पश्यन् । स कः ? कैकेयी तं 'अतनुगुणं' अतनवः—महान्तो गुणा यस्य तं 'सुतं' भरतं 'सुवित्वा' जनयित्वा 'च' अपरं 'यं' रामं 'विभूतिभ्रष्टं' ऐश्वर्याद् भ्रष्टं—पतितं गतैश्वर्यं कृत्वा 'स्फुटं' प्रकटं यथा भवति तथा 'जने' लोके लोकमध्ये 'सप्रकाशा अप्रकाशा च अजनि' पूर्वं 'सप्रकाशा' भरततनयेन प्रकाशसहिता शोभमाना पश्चाद् ऋद्ध्या रामं वियुज्य ['अप्रकाशा'] अशोभा जाता, पूर्वं स्तुत्या पश्चान्निन्द्याऽऽसीदित्यर्थः । केव ? 'शुक्लाष्टमीव' [यथा शुक्लाष्टमी] सप्रकाशाऽप्रकाशा च भवतीति । उपमा ॥ ५३ ॥

[बालबोधिनी]

वैचित्र्यं चित्रकूटे इति । 'स श्रीधरः' रामः 'व' युष्माकं 'धनवतां' आढ्यानां 'धुरि' अग्रगण्यान् करोतु । कीदृशः ? 'चित्रकूटे' तन्नामनि गिरौ सीताभिधाया लक्ष्म्याः 'समक्षं' प्रत्यक्षं यथा स्यात् तथा 'कटकविटपिनां' कटकवृक्षाणां 'वैचित्र्यं' नानाप्रकार-भावं 'ईक्षमाणः' पश्यन् । स कः ? 'कैकेयी' दशरथस्य द्वितीया जाया तं 'अतनुगुणं' बहुसुगुणं 'सुतं' पुत्रं भरतं 'सुवित्वा' प्रसूय 'च' अपरं 'यं' रामं 'विभूतिभ्रष्टं कृत्वा' राज्यसमृद्धेर्भ्रष्टं कृत्वा 'स्फुटं' प्रकटं यथा स्यात् तथा 'जने' लोके शुक्लाष्टमीव सप्रकाशा अप्रकाशा च 'अजनि' बभूव, यथा शुक्लाष्टमी जने स्फुटं प्रकटं आ मध्यरात्रेः सप्रकाशा ततो यामद्वयं अप्रकाशा च जायते तथा कैकेय्यपि भरतजननात् सप्रकाशा बभूव पश्चाद् रामं वने गमयती अप्रकाशा बभूव ॥ ५३ ॥

*

---

१ सवित्वा भा १-२-३-४ ॥

साङ्गत्यं सज्जनैर्वः स जनयतु दिनाधीशवंशावतंसः,
कंसध्वंसी प्रियं[1] यद्वदनसरसिजं लक्ष्मणः[2] प्रेक्षमाणः।
कुण्ठोत्कण्ठः पितर्यप्यजनि जनकजासौहृदय्याज्जनन्या-[3]
मप्यासीत् तस्य भक्त्या भवन इव वनेऽप्यूषतुस्तौ सहर्षम् ॥५४॥

[हृदयरञ्जनी]

साङ्गत्यमिति। 'दिनाधीशवंशावतंसः' सूर्यवंशस्य मुकुटीभूतः 'सः' रामः 'वः' युष्माकं सज्जनैः 'साङ्गत्यं' सान्निध्यं 'जनयतु' उत्पादयतु। [स कः?] 'कंसध्वंसी' स श्रीनारायणः। स कः? लक्ष्मणः 'प्रियं' वल्लभं सकललोकानां प्रियं 'यद्वदनसरसिजं' यस्य—रामस्य वदनकमलं प्रेक्षमाणः सन् 'पितर्यपि' दशरथेऽपि 'कुण्ठोत्कण्ठः' कुण्ठा—गता उत्कण्ठा—उत्सुकता स्नेहो यस्य स मन्दोत्कण्ठः अजनि, तथा 'जनन्यामपि' मातर्यपि कुण्ठोत्कण्ठोऽजनि। कस्मात्? 'जनकजासौहृदय्यात्' शोभनं च तद् हृदयं च सुहृदयं तस्य भावः सौहृदय्यम् यण्, जनकजायाः—सीतायाः सौहृदय्यं तस्मात्। 'तावपि' सीतारामौ 'तस्य भक्त्या' लक्ष्मणसेवया कृत्वा सहर्षं यथा भवति तथा 'भवने' गृहे इव 'वने' अरण्येऽपि 'ऊषतुः' तस्थतुः। परिवृत्तिरलङ्कारः ॥ ५४ ॥

[बालबोधिनी]

साङ्गत्यमिति। 'सः' रामः 'वः' युष्माकं 'सज्जनैः' सत्पुरुषैः समं 'साङ्गत्यं' सङ्गतिभावं 'जनयतु' उत्पादयतु। [4]किंलक्षणः? 'दिनाधीशवंशावतंसः' सूर्यवंशे मुकुटः। स कः? लक्ष्मणः 'प्रियं' वल्लभं 'यद्वदनसरसिजं' यस्य—रामस्य मुखपङ्कजं 'वीक्षमाणः' पश्यन् सन् 'पितर्यपि' दशरथेऽपि कुण्ठोत्कण्ठः 'अजनि' आसीत्, कुण्ठा-कुण्ठिता उत्कण्ठा यस्य स तादृक्। 'च' पुनः यो लक्ष्मणः 'जनकजासौहृदात्' सीतामित्रभावाद् 'जनन्यामपि' सुमित्रायामपि कुण्ठोत्कण्ठोऽजनि तस्य भक्त्या कृत्वा 'तौ' सीतारामौ वनेऽपि सहर्षं यथा स्यात् तथा 'भवने इव' गृहे इव 'ऊषतुः' वासं कृतवन्तौ ॥ ५४ ॥

*

सन्दोहे पादपानां विकिरति कुसुमस्तोममुच्चैः पिकानां,
गीते नृत्यं श्रितासु व्रततिषु मरुता कीचकेषु ध्वनत्सु।

---

१ श्रियं भा १ ॥ २ °णो वीक्ष° भा ३-४। एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते। ३ °हृदाद् यो जन° भा ३-४। एतत्पाठभेदानुसारेण बालबोधिन्यां व्याख्या वर्त्तते॥ ४ कीदृशः? पु० ॥

सङ्गीतं काननेन प्रथितमिव मुदा यत्र नाथे त्रयाणां,
लोकानामभ्युपेते स भवदवभयात् पातु पीताम्बरो वः ॥ ५५ ॥

[हृदयरञ्जनी]

सन्दोहे इति । सः 'पीताम्बरः' पीते अम्बरे—वाससी यस्य स पीताम्बरः 'वः' युष्मान् 'पातु' अवतु । कस्मात्? 'भवदवभयाद्' भवः—संसारः स एव दवः—दावाग्निः तस्माद् रक्षत्वित्यर्थः । स इति कः? त्रयाणां लोकानां 'नाथे' स्वामिनि 'यत्र' रामे 'अभ्युपेते सति' आगच्छति सति काननेन सङ्गीतं 'प्रथितं कृतमनुष्ठितमित्युत्प्रेक्षा । कया? 'मुदा' हर्षेण । लोके इयं स्थितिः—महापुरुषे साधौ प्राघूर्णिकतया गृहमागते सति नृत्यादिकं महोत्सवं करोति युक्तमेतत्, गृहिणामेतत् सम्भवति, वनस्याचेतनत्वात् कानने कथं सङ्गीतं सामग्र्यभावात् अनुष्ठितम्? इति "गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते" तदेतत् प्रतिपादयितुमाह—तत्र नृत्यारम्भे प्रथमं पुष्पाञ्जलिर्भवति तत्राह—क सति? पादपानां 'सन्दोहे' समूहे 'कुसुमस्तोमं' पुष्पनिकरं विकिरति सति वृक्षैः पुष्पाञ्जलिः कृतः, अपरं कृति(?) पिकानां सन्दोहे उच्चैः 'गीते सति' गानं कुर्वति सति कोकिलाभिर्गीतमनुष्ठितम्, तथा 'व्रततिषु' वल्लीषु 'नृत्यं श्रितासु सतीसु' नृत्यं—गात्रविक्षेपं अवस्पन्दनं कुर्वतीषु सतीषु, चान्यद् 'मरुता' वायुना 'कीचकेषु ध्वनत्सु' कीचकैर्ध्वनितमिति । एतत्त्रयं काननेन रामे गृहमागते सम्पादितमिति । उत्प्रेक्षालङ्कारः । आर्थिकोऽप्यान्तरन्यासः ॥ ५५ ॥

[बालबोधिनी]

सन्दोहे पाऽदिति । सः 'पीताम्बरः' रामः 'वः' युष्मान् 'भवदवभयात् पातु' भवः—संसारः दवः—दावानल इव तस्मात् भयं तस्माद् । स कः? उत्प्रेक्षते—'यत्र' यस्मिन् रामे त्रयाणां लोकानां 'नाथे' स्वामिनि वनमभ्युपेते सति 'काननेन' वनेन 'मुदा' हर्षेण कृत्वा सङ्गीतं 'प्रथितमिव' विस्तृतमिव । क सति? 'पादपानां' वृक्षाणां 'सन्दोहे' समूहे 'कुसुमस्तोमं' पुष्पसमूहं 'विकिरति' प्रक्षिपति सति । पुनः क सति? 'उच्चैः' उच्चस्वरेण 'पिकानां' कोकिलानां गीते सति । पुनः क सतीषु? 'व्रततिषु' वल्लीषु 'मरुता' वायुना कृत्वा नृत्यं 'श्रितासु' आश्रितासु । पुनः क सत्सु? मरुता 'कीचकेषु' सच्छिद्रवंशेषु 'ध्वनत्सु' शब्दायमानेषु ॥ ५५ ॥

*

देयाद् दामोदरो वस्त्रिभुवनविभुतां जानकी येन साकं,
मार्गे दुर्गेऽपि यान्ती कमलदलमृदुः खिद्यतां सा कथं तु?।

---

१ नु भा १-२-३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते ॥

नित्यं पत्योह्यमाना हृदयविनिहिता प्रेमभारं स्वमुच्चै-
स्तस्मिन्नेवादधाना विदधति निभृतं पादसंवा[1]हनं च ॥ ५६ ॥

[हृदयरञ्जनी]

देयाद् दामोदरो इति । सः 'दामोदरः' रामः 'वः' युष्माकं 'त्रिभुवनविभुतां' त्रैलोक्याधिपत्यं 'देयाद्' दिश्यात् । स कः ? 'येन' रामेण 'साकं' सह 'दुर्गेऽपि' संकटेऽपि मार्गे 'यान्ती' गच्छन्ती जानकी 'तु' पुनः 'कथं खिद्यतां' कथमिव खेदं—श्रान्तिं प्राप्नोतु ? न कथमपीत्यर्थः । यतः सा एवंविधा 'पत्या उह्यमाना' पत्या—रामेण उह्यमाना—नीयमाना । पुनः किंलक्षणा ? 'हृदयविनिहिता' हृदये आरोप्यमाणा । पुनः किंलक्षणा ? 'कमलदलमृदुः' उत्पलपत्रकोमला । पुनः किंलक्षणा ? 'तस्मिन्नेव' रामे 'ऊच्चैः' अतिशयं ['स्वं'] स्वकीयं 'प्रेमभारं' स्नेहोत्कर्षं आदधाना, सर्वात्मना तमेव पश्यन्तीत्यर्थः । क सति ? 'च' अन्यत् तस्मिन् रामे 'निभृतं' गुप्तं यथा भवति तथा पादसंवाहनं च विदधति सति, श्रान्तायां सत्यां चरणपीडनं कुर्वतीत्यर्थः, अत एवास्याः खेदो मा भूदिति भावः । अनुमानालङ्कारः, अर्थान्तरन्यासोऽपि ॥ ५६ ॥

[बालबोधिनी]

देयाद् दामोदरो इति । सः 'दामोदरः' रामः 'वः' [2]युष्मभ्यं 'त्रिभुवनविभुतां' स्वर्ग-मृत्यु-पातालस्वामित्वं 'देयाद्' ददातु । स कः ? 'जानकी' सीता 'येन' रामेण साकं 'दुर्गेऽपि' कठिनेऽपि मार्गे 'यान्ती' गच्छन्ती सती 'कमलदलमृदुरपि' कमलदलवत् कोमलाऽपि कथं नु खिद्यताम् ? न कथमपि, काकूक्त्या व्याख्येयम् । अत्र सम्भावनायां लोट् । कीदृशी जानकी ? 'नित्यं' प्रतिदिनं 'पत्या' रामेण 'हृदयविनिहिता' हृदये आरोपिता सती 'उह्यमाना' नीयमाना । पुनः कीदृशी ? 'निभृतं' प्रच्छन्नं यथा स्यात् तथा 'पादसंवाहनां' चरणसेवां 'विदधति' कुर्वति, 'तस्मिन्नेव' पतिविषये श्रीरामे 'स्वं' स्वकीयं 'उच्चैः' बहुलं 'प्रेमभारं' प्रीतिभारं 'आदधाना' मुञ्चमाना ॥ ५६ ॥

*

सावित्रं यत्र तेजः श्रितवति शमिनामाश्र[3]मं चाश्रमं च,
प्राप्ते होमाग्निधूमच्[4]छलित इव तमोराशिराशु प्रनष्टः ।

---

१ °हनां च भा १-२-३-४ ॥ एतत्पाठानुसारेणैव बालबोधिन्यां व्याख्या वर्त्तते ॥ २ युष्माकं 'त्रि° भा १-२ ॥ ३ °श्रयादाश्रमं च भा ३-४ । °श्रमादाश्रमं च इति पाठानुसारेण बालबोधिन्यां व्याख्यानं दृश्यते ॥ ४ °च्छलत भा १-२-३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्तते ॥

निष्कर्माः कर्म चक्रुः किमपि यदृषयस्तत्फलं तेषु यच्छ-
न्नालोकादेव देवः स दिशतु सुदशामीश्वरांशः स्थिरां वः ॥ ५७॥

[हृदयरञ्जनी]

सावित्रं चेति। स ईश्वरांशो देवः स्थिरां सुदशां 'दिशतु' यच्छतु 'वः' युष्माकम्। दशामिति पुत्र-पौत्रादिसम्पदुपेतामवस्थामिति। स कः? 'शमिनां' शमो विद्यते येषां ते शमिनः [तेषां] शमवतां मुनीनां 'तमोराशिः' तमः—अज्ञानं तस्य राशिरिव राशिः—पुञ्जः समूहः 'प्रनष्टः' प्रकर्षेण नष्टः—गतः। क्व सति? 'यत्र' यस्मिन् रामेऽश्रममाश्रमं प्राप्ते सति। किंलक्षणे रामे? 'सावित्रं' सवितुरिदं सावित्रं—सूर्यसम्बन्धि तेजः श्रितवति, यथा सूर्यतेजसि आश्रमं प्राप्ते सति तमोराशिः नश्यति तद्वदित्यर्थः। उपमा। उत्प्रेक्ष्यते—किंलक्षणोऽन्धकारराशिः? 'होमाग्निधूमच्छलित इव' होमाग्निधूमेन च्छलितः—नाशितः ज्ञायत इति ऋषीणां गृहिणां च होमधूमसम्पर्केण पापराशिर्याति, यथा लोके धूमे छलितो व्याप्तो जनः पलाय्य गच्छति तद्वदिति। किं कुर्वन्? ऋषयः निष्कर्माः सन्तः ब्रह्मनिष्ठाः मुमुक्षवः ब्रह्मार्पणवुध्या यत् 'कर्म' यागादि सन्ध्यावन्दनादि जपादि यत् कर्म चक्रुः मोक्षप्राप्तये तेषु ऋषिषु 'तत्फलं' मोक्षलक्षणं फलं यच्छन्। कस्मात्? 'आलोकादेव' दर्शनमात्रादेव मुनीनामभवदिति तात्पर्यार्थः। उपमोत्प्रेक्षाऽलङ्कारौ। अनुप्रासः। वैदर्भी रीतिः। माधुर्यं गुणः। यथा माधुर्यलक्षणम्—

"मूर्ध्नि वर्गान्त्यगाः स्पर्शाः अटवर्गा रणौ लघू।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा॥" ॥ ५७ ॥

[बालबोधिनी]

सावित्रं यत्रेति। स ईश्वरांशो ['देवः'] रामः 'वः' [3]युष्माकं 'स्थिरां' निश्चलां 'सुदशां' शोभनावस्थां 'दिशतु' ददातु। किं कुर्वन्? 'ऋषयः' वनस्था मुनयः 'निष्कामाः' स्वर्गकामादिवाञ्छनारहिताः सन्तः 'यत् किमपि' श्रौतं स्मार्त्तं च कर्म चक्रुः तेषु ऋषिषु 'तत्फलं' तस्य—कर्मणः फलं 'आलोकादेव' दर्शनमात्रादेव 'यच्छन्' प्रयच्छन्, यतः स्वर्गादिकामनारहितस्य कर्मणः रामदर्शनमेव प्रयोजनं तच्च जातम्। स कः? 'यत्र' यस्मिन् 'सावित्रं' सवितुः सम्बन्धि तेजः 'श्रितवति' आश्रितवति श्रीरामे 'शमिनां' ऋषीणां 'अश्रमन्' अश्रमादाश्रमं प्राप्ते सति। उत्प्रेक्षते—'होमाग्निधूमच्छलतः' होमवह्निधूमभिषाद् 'आशु' शीघ्रं 'तमोराशिः' पापसमूहः 'प्रनष्ट इव' गत इव ॥ ५७ ॥

---

१ निष्कामाः कर्म भा १-२-३-४। एतत्पाठानुसारेणैव बालबोधिन्यां व्याख्याऽस्ति॥
२ सुदिशा॰ भा २॥ ३ युष्मभ्यं स्थि॰ पु॰॥

सव्याघ्रां व्याघ्रतुल्यो घनवनमहिषां यः प्रहृष्यन् महिष्या,
शैलोत्तुङ्गः सशैलां मदनमयवयाः सेव्यमानां वयोभिः।
सद्वृक्षां कल्पवृक्षप्रतिकृतिरविशद् दण्डकारण्यभूमिं,
कोदण्डोद्दण्डबाहुर्बहुभिरभिमतैः सोऽन्वितान् वः करोतु॥ ५८॥

[हृदयरञ्जनी]

सव्याघ्रामिति। 'सः' रामः 'वः' युष्मान् 'बहुभिः' अनेकैः 'अभिमतैः' वल्लभपदार्थैरन्वितान् करोतु। स कः? 'यः' रामः दण्डकारण्यभूमिं अविशत्। किम्भूतां दण्डकारण्यभूमिम्? किंलक्षणः रामः? उभयोः शब्दसाम्यात् श्लेषालङ्कारेणाऽऽह— किंलक्षणां भूमिम्? ['सव्याघ्रां' व्याघ्रसहिताम्। किंलक्षणो रामः? 'व्याघ्रतुल्यः' व्याघ्रसमः। पुनः किंलक्षणां भूमिम्?] 'घनवनमहिषां' घनाः—अनेके वनमहिषाः—गवयाः यस्यां सा ताम्। किंलक्षणो रामः? 'महिष्या' कृताभिषेकया सीतया 'प्रहृष्यन्' सन्तुष्यमाणः, "कृताभिषेका महिषी भोगिन्योऽन्या नृपस्त्रियः" **इत्यमरः** [का० २ मनुष्यवर्ग श्लो० ५]। पुनः किंलक्षणाम्? 'सशैलां' पर्वतसहिताम्। किंलक्षणो रामः? 'शैलोत्तुङ्गः' शैलप्रांशुः सारवांश्च। पुनः किंलक्षणः रामः? 'मदनमयवयाः' मदनप्राचुर्येण प्रस्तुतोऽत्र मदनमयं वयो यस्य स मदनमयवयाः, तरुण इत्यर्थः। किंलक्षणां भूमिम्? 'वयोभिः' पक्षिभिः 'सेव्यमानां' पक्षियुक्ताम्। पुनः किंलक्षणाम्? 'सवृक्षां' वृक्षैः सह वर्त्तते विटपिमतीम्। किंलक्षणो रामः? 'कल्पवृक्षप्रतिकृतिः' कल्पवृक्षस्य प्रतिनिधिः, वा कल्पवृक्षः प्रतिकृतिः—प्रतिनिधिरन्यो यस्य सः। किंविधो रामः? 'कोदण्डोद्दण्डबाहुः' कोदण्डेन—धनुषा उद्दण्डौ—भीषणौ बाहू—भुजौ यस्य। एवंलक्षणो रामः एवम्भूतामटवीमटन् वः पूर्णमनोरथान् करोतु इत्याशीः॥ ५८॥

[बालबोधिनी]

सव्याघ्रां व्याघ्रेति। स रामः 'वः' युष्मान् बहुभिः 'अभिमतैः' वाञ्छितैः 'अन्वितान्' युक्तान् करोतु। स कः? 'यः' रामः 'दण्डकारण्यभूमिमविशद्' दण्डकवद् दीर्घं अरण्यं—वनं दण्डकारण्यं तत्सम्बन्धिनी भूमिः तां प्राविशत्। कीदृशः? 'कोदण्डोद्दण्डबाहुः' कोदण्डवत्—चापवद् उद्दण्डौ—महान्तौ बाहू—हस्तौ यस्यासौ तादृशः। समग्रेणापि रामदण्डकारण्ययोः साम्यं उच्यते। कीदृशीं दण्डकारण्यभूमिम्? 'सव्याघ्रां' सहविद्यमाना व्याघ्रा यस्यां सा ताम्। कीदृशो रामः? 'व्याघ्रतुल्यः' व्याघ्रेण समः। कीदृशीम्? 'घनवनमहिषां' वनस्य महिषा वनमाहिषाः, घनाः—बहवो वनमहिषा यस्यां सा ताम्। रामः

'महिष्या' प्रथमपरिणीतया सीतया कृत्वा 'प्रहृष्यन्' 'हर्षयुक्तो वर्त्तते। 'सशैलां' सह-विद्यमानाः शैलाः—पर्वता यस्याम्। 'शैलोत्तुङ्गः' शैलवद् उत्तुङ्गः—उच्चः। किंलक्षणाम्? 'वयोभिः' पक्षिभिः सेव्यमानाम्। 'मदनमयवयाः' मदनमयं—कन्दर्पमयं वयः—यौवनं यस्यासौ मदनमयवयाः। 'सद्वृक्षां' सन्तः—साधवः विद्यमाना वा वृक्षा यस्यां सा ताम्। कीदृशः? 'कल्पवृक्षप्रतिकृतिः' कल्पवृक्षवत् प्रतिकृतिः—स्वभावो यस्यासौ कल्पवृक्षप्रतिकृतिः ॥ ५८॥

*

श्रीकान्तः पातु युष्मानुषितमधुकरस्मेरपुष्पेक्षणाभिः,
कान्तारे प्रेक्ष्यमाणो व्रततियुवतिभिर्निश्चलं[2] विस्मिताभिः।
गङ्गामित्रैश्चरित्रैः प्रमुदितहृदया साऽत्रिनारी व्यतारी-
न्मैथिल्यामङ्गरागं त्रिभुवनसुभगोऽनङ्गरागं पुनर्यः ॥ ५९ ॥

[**हृदयरञ्जनी**]

श्रीकान्तः इति। 'श्रीकान्तः' लक्ष्मीकान्तः 'वः' युष्मान् 'पातु' रक्षतु। किम्भूतो रामः? 'कान्तारे' दण्डकारण्ये 'व्रततियुवतिभिः' व्रतत्य एव युवतयः—अङ्गनाः ताभिः निश्चलं यथा भवति तथा 'प्रेक्ष्यमाणः' विलोक्यमानः। किंविधाभिर्युवतिभिः? 'उषितमधुकरस्मेर-पुष्पेक्षणाभिः' उषिताः—उपविष्टाः मधुकराः—भ्रमरा येषु तानि उषितमधुकराणि, [स्मेराणि—] विकसितानि यानि पुष्पाणि, कर्मधारयः, तान्येव ईक्षणानि—लोचनानि यासां ताभिः। पुनः किम्भूताभिः? 'विस्मिताभिः' विकसिताभिः। स कः? 'यः' रामः 'यस्याः' सीतायाः 'अनङ्गरागं व्यतारीद्' कन्दर्पानुरागं विस्तारयति स्म। सा 'अत्रिनारी' अनसूया तस्यां 'मैथिल्यां' सीतायां 'अङ्गरागं व्यतारीद्' अङ्गे अङ्गरागं लिम्पति स्म। किम्भूता अत्रिनारी? 'गङ्गामित्रैः' गङ्गावत् पवित्रैः चरित्रैः—आचारैः 'प्रमुदितहृदया' हृष्टचित्ता, राम-सीतयोरिति शेषः यस्या अङ्गरागं अनसूया जनयति स्म, रामस्तस्यां अनङ्गरागं जनयति स्मेति विरोधः, परिहारस्तु—एकत्राङ्गरागोऽनुलेपनविशेषः, अपरत्र मदनातुरा इति। किम्भूतो रामः? 'त्रिभुवनसुभगः' त्रैलोक्यसुन्दरो रमणीयः, अङ्गरागोऽपि तादृशः विभक्तिव्यत्ययेन योज्यम्। प्रथमार्द्धे रूपकोपमा।

"उपमैव तिरोभूतभेदा रूपकमिष्यते।"

व्रतति-युवतयोरभेदत्वादुत्तरार्द्धे विरोधाभासः ॥ ५९ ॥

[बालबोधिनी]

श्रीकान्तः पात्विति। सः 'श्रीकान्तः' रामः 'वः' युष्मान् पातु। कीदृशो रामः? 'कान्तारे'

१ हृष्टो व पु० ॥ २ निश्चितं भा १-२-३-४। एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्तते ॥

वने 'व्रततियुवतिभिः' वल्ल्य एव युवतयः–स्त्रियः ताभिः 'निश्चितं' अवश्यं 'विस्मिताभिः' आश्चर्ययुक्ताभिः 'प्रेक्ष्यमाणः' दृश्यमानः। कीदृशाभिः ताभिः? 'उषितमधुकरस्मेरपुष्पेक्षणाभिः' उपविष्टमधुकराणि स्मेराणि पुष्पाण्येव ईक्षणानि यासां तास्तथा ताभिः। स कः? सा 'अत्रिनारी' अनसूया 'मैथिल्यां' सीतायां 'अङ्गरागं' अङ्गेषु रागः अङ्गरागः तं 'व्यतारीत्' चकार। पुनर्यो रामः मैथिल्यां 'अनङ्गरागं' कन्दर्परागं 'व्यतारीत्' चकार। कीदृशी अत्रिनारी? 'गङ्गामित्रैश्चरित्रैः प्रमुदितहृदया' गङ्गोदकवत् [पवित्रैः] चरित्रैः–आचरणैः कृत्वा हृष्टचित्ता। कीदृशो रामः? 'त्रिभुवनसुभगः' त्रीणि भुवनानि त्रिभुवनं तस्मिन् सुभगः–सुन्दरः॥ ५९॥

*

देवः स्वच्छस्वभावो ह्रद इव सरितः शूलिमौलिस्थितायाः
सीतामङ्के दधानः स्फुटितपुटकिनी[1]वक्त्रसौभाग्यभाजम्।
हंसेनेवानुजेन क्षणमपि नपरित्यक्तपार्श्वश्च युष्मत्-
तृष्णां मुष्णातु[2] कुम्भोद्भवमुनिभवनात्[3] पञ्चवट्यां निविष्टः[4]॥६०॥

[हृदयरञ्जनी]

देव इति। 'देवः' स रामः युष्मत्तृष्णां 'मुष्णातु' अपहरतु। क इव? 'शूलिमौलिस्थितायाः सरितः ह्रद इव' यथा गङ्गाप्रवाहः तृष्णां–पिपासां हरति तथेति। शूलमस्यास्तीति शूली "अत इनि–ठनौ" [पाणिनि० ५–२–११५] इति इन्, श्रीमहादेवः, तस्य मौलिः–मस्तकं तत्र स्थिता तस्याः, 'सरितः' गङ्गायाः 'ह्रदः' निश्चलोदकावस्थानप्रदेशविशेषो ह्रदः, युष्मदित्युपलक्षणम्, संसारावर्त्तपतितानां लोकानां संसारविषयां तृष्णां सुख-दुःखोपभोगलक्षणां गङ्गाप्रवाहोऽपहरति तथाऽयं राम इति व्यङ्ग्योऽर्थः। अस्मिन्नर्थे हेतुगर्भविशेषणमाह–किंलक्षणो रामः? 'स्वच्छस्वभावः' स्वच्छः–निर्मलः स्वभावो यस्य, निर्लेपत्वात् संसारपङ्कास्पृष्टः शुद्धमुक्तस्वभाव इति, ह्रदोऽपि 'स्वच्छस्वभावः' अगाधोदकत्वादकलुषः। किंलक्षणः? 'सीतामङ्के दधानः' जानकीमुत्सङ्गे बिभ्रत्, ह्रदोऽपि 'सीतां' सारसीमङ्के बिभ्राणः। किम्भूतां सीताम्? 'स्फुटितपुटकिनीवक्त्रसौभाग्यभाजं' स्फुटितं–विकसितं यत् पुटकिनी–कमलिनी तस्या वक्त्रं कमलं कमलिनी कमलेषु क्रीडया सौभाग्यभाग् भवति ताम्। पुनः किंलक्षणः रामः? 'अनुजेन'

---

१ °पुलकिनीं व° भा ३-४। एतत्पाठानुसारेण बालबोधिन्यां व्याख्यातमस्ति। २ पुष्णातु भा १-३-४। एतत्पाठानुसारेण बालबोधिन्यां व्याख्या वर्त्तते॥ ३ °मुनिवचनात् भा १॥ ४ निषण्णः भा ३-४, एतत्पाठानुसारेण बालबोधिन्यां व्याख्या दृश्यते॥

लक्ष्मणेन क्षणमपि 'नपरित्यक्तपार्श्वः' त्यक्तं पार्श्वं—समीपं यस्य सः, न नञा सह समासः, 'नपरित्यक्तपार्श्वः' हृदोऽपि हंसेन न त्यजते । स कः रामः ? 'यः' रामः 'कुम्भोद्भवमुनिभवनाद्' अगस्त्याश्रमात् 'पञ्चवट्यां निविष्टः' पञ्च वटाः विद्यन्ते यस्यां सा पञ्चवटी, गर्त्ता वा इति, [तस्यां] 'निविष्टः' प्राप्तः अगस्त्याश्रमात्, इन्द्रशरासना-ऽक्षयतूणीर-खड्गाप्तिः सूचिता अगस्त्यभवनादिति पदेन । तथोक्तम्—

अगस्त्यवचनाच्चैव जग्राहैन्द्रं शरासनम् ।
खड्गं च परमप्रीतस्तूणीरा-ऽक्षयसायकौ ॥ इति ॥

उपमालङ्कारः ॥ ६० ॥

[बालबोधिनी]

देव इति । 'देवः' स रामः 'युष्मत्तृष्णां' युष्माकं इच्छां 'पुष्णातु' पूरयतु । कीदृशः ? 'कुम्भोद्भवमुनिभवनात् पञ्चवट्यां' अगस्त्याश्रमात् पञ्चवटीविषये 'निषण्णः' उपविष्टः । कीदृशो देवः ? 'स्वच्छस्वभावः' निर्मलचित्तः । पुनः कीदृशः ? सीतामङ्के 'दधानः' बिभ्रत् । किंलक्षणाम् ? 'स्फुटितपुलकिनीं' स्फुटितानि पुलकानि यस्याः सा तां रोमाञ्चवतीम् । पुनः किम्भूताम् ? 'वक्त्रसौभाग्यभाजं' मुखसौन्दर्यं भजतीति वक्त्रसौभाग्यभाक् ताम् । पुनः कीदृशः ? उत्प्रेक्षते—शूलिमौलिस्थितायाः 'सरितः' गङ्गाया ह्रद इव । शूलमस्यास्तीति शूली तस्य मौलिः—मस्तकं तस्मिन् स्थिता तस्याः । कीदृशो ह्रदः ? 'स्वच्छस्वभावः' स्वच्छः-निर्मलः स्वभावो यस्यासौ । कीदृशः ? हंसेन इव 'अनुजेन' लक्ष्मणेन क्षणमपि 'नपरित्यक्तपार्श्वः' यथा हंसेन गङ्गाया ह्रदः क्षणमपि नपरित्यक्तपार्श्वो भवति ॥ ६० ॥

*

काकेभ्यः [1]कायकान्तिं तदरिपरिचितं शब्दत[2]त्त्वं च नीत्वा
गार्ध्रीं क्रव्येषु गर्द्धीं [3]तदपरमुचितं वस्तु तादृग्विधं च ।
एकं पात्रं धरित्र्यां किल कमलभुवा या कृता यातुधानी
द्राक् तां व्यग्रामनुग्रप्रकृतिरकृत यः स क्षताद् रक्षताद् वः ॥६१॥

[हृदयरञ्जनी]

काकेभ्यः कायेति । 'सः' रामः 'वः' युष्मान् 'क्षताद्' प्रहाराद् अव्याद् रक्षतु । स कः ? 'यः' रामः 'अनुग्रप्रकृतिः' अनुग्रा—सौम्या प्रकृतिः—स्वभावो यस्य सः

१ कालका° भा २ ॥ २ °त्त्वं गृहीत्वा भा ३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्याऽस्ति ॥
३ किमपर° भा १-२-३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्यानं वर्त्तते ॥

सन्नपि तां 'यातुधानीं' राक्षसीं 'व्यग्रां अकृत' उल्बणामकार्षीद् 'द्राक्' तत्क्षणमेव । व्यग्रामिति विशेषणेन अर्थद्वयं सूच्यते । कथम्? रामदर्शनेन मन्मथवशा सती व्यग्रा जातेति, अथ च रामास्वीकाराद् व्यग्रेति। सा का यातुधानी? 'कमलभुवा' ब्रह्मणा 'कृता' निर्मिता 'किल' इति कष्टे । किं कृत्वा कां सामग्रीं मेलयित्वा? तां सामग्रीमाह— 'काकेभ्यः' वायसेभ्यः 'कायकान्ति' शरीरद्युतिं कृष्णत्वम् । 'तदरिपरिचितं' तेषां—काकानां अरयः—उलूकाः तेषां परिचितं—अभ्यस्तं यद् निशाचरत्वं रात्रिभ्रमणत्वं च तेषां 'शब्दतत्त्वं च' उलूकध्वनिं च । तथा 'गार्ध्रीं' गृध्रसम्बन्धिनीं 'क्रव्येषु' मांसेषु 'गर्द्धां' भक्षणाकाङ्क्षालोलुपत्वं च गृहीत्वा । 'अपरं' एतच्च तदस्य 'उचितं' योग्यं तादृग्विधं च धरित्र्यां एकं 'पात्रं' आधारं 'नीत्वा' कृत्वा 'व्यधायि' निर्मिता तां विकृतरूपां कुर्वन् वः पायादिति सम्बन्धः । अनुग्रो व्यग्रां करोतीति विरोधः ॥ ६१ ॥

[बालबोधिनी]

काकेभ्य इति। 'सः' रामः 'वः' युष्मान् 'क्षताद्' भयाद् रक्षतात्। स कः? 'यः' रामः 'तां यातुधानीं' राक्षसीं सूर्पणखां 'व्यग्रां' छिन्ननासिकामकृत। कीदृशः? 'अनुग्रप्रकृतिः' न उग्रा प्रकृतिः—स्वभावो यस्यासौ अनुग्रप्रकृतिः। तां काम्? 'कमलभुवा' ब्रह्मणा धरित्र्यां एकमेव पात्रं या 'यातुधानी' सूर्पणखा 'निर्मिता' कृता। किं कृत्वा? काकेभ्यः सकाशात् 'कायकान्ति' शरीरशोभां 'गृहीत्वा' आदाय। पुनः किं कृत्वा? 'तदरिपरिचितं शब्दतत्त्वं गृहीत्वा' तेषां—काकानां अरयः—उलूकाः तेषु परिचितं—अभ्यस्तं यत् 'शब्दतत्त्वं' शब्दरहस्यं तद् गृहीत्वा। पुनः किं कृत्वा? 'क्रव्येषु' मांसेषु गार्ध्रीं गृध्रसम्बन्धिनीं 'गर्द्धां' स्पृहां गृहीत्वा। यतोऽपरं तादृग्विधं 'उचितं' योग्यं वस्तु किम्? न किमपि, अत एव एकं पात्रं ब्रह्मणा यातुधानी निर्मितेति ॥ ६१ ॥

*

देयादायुः प्रभूतं विपिनभुवि स वः सञ्चरंश्चारुमूर्त्ति-
र्मायापुंस्केसरित्वे भयकृति जगतां यं प्रवृत्तावतारम् ।
सा रक्षःस्वामिजामिः खरनखरवती बिभ्रती रौद्रमास्यं
[1]यद्यागच्छेद् वृषस्यन्त्यहह! तदनयोः स्यात् तदा साधुयोगः ॥६२॥[2]

[हृदयरञ्जनी]

देयादायुरिति। 'सः' रामः 'वः' युष्माकं 'प्रभूतं' विपुलं 'आयुः' जीवितं देयात्। किं कुर्वन्? 'विपिनभुवि' कानननभूमौ 'सञ्चरन्' भ्रममाणः । पुनः किंलक्षणः?

---

१ यद्यायास्यद् भा २-३-४ । एतत्पाठानुसारेण बालबोधिन्यां व्याख्याऽस्ति ॥

२ व्याख्याद्वयेऽपि नास्य काव्यस्य समीचीनाऽर्थसङ्गतिरवगम्यते ॥

'चारुमूर्त्तिः' चारुः—रमणीया मूर्त्तिः—देहो यस्य सः। स कः? 'सा' यातुधानी 'रक्षः-स्वामिजामिः' रक्षःस्वामी—रावणः तस्य जामिः—भगिनी सूर्पणखा 'वृषस्यन्ती सती' वृषं—भर्त्तारमात्मन इच्छन्तीति वृषस्यन्ती सती यदि रामं 'आगच्छेद्' मिलेद् 'अहह' इति कष्टे 'तदा' तर्हि 'अनयोः' राम-सूर्पणखयोः साधुयोगः 'स्याद्' भवेत्। किं कुर्वती सा? 'रौद्रमास्यं बिभ्रती' भयङ्करं मुखं बिभ्राणा। कीदृशो रामः? चारुमूर्त्तिः। किम्भूतम्? 'यं' रामं जगतां भयकृति 'मायापुंस्केसरित्वे' मायायां पुरुषसिंहत्वे रावणे 'प्रवृत्तावतारं' प्रवृत्तः—कृतः अवतारः—अवतरणं येन तम्, रावणवधार्थं कृतावतारमित्यर्थः। किंलक्षणा सूर्पणखा? 'खरनखरवती' खराः—तीक्ष्णाः नखाः अस्याः सन्तीति खरनखरवती। भयं करोतीति भयकृत् तस्मिन्। भावशबलता॥ ६२॥

[बालबोधिनी]

देयादायुरिति। 'सः' रामः 'वः' युष्माकं 'प्रभूतं' प्रवृद्धं आयुः देयात्। किं कुर्वन्? 'विपिनभुवि' वने 'सञ्चरन्' गच्छन्। कीदृशः? 'चारुमूर्त्तिः' चारुः—मनोहरा मूर्त्तिर्यस्यासौ। स कः? सा 'रक्षःस्वामिजामिः' रावणभगिनी सूर्पणखा खरनखरवती 'रौद्रं आस्यं' भयङ्करं मुखं दधती 'वृषस्यन्ती' रामं पतिमिच्छन्ती मायापुंस्केसरित्वे जगतां भयकृति यं रामं 'प्रवृत्तावतारं' नृसिंहावतारे प्रवर्त्तमानं सन्तं प्रति यदि आयास्यत् 'तत्' तर्हि तदा तस्मिन् अवसरे 'अहह' [1]इति आश्चर्ये 'अनयोः' राम-सूर्पणखयोः साधुयोगः स्यात्। रक्षसां स्वामी तस्य जामिः—भगिनी रक्षःस्वामिजामिः। खरश्च नखरश्च खर-नखरौ तौ विद्येते यस्याः सा खरनखरवती। वृषं आत्मनः इच्छन्तीति वृषस्यन्ती "अश्वक्षीरवृषलवणानामात्मप्रीतौ क्यचि" [पाणिनि० ७-१-५१] इत्यसुक्। पुमांश्चासौ केसरी च पुंस्केसरी, मायया पुंस्केसरी तस्य भावः तत्त्वं तस्मिन्। जगतां 'भयकृति' भयं करोतीति भयकृत् तस्मिन्॥ ६२॥

*

भ्रातुर्भक्तस्य यद्यप्यदित रघुपतिः पादुके स्वे तथापि
क्रामन् न प्राप पीडां विपिनभुवि [2]खरान् कण्टकादींस्ततोऽपि।
शस्त्राभ्यासाय शङ्के त्रिशिरसमवधीद् यश्च जेष्यन् दशास्यं
श्रीलास्यं गेहरङ्गे रचयतु स चिरं दूषणद्वे[3]षिणो वः॥ ६३॥

[हृदयरञ्जनी]

भ्रातुर्भक्तस्येति। सः 'दूषणद्वेषणः' दूषणदैत्यद्वेषी रामः 'वः' युष्मान् 'गेहरङ्गे'

१ इति खेदे 'अ° पु०॥ २ खरात् कण्टकाद् यस्त° भा ३-४। एतत्पाठानुसारेण बालबोधिन्यां व्याख्या॥ ३ °द्वेषणोऽपि भा १-२-३-४॥

गेह एव रङ्गः—नृत्यभूमिस्तत्र श्रीलास्यं—लक्ष्म्याः नृत्यं चिरं 'रचयतु' निर्मातु। स कः? यो रघुपतिः 'भक्तस्य' सेवकस्य 'भ्रातुः' भरतस्यापि स्वे पादुके 'अदित' दत्तवान् तथापि वनभुवि 'खरान्' तीक्ष्णान् 'कण्टकादीन्' बुर्बुरादीन् कण्टकानाक्रामन् पीडां 'न प्राप' न लेभे [इति] विरोधः। कथम्? यः पादत्राणरहितः कण्टकान् मृद्नाति स तज्जनितां व्यथां प्राप्नोति, न तथापि, परिहारः—स्वयमसौ रामः भरताय राज्यपालनार्थं आत्मनः प्रतिकृतिं पादुके दत्त्वा वनभुवि खरान् लोककण्टकान् राक्षसान् मृद्नन्—मारयन् कष्टं न जगाम, हेलयैव हतवानिति, पञ्चवट्यां दूषणप्रमुखान् राक्षसान् जघानेति भावः। ततो हेतोरहमिति 'शङ्के' तर्कयामि—यः 'त्रिशिरसमवधीत्' त्रीणि विषमाणि शिरांसि यस्य स त्रिशिराः, तं त्रिशिरसं राक्षसं हन्ति स्म। 'दशास्यं' दशमुखं रावणं 'जेष्यन्' जेतुमिच्छन् 'शस्त्राभ्यासाय' शस्त्राभ्यासं कर्तुम्, तुमर्थे चतुर्थी, यो महल्लक्षं विद्धुकामो भवति स पूर्वं निकटवर्त्ति अल्पं लक्षं विध्यति पश्चाद् महति प्रवर्त्तते। विरोधाभासोत्प्रेक्षे॥ ६३॥

[बालबोधिनी]

भ्रातुर्भक्तस्येति। सः 'दूषणद्वेषणः' दूषणनाम्नो राक्षसस्य हन्ता रामः 'वः' युष्माकं 'गेहरङ्गे' गृहाङ्गणे 'श्रीलास्यं' समृद्धिविलासं चिरं 'रचयतु' विस्तारयतु। स कः? 'यः' रामः 'शङ्के' सम्भावयामि 'दशास्यं' रावणं 'जेष्यन्' जेतुमिच्छन् सन् शस्त्राभ्यासाय 'त्रिशिरसं' राक्षसं 'अवधीद्' जघान। त्रीणि शिरांसि यस्य स त्रिशिराः तम्। अपरं कीदृशः रामः? यः 'रघुपतिः' रामो यद्यपि भक्तस्य 'भ्रातुः' भरतस्य 'स्वे' स्वकीये 'पादुके' 'अदित' अदात् तथापि 'विपिनभुवि' वने 'क्रामन्' चरन् सन् 'ततोऽपि' तस्मादपि पादत्राणे 'खरात्' खरराक्षसात् 'पीडां' व्यथां 'न प्राप' न प्राप्तवान्। कीदृशात् खरात्? 'कण्टकात्' कण्टक इव कण्टकः तस्मात्, अन्योऽपि कश्चित् पादत्राणरहितो वने गच्छन् खरात्—तीक्ष्णात् कण्टकात् पीडां प्राप्नोत्येव, रामस्तु पादुकारहितोऽपि खरात् कण्टकात् पीडां नाऽऽप्तवान्। भ्रातुरत्र यद्यपि दानं तथापि सम्प्रदानाभावान्न चतुर्थी, सम्प्रदानमित्यत्रोपसर्गद्वयग्रहणात्, यथा रजकस्य धौतं देहि इत्यत्र षष्ठी, तथाऽत्रापीति युक्तमेतत्॥ ६३॥

*

विख्यातान् वः करोतु त्रिजगति स[2] यशा यात्रया यत्र नीते
दूरं शूरप्रकाण्डे कनकमयमृगच्छद्मना सानुजेऽपि।
लङ्केन्द्रस्तत्पुरन्ध्रीहरणमतिरतिक्रम्य विक्रान्तमार्गं
द्वेधाऽप्यासीत् तपस्वी स्मर-दरजनितस्वेदमेदस्विदेहः॥ ६४॥

---

१ न प्राप्त॰ पु॰॥ २ स पयो यात्र॰ भा ३-४। एतत्पाठानुसारेण बालबोधिनी॥

[हृदयरञ्जनी]

विख्यातानिति। सः रामः 'वः' युष्मान् जगति 'विख्यातान्' प्रसिद्धान् जाति-क्रिया-गुणैः कुर्यात्। कया कथं प(?य)था भवति? सयशाः—यशसा सह वर्त्तते यस्मिन् कर्मणि 'लङ्केन्द्रः' रावणः 'द्वेधाऽपि' प्रकारद्वयेनापि तपस्वी 'आसीद्' बभूव। किं कृत्वा? 'विक्रान्तमार्गं' पराक्रमपथं शौर्यशृङ्गं 'अतिक्रम्य' त्यक्त्वा 'तपस्वी जातः' अथ च तपस्विवेषं अवलम्ब्य सीताहरणार्थमागत इति तपस्वीति प्रकारद्वयेनाऽऽसीदिति। क सति? 'कनकमृगच्छद्मना' स्वर्णमृगव्याजेन 'सानुजे' लक्ष्मणसहिते 'यत्र' यस्मिन् रामे 'यात्रया' गमनेन 'दूरं' यात्रया दूरगमनेन 'नीते सति' प्रापिते सति। किम्भूते रामे? 'शूरप्रकाण्डे' शौर्यस्कन्धे। किम्भूतो रावणः? 'तत्पुरन्ध्रीहरणमतिः' तस्य पुरन्ध्री तस्या हरणं तत्र मतिः—बुद्धिर्यस्य सः, रणे जेतुमशक्यं रामं विदित्वा कनकमृगव्याजेन वञ्चयित्वा सीतां हृतवान् इतिकृत्वा तपस्वी। पुनः किंलक्षणः? 'स्मर-दरजनितस्वेदमेदस्विदेहः' स्मरश्च दरश्च काम-भये ताभ्यां जनितो यो स्वेदस्तेन मेदस्वी—पुष्टः देहो यस्य सः, सात्त्विक(?)भावेन भयेन च स्विद्यते जन इति स्थितिः। आवेग-त्रासयोः सन्धिः। शृङ्गार-भयानकविरोधरसयोः सङ्करः॥ ६४॥

[बालबोधिनी]

विख्यातान् व इति। 'सः' रामः 'वः' युष्मान् 'त्रिजगति' स्वर्ग-मृत्यु-पाताले 'विख्यातान्' प्रसिद्धान् करोतु। स कः? 'यत्र' श्रीरामे 'सानुजेऽपि' सलक्ष्मणेऽपि 'कनकमयमृगच्छद्मना' सुवर्णमृगच्छलेन कृत्वा 'पथो यात्रया' अनुगमनेन दूरं नीते सति 'लङ्केन्द्रः' रावणः 'तत्पुरन्ध्रीहरणमतिः' तस्य—रामस्य पुरन्ध्री—सीता तस्या हरणमतिः सन् 'विक्रान्तमार्गं' त्यक्तमार्गं यथा भवति तथा 'द्वेधा' द्विप्रकारेणापि शरीरेण कर्मणा च तपस्वी आसीत्। कीदृशो लङ्केन्द्र.? 'स्मर-दरजनितस्वेदमेदस्विदेहः' स्मरश्च दरश्च [ताभ्यां] काम-भयाभ्यां जनितः—उत्पन्नः यः स्वेदः तेन मेदस्वी-मेदयुक्तो देहः—शरीरं यस्य स तादृशः। द्वेधा कथं तपस्वी? भिक्षुकः तपःसन्तापयुक्तदेहश्च॥ ६४॥

*

कल्याणं कम्बुपाणिः प्रगुणयतु स वस्तं निशम्याऽऽर्त्तशब्दं
मारीचेनोच्यमानं चकितचकितया सीतया यत्र जैत्रे।
भीतिं सम्भावयन्त्या शुचिरपि सरुषा यद्दुरुक्तः सुमित्रा-
पुत्रः सद्यस्त्रियामाचरनरकपरिक्षिप्तयाऽऽप्तं फलं तत्॥ ६५॥

---

१ °र्त्तनादं भा २॥

[हृदयरञ्जनी]

कल्याणमिति । सः 'कम्बुपाणिः' कम्बुः पाणौ यस्य स रामः 'वः' युष्माकं कल्याणं 'प्रगुणयतु' बहुलं करोतु । सीतया 'सरुषा सत्या' सक्रोधया सत्या 'शुचिरपि' काय वाङ्-मनोभिः पवित्रोऽपि 'सुमित्रासुतः' लक्ष्मणः 'दुरुक्तः' 'मयि विषये त्वं रतोऽसि' इति दुष्टं उक्तः 'सद्यः' तत्क्षणमेव तस्य दुरुक्तस्य फलं प्राप्तम् । किंलक्षणया सीतया ['त्रियामाचरनरकपरिक्षिप्तया'] त्रियामाचरः–रात्रिञ्चरो रावणः स एव नरकः तेन परिक्षिप्तया–हृतया । पुनः किं० ? 'चकितचकितया' सम्भ्रान्तया अत एव 'जैत्रे' जयनशीले 'यत्र' यस्मिन् रामे 'भीतिं' मरणलक्षणं भयं 'सम्भावयन्त्या' विचारयन्त्या । किं कृत्वा ? मारीचेनोच्यमानमार्त्तं शब्दं 'निशम्य' श्रुत्वा अयमर्थ **उत्तररामायणे**—

रामेण हन्यमानेन = मारीचेन = 'हा लक्ष्मण' इति क्रन्दितम् ।
= तत् श्रुत्वा सीता लक्ष्मणं प्राह = केनचिद् मृगरूपेण दानवेन रघूद्वहः ॥
गम्यतामाशु सौमित्रे ! हतः प्रायेण मे पतिः ।
इत्युक्तो लक्ष्मणो देवीं प्राह ज्येष्ठानुशासने ॥
स्थितो न राक्षसाद् भीती रामस्यास्तीति जानकि ! ।
त्वां विहायान्यतो गन्तुं ज्येष्ठस्याऽऽज्ञा न चास्ति मे ॥
साऽब्रवीच्च तदाकर्ण्य लुब्धोऽसि मयि पापधीः ।
ततः क्रुद्धो शशापास्यै त्वं रक्षोहस्तमाप्नुहि ॥ इति ॥

तच्छापवशाद् रावणगृहेऽस्या वासो जातः, तत्फलं प्राप्तमिति कथासम्बन्धः । त्रास-कोप-योर्भावयोः सन्धिः । भयानक-रौद्रौ रसौ ॥ ६५ ॥

[बालबोधिनी]

कल्याणमिति । 'सः' रामः वः कल्याणं 'प्रगुणयतु' विस्तारयतु । कीदृशः ? 'कम्बुपाणिः' पद्महस्तः । स कः ? यत्र 'जैत्रे' शूरे रामे 'भीतिं' भयं सम्भावयन्त्या 'सरुषा' सक्रोधया सीतया 'शुचिरपि' निर्मलोऽपि सन् यत् 'सुमित्रापुत्रः' लक्ष्मणः 'दुरुक्तः' दुष्टमुक्तः तस्य फलं 'त्रियामाचरनरकपरिक्षिप्तया सत्या सद्य आप्तम् । त्रयो यामा यस्यां सा त्रियामा–रात्रिः, तस्यां चरन्तीति त्रियामाचराः, ते एव नरकं तस्मिन् परिक्षिप्ता तया, अन्योऽपि पापकर्त्ता नरके क्षिप्यते अतो लक्ष्मणो दुष्टं वचः यत उक्तः तस्य फलं तत्कालमेव सीतया प्राप्तम् । कीदृशया सीतया ? तं मारीचेन उच्यमानं 'आर्त्तशब्दं' पीडित-शब्दं निशम्य 'चकितचकितया' भीतभीतया अतिशयेन चकितयेत्यर्थः ॥ ६९ ॥

*

युष्माकं साकमृद्ध्या निरवधि नरकारातिरायुर्ददातु
प्राणेभ्योऽपि प्रियायां जनकभुवि [1]पलादेन बन्दीकृतायाम् ।
सम्मुह्यन्तं मुहुर्यं महति हतमतिः पातयन् शोकसिन्धौ
शङ्के बाष्पप्रवाहैर्विधिरपि विदधे कर्दमं निर्दयात्मा ॥ ६६ ॥

[हृदयरञ्जनी]

युष्माकं साकमिति । 'नरकारातिः' स रामो युष्माकं ऋद्ध्या साकं 'निरवधि' अवधेरधिकं 'आयुः' जीवितं ददातु । स कः ? यं रामं [महति] 'शोकसिन्धौ पातयन्' दुःखसागरे मज्जयन् विधिरपि 'बाष्पप्रवाहैः' नेत्राश्रुभिः 'कर्दमं' कलुषं 'विदधे' चकार। किम्भूतो [विधिः] ? 'निर्दयात्मा' क्रूरात्मा । [पुनः किम्भूतः ?] 'हतमतिः' हता गतिर्यस्य सः । किम्भूतं यम् ? 'मुहुः' वारं वारं 'सम्मुह्यन्तं' मोहं गच्छन्तम् । क सत्याम् ? 'पलादेन' रावणेन 'जनकभुवि' सीतायां 'बन्दीकृतायां' धृत्वा नीतायाम् । किंलक्षण(? णायाम्) ? 'प्राणेभ्योऽपि' जीवितादपि 'प्रियायां' वल्लभायाम् । करुण-रसः । विषाद-निर्वेदयोरुदयः ॥ ६६ ॥

[बालबोधिनी]

युष्माकं साकमिति । सः 'नरकारातिः' नरकरिपू रामः युष्माकं 'ऋद्ध्या साकं' समृद्ध्या सह 'निरवधि' अनन्तं 'आयुः' जीवितव्यं ददातु । स कः ? 'प्राणेऽभ्योऽपि 'प्रियायां' वल्लभायां 'जनकभुवि' सीतायां 'पलादेन' रावणेन बन्दीकृतायां सत्यां सम्मुह्यन्तं 'यं' रामं महति 'शोकसिन्धौ' शोकसमुद्रे 'पातयन्' पातयितुमिच्छन् सन् 'विधिः' ब्रह्माऽपि 'शङ्के' सम्भावयामि 'बाष्पप्रवाहैः' अश्रुप्रवाहैः कृत्वा कर्दमं 'विदधे' चकार । कीदृशो विधिः ? 'निर्दयात्मा' दयारहितस्वभावः । पुनः कीदृशः ? 'हतमतिः' गतबुद्धिः, अत एव राममपि शोकसिन्धौ पातयन् बाष्पप्रवाहैः कर्दमं विदधे ॥ ६६ ॥

*

तिग्मांशोर्वंशरत्नं [2]विभुरवतु स वः सम्प्रयाते शकुन्ते
वैकुण्ठं यद्गृहाणामपहरणमहापर्वणि प्राणदानात् ।
वप्तारं तस्य भास्वान् अरुणमिह पुरस्कृत्य कृत्यं विधत्ते
सत्यं प्रीत्या पितृव्यं हरिरुपरि पुनः पन्नगारिं [3]करोति ॥ ६७ ॥

[हृदयरञ्जनी]

तिग्मांशोरेति । तिग्माः—तीव्रा अंशवो यस्य तस्य सूर्यस्य 'वंशरत्नं' वंशमणिः

---

१ बलादेव ब° भा १-२-३-४ । २ °रत्नं स विभुरवतु वः भा १ ॥ ३ करोतु भा १ । चकार भा २-३-४ ॥

'विभुः' व्यापकः 'सः' रामः 'वः' युष्मान् 'अवतु' रक्षतु । स कः ? 'शकुन्ते' जटायौ 'वैकुण्ठं' विष्णुलोकं सम्प्रयाते सति । कस्मात् ? 'यद्गृहाणां' यस्य—रामस्य गृहाणां—कलत्रस्य '[अप]हरणमहापर्वणि' [अप]हरणमेव महापर्व तस्मिन् 'प्राणदानात्' प्राण-त्यागात् "गृहाः पुंसि च भूम्न्येव" [अमर० का० २ वर्ग २ श्लो० ५] इति वचनाद् बहुवचनम् । अतो हेतोः प्रीत्या 'भास्वान्' सूर्यः 'तस्य' जटायोः 'वप्तारं' अरुणं 'पुरस्कृत्य' अग्रे कृत्वा 'इह' लोके 'कृत्यं विधत्ते' दिवसकरण-मेरुभ्रमणलक्षणं कृत्यं—कार्यं विधत्ते—कुरुते । 'च' अन्यत् सत्यं नित्यं 'पुनः' चार्थे 'हरिः' केशवः प्रीत्या 'तस्य' जटायोः 'पितृव्यं' पितृभ्रातरं 'पन्नगारिं' गरुडं 'उपरि करोति' ध्वजस्योपरि निधत्ते, ध्वजं चकारेत्यर्थः ॥ ६७ ॥

[बालबोधिनी]

तिग्मांशोरिति । 'तिग्मांशोः' श्रीसूर्यस्य वंशस्य रत्नं स 'विभुः' प्रभू रामः वः अवतु । स कः ? यद्गृहाणामपहरणमहापर्वणि प्राणदानात् 'शकुन्ते' पक्षिणि जटायौ वैकुण्ठं 'सम्प्रयाते' गते सति 'भास्वान्' श्रीसूर्य इहाद्यापि 'तस्य' शकुन्तस्य 'वप्तारं' पितरं अरुणं 'पुरस्कृत्य' अग्रे कृत्वा 'कृत्यं' कार्यं 'विधत्ते' करोति । यस्य-रामस्य गृहाः—सीता यद्गृहाः तेषां अपहरणमेव महापर्व तस्मिन्, "पुंसि बहुत्वे" इत्यभिधानं तस्माद् बहुवचनम् । यद् "न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते" इति सीतायां गृहप्रयोगः । उक्तार्थं दृष्टान्तेन द्रढयति—सत्यं दृश्यते यत् 'तस्य' शकुन्तस्य 'प्रीत्या' पुनः हरिरपि तत् पितृव्यं 'पन्नगारिं' गरुडं 'उपरि' ध्वजायां करोति, "हरिश्च गरुडध्वजः" इत्युच्यते । पद्भ्यां न गच्छन्तीति पन्नगाः तेषां अरिः पन्नगारिः तम् । पन्नगारिरित्यत्र संज्ञात्वाद् "न लोपो नञः" [पाणिनि० ६-३-७३] इति नलोपाभावः ॥ ६७ ॥

*

सीतां संस्मृत्य नीतामनुजमसुखिनं वीक्ष्य विज्ञाय कान्ता-
हर्त्तारं च प्रतिज्ञां वनभवनपतेः सख्युराकर्ण्य कर्ण्याम् ।
ग्लानिं म्लानिं प्रकोपं प्रमदमनुपदं बिभ्रदभ्रेषणं[1] **वः**
श्रेयःश्रेणीं पुराणः प्रथयतु पुरुषः पूषवंशैकभूषः[2] **॥ ६८ ॥**

[हृदयरञ्जनी]

सीतामिति । स पुराणः पुरुषः 'वः' युष्माकं 'श्रेयःश्रेणिं' कल्याणपरम्परां

---

१ °भेषिणीं भा ३-४ । एतत्पाठानुसारेण बालबोधिनी ॥ २ °भूषा भा १ ॥

प्रथमतु । किम्भूतः ? पूषवंशस्य–सूर्यवंशस्य एकभूषः–एकं मुख्यं मण्डनम् । किंलक्षणः ? 'अभ्रेषणं' सामर्थ्यं बिभ्रत् । पुनः किं० ? 'सीतां नीतां' जानकीं हृतां संस्मृत्य ग्लानिं 'बिभ्रद्' दधानः । किंलक्षणः ? 'असुखिनं' सीताविरहखिन्नं रामं दृष्ट्वा सखेदं 'अनुजं' लक्ष्मणं 'वीक्ष्य' दृष्ट्वा 'ग्लानिं' तनुतां 'बिभ्रद्' बिभ्राणः । पुनः किं० ? 'कान्ताहर्त्तारं' कान्तायाः–सीताया हर्त्तारं–भेत्तारं रावणं 'विज्ञाय' अवबुध्य 'प्रकोपं' अमर्षं बिभ्रत् । पुनः किं० ? 'वनभवनपतेः सख्युः' वनं–अरण्यं भवनं येषां ते वनभवनाः तेषां पतिः तस्य, 'सख्युः' मित्रस्य सुग्रीवस्य 'यत्र कुत्रापि स्थितां सीतामानीय समर्पयामि' इति 'कर्ण्यां' श्रवणयोग्यां 'प्रतिज्ञां' सन्धां 'आकर्ण्य' श्रुत्वा 'प्रमदं' हर्षं च बिभ्रत्, 'एतस्मात् सख्युः सकाशात् शत्रुसाधनं सीताप्राप्तिश्च भविष्यति' इति हर्षः । अत्र ग्लानि-विषाद-प्रकोप-हर्षाणां व्यभिचारिभावानां सन्धिः तदनुगुणो रसश्च ॥ ६८ ॥

[बालबोधिनी]

सीतां संस्मृत्येति । पुराणः पुरुषः 'अभ्रेषिणीं' अपतनशीलां 'श्रेयःश्रेणीं' कल्याण-पङ्क्तिं प्रथयतु । कीदृशः ? 'पूषवंशैकभूषः' सूर्यवंशस्य एकाभरणम् । किं कुर्वन् ? 'अनुपदं' पदे पदे सीतां 'संस्मृत्य' स्मारयित्वा ग्लानिं बिभ्रत् । अपरं किं कुर्वन् ? अनुजमसुखिनं 'वीक्ष्य' दृष्ट्वा ग्लानिं बिभ्रत् । तथा 'कान्ताहर्त्तारं' रावणं 'विज्ञाय' ज्ञात्वा प्रकोपं बिभ्रत् । तथा च 'वनभवनपतेः' सुग्रीवस्य 'सख्युः' मित्रस्य 'कर्ण्यां' श्रोतुमर्हां प्रतिज्ञां 'आकर्ण्य' श्रुत्वा 'प्रमदं' हर्षं बिभ्रत् ॥ ६८ ॥

*

सप्ताङ्गं येन राज्यं तृणवदवमतं कुर्वता वप्तुराज्ञां,
सप्तार्चिःसन्निभेन प्लवगपतिमुदे सप्त भिन्नाश्च तालाः ।
सन्त्राताः सप्ततन्तूनकृषत ऋषयः सप्तसप्तोऽपि जातः
सप्ताश्वस्यान्वये वः प्रमदयतु हरेः सप्तमः सोऽवतारः ॥ ६९ ॥

[हृदयरञ्जनी]

सप्ताङ्गमिति । 'हरेः' विष्णोः सप्तमः स रामस्यावतारः 'वः' युष्मान् 'प्रमदयतु' हर्षयतु [किम्भूतः ? 'सप्ताश्वस्य' सूर्यस्य 'अन्वये' वंशे] जात इव, परमार्थतस्तु स न जायत एव । पुनः किम्भूतः ? 'सप्तसप्तः' सप्त सप्ताः–सप्तसङ्ख्या जटा यस्य सः वनगमनसमये जटां धृतवान् । स कः ? 'येन' रामेण 'वप्तुः' पितुः आज्ञां कुर्वता सता 'सप्ताङ्गं राज्यं' स्वामि-अमात्य-सुहृत्-कोश-राष्ट्र-दुर्ग-चम्वन्वितमपि राज्यं तृणमिव 'अव-

मतं' अवगणितं त्यक्तम् । किंलक्षणेन ? 'सप्तार्चिःसन्निभेन' 'सप्त अर्चिषि यस्य स सप्तार्चिः—वह्निः तस्य सन्निभः—सादृश्यं यस्य स तेन, सत्यामपि शक्तौ राज्यं त्यक्तवानिति । 'च' अन्यद् येन 'प्लवगपतिमुदे' प्लवगानां—वानराणां पतिः—सुग्रीवः तस्य [मुदे—] हर्षाय विश्वासाय पौरुषप्रख्यापनेन वालिवधार्थं विश्वासोत्पादनाय सप्त ताला 'भिन्नाः' खण्डिताः, "बिभेद च पुनस्तांस्तान् सप्तैकेन महेषुणा।" इति **बालरामायणे**। येन च 'सन्नाताः' विघ्नेभ्यो रक्षिताः 'ऋषयः' मुनयो विश्वामित्रादयः 'सप्ततन्तून्' यागान् 'अकृषत' कृतवन्तः। अत्र सप्तशब्दस्य सर्वत्रोपक्रम्य निर्वाहाद् लाटानुप्रासः, लाटानांत्य तेश्च स (?) इति ॥ ६९ ॥

[**बालबोधिनी**]

सप्ताङ्गमिति । स हरेः सप्तमोऽवतारो रामः 'वः' युष्मान् 'प्रमदयतु' हर्षयतु । कीदृशः ? 'सप्ताश्वस्य' सूर्यस्य 'अन्वये' वंशे 'जातः' उत्पन्न इव । स कः ? 'येन' रामेण सप्ताङ्गं राज्यं तृणवद् 'अवमतं' ज्ञातम् । कीदृशेन ? 'वप्तुः' पितुराज्ञां कुर्वता । अपरं येन 'प्लवगपतिमुदे' वानरपतिहर्षाय सप्त ताला भिन्नाः। अपरं ऋषयो येन सन्त्राताः सन्तः सप्त सप्ताऽपि 'सप्ततन्तून्' यज्ञान् 'अकृषत' कृतवन्तः। कीदृशेन ? 'सप्तार्चिःसन्निभेन' अग्निसदृशेन प्रतापवता ॥ ६९ ॥

*

काले कालाभ्रमालामलिनितवियति क्वापि याते क्षरद्भ्या-
मक्षिभ्यामश्रुधारास्तदभिनयमिवोद्भावयन्[1] वः स पायात् ।
यद्बन्धौ सन्निधानं समधिगतवति स्फूर्जदोजः[2]-प्रभावे
स्वापं[3] हित्वा हरीन्द्रो हरिरिव सहसा कार्यसज्जो बभूव ॥ ७० ॥

[**हृदयरञ्जनी**]

काले कालाभ्रेति । 'सः' रामः वः पायात् । किं कुर्वन् ? 'अश्रुधाराः' बाष्पप्रवाहान् 'क्षरद्भ्यां' वमद्भ्यां अक्षिभ्यां 'तदभिनयं' तस्य—मेघस्य अभिनयं—प्रादुर्भावमिव 'उद्भावयन्' जनयन् 'काले' समये वर्षासमये क्वापि 'याते सति' गते सति । किंलक्षणे काले ? 'कलाभ्रमालामलिनितवियति' अभ्राणां—मेघानां माला—पङ्क्तिः, काला चासौ अभ्रमाला च तया मलिनितं—मिलिनीकृतं वियद्—आकाशो यस्मिन् काले, स कालो वर्षाकालः, तस्मिन् गते सति स्वयं रामो वर्षाकालो जात इत्यर्थः, वर्षाकाले उदकधाराः

---

१ °द्धालयन् वः स पुष्यात् भा ३-४ । एतत्पाठानुसारेण बालबोधिनी वर्त्तते ॥ २ स्फूर्जद्दूर्जत्र° भा ३-४ । एतत्पाठानुसारेण बालबोधिनी ॥ ३ स्वार्थं हित्वा भा ३-४ ॥

पतन्तीति रामोऽपि अश्रुधाराः वर्षतीति कृत्वा स्वयं च श्यामः । वर्णश्लेषालङ्कारः । स कः? 'यद्बन्धौ' यस्य बन्धौ—भ्रातरि लक्ष्मणे 'सन्निधानं' समीपं सुग्रीवसमीपं 'समधिगतवति सति' याते सति 'हरीन्द्रः' हरीणां—वानराणामिन्द्रः—सुग्रीवः 'सहसा' झटिति 'कार्यसज्जो बभूव' रामकार्ये चित्तं ददावित्यर्थः । किं कृत्वा ? 'स्वापं' निद्रां 'हित्वा' त्यक्त्वा । क इव ? 'हरिरिव' यथा सिंहः कस्मिन्नसन्निधानं व्रजति सति निद्रां विहाय कार्यसज्जो भवति, प्रतिपक्षगतहननलक्षणे कार्ये जागरूको भवति । किंलक्षणे ? 'स्फूर्जदोजः-प्रभावे' स्फूर्जत्—स्फुरद् ओजश्च प्रभावश्च ओजः-प्रभावौ यस्मिन्निति उपमा ॥ ७० ॥

[बालबोधिनी]

काले कालेति । 'सः' रामः 'वः' युष्मान् 'पुष्यात्' पालयतु । किं कुर्वन्? कालाभ्रमालामलिनितवियति क्वापि काले याति सति अश्रुधाराः क्षरद्भ्यां अक्षिभ्यां कृत्वा 'तदभिनयमिव' तस्य—मेघस्य अभिनयं—अनुनयमिव 'उद्भासयन्' प्रकटीकुर्वन्, अभ्राणां माला अभ्रमाला काला च सा अभ्रमाला च तया मलिनितं—मलिनीकृतं वियद् यस्मिन् स तस्मिन् । स कः? स्फूर्जदूर्जप्रभावे यद्बन्धौ सन्निधानं समधिगतवति सति 'हरीन्द्रः' सुग्रीवः 'हरिरिव' कृष्ण इव सहसा 'स्वापं हित्वा' निद्रां त्यक्त्वा कार्यसज्जो बभूव । यस्य—रामस्य बन्धुः—लक्ष्मणः तस्मिन् । ऊर्जस्य प्रभावः, स्फूर्जन्—प्रकट ऊर्जप्रभावो यस्य सः, तस्मिन् ॥ ७० ॥

*

पश्यन् नीचैः कलत्रे दशवदनहृते ह्रीतवान् वः स पायाद्
व्यक्तीकर्त्तुं न शक्तः स्वमुखमिव पुरः पूर्वजस्याहिमांशोः ।
वैदेहीं द्रष्टुमष्टस्वपि कपिनिवहास्तूर्णमाशासु जग्मुः
[1]यस्याऽऽज्ञा तु प्रयाता व्यवसितमसमेष्वादधानेषु तेषु ॥ ७१ ॥

[हृदयरञ्जनी]

पश्यन् नीचैरिति । 'सः' रामः 'वः' युष्मान् 'पायाद्' रक्षतु । किं लक्षणः? 'ह्रीतवान्' सञ्जातलज्जः । लज्जायां हेतुमाह—'कलत्रे' सीतायां दशवदनः—रावणः तेन हृते सति—नीते सति अत एव । किं कुर्वन् ? नीचैः पश्यन् । तत्र उत्प्रेक्ष्यते—'पूर्वजस्याहिमांशोः' सूर्यस्य पूर्वपुरुषस्य 'पुरः' अग्रे 'स्वमुखं' आत्मवदनं 'व्यक्तीकर्त्तुं' प्रकटयितुं न शक्त इव, उक्तिरपि लोके—यस्य कलत्रं हृतं भवति स लज्जया स्वज्ञातिजनानां मुखं दर्शयितुमसमर्थो भवति, नीचैस्तु पश्यन् याति च । जातिरलङ्कारोऽर्थान्तरन्यासश्च । स

---

१ यस्याऽऽज्ञाऽनुप्रयाता व्यवसितिमसमामाददानेषु भा ३-४ । एतत्पाठानुसारेण बालबोधिनी ॥

कः ? 'कपिनिवहाः' वानरसमूहाः यस्य 'वैदेहीं' सीतां द्रष्टुं [अष्टस्वपि] 'आशासु' दिक्षु तूर्णं 'जग्मुः' गतवन्तः। 'तु' पुनः 'यस्य' रामस्य आज्ञा तेषु वानरेषु 'प्रयाता' प्राप्ता। किंरूक्षणेषु? 'व्यवसितं' उद्यमाङ्गीकारं आदधानेषु। पुनः किं०? 'असमेषु' तेजोविषमेषु दुःसहेष्विति यस्याऽऽज्ञां गृहीत्वा सीतां द्रष्टुं दिक्षु निरगुः॥ ७१॥

[बालबोधिनी]

पश्यन्निति। 'सः' रामो वः पायात्। कीदृक्? कलत्रे दशवदनेन हृते सति 'ह्रीतवान्' लज्जितः सन् नीचैः पश्यन्। उत्प्रेक्षते—पूर्वजस्याहिमांशोः पुरः स्वमुखं व्यक्तीकर्त्तुं न शक्त इव। स कः? यस्य वैदेहीं द्रष्टुं कपिनिवहाः अष्टस्वप्याशासु तूर्णं जग्मुः। अपरं 'तेषु' कपिनिवहेषु 'असमां' विषमां 'व्यवसितिं' व्यापारमादधानेषु सत्सु 'यस्य' रामस्य आशाऽपि अनुप्रयाता॥ ७१॥

*

तत् सीता-रामयुग्मं युगपदपहरत्वप्रियं वः प्रवृत्तौ,
लब्धायां गृध्रराजादहिमकरकरश्रेणिविश्राणितार्त्तेः।
यातायातं वितन्वन्नधिजलधि जवेनाञ्जनायास्तनूजो
यस्याभिज्ञानदानात् त्रुटि[1]तमपि पुनः सन्दधे जीवितव्यम्॥ ७२॥

[हृदयरञ्जनी]

तत् सीतारामयुग्ममिति। तत् सीता-रामयोः 'युग्मं' मिथुनं 'वः' युष्माकं 'अप्रियं' अनिष्टं 'युगपत्' सममेव 'अपहरतु' दूरीकरोतु। स कः? 'अञ्जनायास्तनूजः' हनुमान् 'यस्य' युग्मस्य 'त्रुटितमपि' छिन्नमपि जीवितव्यं पुनः 'सन्दधे' सन्धानमकरोत्, त्रुटितं हि सन्धीयते केनचिद् यथा परस्परं तयोः प्राप्त्याशाभावाद् गतानपि प्राणान् सङ्घटयति, कस्मात्? 'अभिज्ञानदानाद्' उभयोरपि मुद्रा-चूडारत्नप्रदानात्। किं कुर्वन्? 'अधिजलधि' जलधौ 'यातायातं' गमनागमनं वितन्वन्। केन? 'जवेन' वेगेन अविलम्बितेन रामस्याभिज्ञानमुद्रां सीतायै, सीताभिज्ञानचूडारत्नं रामाय यच्छन्निति। क सत्याम्? 'गृध्रराजात्' सम्पातेर्वचनात्। 'प्रवृत्तौ' 'सीता लङ्कायामशोकवने तिष्ठति' इति वार्त्तायां लब्धायां सत्याम्। किम्भूतात्? अहिमकरः—सूर्यस्तस्य कराः—किरणास्तेषां श्रेणिः—समूहः तया विश्राणिता—दत्ता आर्त्तिः—पीडा पक्षज्वलनलक्षणा यस्य सः॥ ७२॥

---

१ °तमिव पुनः भा २॥

[बालबोधिनी]

तत् सीतारामयुग्मेति । तत् सीतारामयुग्मं युगपद् वः अप्रियं हरतु । तत् किम्भूतम् ? 'अञ्जनायास्तनूजः' हनुमान् 'यस्य' युग्मस्य अन्योऽन्यं 'अभिज्ञानदानात्' चिह्नदानात् 'त्रुटितमपि' छिन्नमपि जीवितव्यं पुनः सन्दधे । कीदृशः ? 'गृध्रराजाद्' जटायुभ्रातुः सकाशात् 'प्रवृत्तौ' वार्त्तायां लब्धायां सत्यां 'अधिजलधि' समुद्रे 'जवेन' वेगेन 'यातायातं' गमनागमनं 'वितन्वन्' कुर्वन् । कीदृशाद् गृध्रराजात् ? 'अहिमकरकर-श्रेणिविश्राणितार्त्तेः' सूर्यकिरणानां पङ्क्त्या प्रापिता आर्त्तिर्यस्य स तस्मात् ॥ ७२ ॥

*

काकुत्स्थो मैथिली च प्रथयतु पृथिवीनाथतां वः प्लवङ्ग-
स्तीर्णाम्भोधिर्विमुह्यन्मनसमथ मिथो यं विना यां विलोक्य ।
सप्रेम्णोरप्यनूना-ऽधिककुल-गुणयोरेकसौभाग्यभाजोः
संयोगादेतयोः स स्तुतिमकृत विधेर्विप्रयोगाच्च निन्दाम् ॥ ७३ ॥

[हृदयरञ्जनी]

काकुत्स्थ इति । 'सः' 'काकुत्स्थः' ककुदि तिष्ठतीति ककुत्स्थः, "तस्यापत्यम्" [पाणिनि० ४-१-९२] इत्यण्, रामो मैथिली च 'वः' युष्माकं पृथिवीनाथतां 'प्रथयतु' विस्तारयतु । अथ 'सः' हनुमान् 'विधेः' निर्मातुः स्तुतिं 'अकृत' कृतवान्, कस्मात् ? 'एतयोः' सीता-रामयोः संयोगात् । विप्रयोगाच्च निन्दाम् । एतौ संयोजयतो विघटयतश्च विधेः स्तुति-निन्दे अकार्षीत् । किं कृत्वा ? यं विना यां दृष्ट्वा यां विना यं दृष्ट्वा, विधिरेतौ संयोज्य पुनः किमिति वियोजितवान् ? इति निन्दा-स्तुती । किम्भूतयोः ? 'सप्रेम्णोः' समान-स्नेहयोः । पुनः किंविधयोः ? अनूनाधिकाः कुलगुणाश्च, ऊनं अधिकश्च, न ऊनाधिकौ अनूनाधिकौ कुल-गुणौ ययोस्तौ तयोः समानकुल-गुणयोः । तथा एकसौभाग्यं—एकं च तत् सौभाग्यं च तद् भजेते एकसौभाग्यभाजौ तयोः समसौन्दर्यलक्ष्मीकयोरिति । हर्ष-विषादयोः सन्धिः ॥ ७३ ॥

[बालबोधिनी]

काकुत्स्थो मैथिलीति । स 'काकुत्स्थः' रामः सा च 'मैथिली' सीता वः 'पृथिवी-नाथतां' भूस्वामित्वं प्रथयतु । स कः सा च का ? तीर्णाम्भोधिः 'प्लवङ्गः' हनुमान् 'यां' सीतां विना विमुह्यन्मनसं 'यं' रामं 'विलोक्य' दृष्ट्वा 'च' अपरं 'यं' रामं विना 'यां' सीतां विलोक्य 'एतयोः' सीता-रामयोः संयोगाद् विधेः स्तुतिं अकृत 'च' अपरं 'अथ' अनन्तरं एतयोः विप्रयोगात् 'विधेः' ब्रह्मणः निन्दां अकृत । कीदृशयोरेतयोः ? तुल्यप्रेम्णोः

अनूनाधिककुलगुणयोः एकसौभाग्यभाजोः ' तुल्यं प्रेम ययोः, ऊनाश्च अधिकाश्च ऊनाधिकाः, न ऊनाधिकाः कुलस्य गुणा ययोः, एकं च तत् सौभाग्यं च [तद्] भजेत इति [एक-सौभाग्य]भाजौ तयोः ॥ ७३ ॥

*

'भाग्यश्रीभाजनं वः स जनयतु जनस्थाननक्तञ्चराणां
उद्दण्डैर्मुण्डपिण्डैः कलहंसखमुखैः प्रीणितश्राद्धदेवः ।
यश्चूडारत्नचिह्नं तदवनिदुहितुर्वातजातेन दत्तं
भूयो भूयोऽपि दध्रे हृदि शिरसि दृशोः शोक-हर्षाश्रुवर्षाः ॥७४॥

[हृदयरञ्जनी]

भाग्यश्रीति । 'सः' रामः 'वः' युष्मान् भाग्यश्रीभाजनं जनयतु । किम्भूतः ? जनस्थाननिवासिनां नक्तञ्चराणां—रात्रिञ्चराणां राक्षसानां 'मुण्डपिण्डैः' मुण्डानि—मस्तकानि तान्येव पिण्डास्तैः प्रीणितः—तृप्तिं गमितः श्राद्धदेवः—यमो येन सः । स कः ? यो रामः 'अवनिदुहितुः' अवनेः—भूमेः दुहिता—सीता तस्याः 'चूडारत्नचिह्नं' चूडारत्नं 'भूयो भूयो' वारं वारं 'हृदि' हृदये 'शिरसि' मौलौ 'दध्रे' बभार । किंलक्षणम् ? 'वातजातेन' वाताद्—वायोर्जातो वातजातस्तेन हनुमता 'दत्तं' आनीय दत्तम् । 'च' अन्यद् 'दृशोः' नेत्रयोः शोक-हर्षाश्रुवर्षा दध्रे, पूर्वमप्राप्तेर्हेतोः शोकाश्रूणि पश्चात् तस्याभिज्ञानरत्नप्राप्तेः हर्षाश्रूणि बभारेति वाक्यार्थः । स्मृति-हर्षयोर्भावयोः सन्धिः । किम्भूतैः ? 'उद्दण्डैः' अनेकैः, अनेकत्वात् तृप्तिजनकत्वं तेषाम् । पुनः किंलक्षणैः ? ['कलहसखमुखैः'] कलह-सदृशमुखैः ॥ ७४ ॥

[बालबोधिनी]

भाग्यं श्रीभाजनमिति । स वः 'श्रीभाजनं' लक्ष्मीसहितं भाग्यं जनयतु । कीदृशः ? 'जनस्थाननक्तञ्चराणां' तत्स्थानां राक्षसानां 'उद्दण्डैः' प्रौढैः मुण्डपिण्डैः कृत्वा कलहमखमुखे प्रीणितश्राद्धदेवः, मुण्डान्येव पिण्डास्तैः कलहो मख इव तस्य मुखे प्रीणितः श्राद्धस्य देवः—यमो येन स तथा । स कः ? 'य' रामः तद् 'वातजातेन' हनुमता दत्तं 'अवनिदुहितुः' सीतायाश्चूडारत्नचिह्नं 'भूयो भूयो' पुनः पुनरपि हृदि शिरसि दृशोश्च 'दध्रे' धृतवान् । कीदृशः ? 'शोक-हर्षाश्रुवर्षी' शोकश्च हर्षश्च ताभ्यां अश्रूणि वर्षतीत्येवंशीलमस्यासौ शोकहर्षाश्रुवर्षी ॥ ७४ ॥

*

---

१ **भाग्यं श्रीभाजनं** इति पाठानुसारेण बालबोधिनी । २ '**हमखमुखे प्री**° भा ३-४ । एतत्पाठानुसारेण बालबोधिनी ॥ ३ °**वर्षी** भा २-३ ४ । एतदनुसारेण बालबोधिनी ॥

विश्वाधीशः स कीशप्रभुपरिचरितः पातु वः पातकौघाद्
दीर्घैर्निःश्वासवातैर्धुतमिव[1] निवहं नीरदानां निरस्यन् ।
हर्षा-ऽमर्षानुरूपं रजनिचरपुरोपप्लवाय प्लवङ्गै-
र्वल्गद्भिर्यन्निदेशादजनि हरिमयं विष्टपं स्पष्टमेव ॥ ७५ ॥

[हृदयरञ्जनी]

विश्वाधीश इति । 'विश्वाधीशः' स्वामी 'सः' रामः 'वः' युष्मान् 'पातु' रक्षतु । किंलक्षणः? 'कीशप्रभुपरिचरितः' कीशानां—वानराणां प्रभुः—सुग्रीवः तेन परिचरितः—सेवितः । कस्मादवतु ? 'पातकौघात्' पातकसमूहात् । पुनः किं कुर्वन् ? नीरदानां 'निवहं' समूहं निरस्यन्, 'नीरदानां निवहं' इत्यनेन वर्षासमयो लक्ष्यते, न हि नीरदानां निरसनं सम्भवति, वर्षासमयमतिवाहयन् । किम्भूतम्? उत्प्रेक्षते—दीर्घैः 'निःश्वासवातैः' श्वसितवायुभिः 'धुतमिव' निराकृतमिव, वातैः किल मेघो नीयते । स कः? 'यन्निदेशाद्' यस्य आज्ञातः 'प्लवङ्गैः' वानरैः बलीमुखैः 'विष्टपं' जगत् स्पष्टमेव 'हरिमयं' वानरव्याप्तं 'अजनि' कृतम् । किंल०? हर्षा-ऽमर्षानुरूपं यथा भवति तथा हर्षः—सन्तोषः अमर्षः—क्रोधः तयोरनुरूपं—सदृशं यथा स्यात् तथा 'वल्गद्भिः' उत्पतद्भिः । किमर्थम्? 'रजनिचरपुरोपप्लवाय' रजनिचरः—रावणः तस्य पुरं—लङ्का तस्या उपप्लवाय—नाशाय। हर्षा-ऽमर्षयोः सन्धिः ॥ ७५ ॥

[बालबोधिनी]

विश्वाधीश इति । सः 'विश्वाधीशः' रामः वः 'पातकौघात्' पापसमूहात् पातु। कीदृशः? 'कीशप्रभुपरिचरितः' कीशानां प्रभुः—सुग्रीवः तेन परिचरितः—सेवित इत्यर्थः। कीदृशः? उत्प्रेक्षते—दीर्घैर्निःश्वासवातैः कृत्वा 'नीरदानां' मेघानां 'निवहं' समूहं 'निरस्यन्' निराकुर्वन्निव। स कः? 'यन्निदेशाद्' यस्य आदेशाद् 'रजनिचरपुरोपप्लवाय' लङ्काया उपद्रवार्थं हर्षा-ऽमर्षानुरूपं यथा स्यात् तथा वल्गद्भिः प्लवङ्गैः कृत्वा 'विष्टपं' आकाशं स्पष्टमेव हरिमयमजनि । हर्षश्च अमर्षः—क्रोधश्च तयोरनुरूपम् ॥ ७५ ॥

*

यद् वः सद्वस्तु चित्ते[2] वसति दिशतु तन्निर्विलम्बं कबन्ध-
श्रेणौ सक्रोधशोणं रणरुचिरसकृन्निक्षिपन्नक्षिकोणम्[3] ।

---

१ °वातैर्हृत° भा ३-४ ॥ २ चित्ते निवसति दिशतान्निर्विलम्बं कलम्बश्रेणौ भा ३-४। एतत्पाठानुसारेण बालबोधिनी । ३ °कृन् प्रक्षि° बालबोधिनी । °कृद् विक्षि° भा १-२-३-४ ॥

आर्तिं यस्यापहर्त्तुं सरभसगतिभिर्वानराणां वरेण्यै-
र्दत्तं मत्वा प्रयाणं प्रथममिव धृतिः प्रस्थिता रावणस्य ॥ ७६ ॥

[हृदयरञ्जनी]

यद् वः सद्वस्तु चित्ते इति। 'सः' रामः यत् सद्वस्तु 'वः' युष्माकं चित्ते 'वसति' वर्त्तते 'तद्' वस्तु युष्मभ्यं 'निर्विलम्बं' शीघ्रं 'दिशतु' ददातु। किंलक्षणः? 'रणरुचिः' रणे–सङ्ग्रामे रुचिः–प्रीतिर्यस्य सः। किं कुर्वन्? अत एव 'क्रोधशोणं' क्रोधेन–कोपेन शोणं–रक्तं 'अक्षिकोणं' नेत्रप्रान्तं 'असकृद्' वारं वारं 'कबन्धश्रेणौ' अम्बुराशौ समुद्रे 'निक्षिपन्' प्रेरयन्, 'मार्गरोध्ययम्' इति क्रोधेन पश्यतीत्यर्थः। 'रावणस्य' दशकन्धरस्य प्रथमं धृतिः प्रस्थितेव, उत्प्रेक्षते–पूर्वमेव वानरागमनापेक्षया रावणस्य 'धृतिः' धैर्य–हर्षः 'प्रस्थिता' जगाम। किं कृत्वा? 'वानराणां वरेण्यैः' कपिश्रेष्ठैः 'प्रयाणं दत्तं मत्वा' सुरा-ऽसुरानुलङ्घ्यस्य दशाननस्य ममोपरि वानरैर्जेतुं प्रस्थानं कृतमिति ज्ञात्वा रावणेन 'धृतिः' धैर्यं त्यक्तमित्यर्थः। किम्भूतैः? 'सरभसगतिभिः' त्वरितगमनैः। किं कर्त्तुम्? 'यस्य' रामस्य 'आर्त्तिं' पीडां सीताहरणसञ्जातदुःखं 'अपहर्त्तुं' निराकर्तुम्। रावणशत्रुवधद्वारा हृदि शल्यरूपां पीडां उद्धर्त्तुमिति वीरस्योदयः। उत्साह-क्रोधयोः सन्धिः। उत्तरार्द्धे निर्वोतयोः(? निर्वेद-भययोः) सन्धिः ॥ ७६ ॥

[बालबोधिनी]

यद् वः सद्वेति। वः चित्ते यत् सद्वस्तु निवसति 'सः' रामः तद् 'निर्विलम्बं' सद्यः 'दिशताद्' ददातु। कीदृशः? 'कलम्बश्रेणौ' शरान्तस्थितपिच्छपङ्क्तौ 'असकृत्' पुनः पुनः अक्षिकोणं प्रक्षिपन्। कीदृशमक्षिकोणम्? 'सक्रोधशोणं' सक्रोधं यतः अत एव शोणं–ईषद्रक्तम्। अपरं कीदृशः? 'रणरुचिः' रणे–सङ्ग्रामे रुचिः–प्रीतिर्यस्यासौ रणरुचिः। स कः? यस्य आर्त्तिं अपहर्तुं 'सरभसगतिभिः' शीघ्रगतिभिर्वानराणां 'वरेण्यैः' मुख्यैः प्रयाणं दत्तं मत्वा रावणस्य धृतिः प्रथमं प्रस्थितेव ॥ ७६ ॥

*

तीरस्थः कीशवीरैः सममसममरुल्लोलकल्लोलराशे-
रम्भोधेर्लङ्घनार्थं विदधदवतु वो राघवो लङ्घनानि।
अच्छिन्नस्वोत्तमाङ्गश्चरणगतिपुरस्कारमासाद्य लङ्का-
लक्ष्मीमद्यापि भुङ्क्ते यदनुसरणतो रावणस्यैकबन्धुः ॥ ७७ ॥

---

१ °माङ्गः प्लवगपतिपुर° भा ३-४, एतदनुसारेण बालबोधिनी ॥

[हृदयरञ्जनी]

तीरस्थ इति। स राघवः 'वः' युष्मानवतु। किम्भूतः? 'अम्भोधेः' समुद्रस्य 'लङ्घनार्थं' उत्तरणाय 'लङ्घनानि' उपवासान् 'विदधद्' उपवासव्रतं कुर्वन्। 'असम०' असमश्चासौ मरुच्च असममरुद्–महान् वायुः तेन लोलः–चपलः कल्लोलानां–तरङ्गाणां राशिः–परम्परा यस्य स तस्य। किल 'कीशवीरैः' वानरसुभटैः 'समं' साकं 'तीरस्थः' तटे स्थितः 'यदनुसरणतः' यस्य–रामस्य अनुसरणं–आश्रयणं तस्माद् 'एकबन्धुः रावणस्य' एकभ्राता विभीषणः अद्यापि शाश्वतीं लङ्कालक्ष्मीं 'भुङ्क्ते' अनुभवति पालयति। किं कृत्वा? 'अच्छिन्नस्वोत्तमाङ्गः' अक्षतं स्वमस्तकं यस्य स रामस्य 'चरणगतिपुरस्कारं' चरणगतेः पुरस्कारं–पूजां 'आसाद्य' कृत्वा, रावणस्तु पूर्वं छिन्नमस्तकैः पशुपतेः पूजां विधाय लङ्कालक्ष्मीं प्राप साऽपि अस्थिरा जाता, अनेन तु अच्छिन्नैकशिरसाऽस्य पूजां विधाय स्थिरा लङ्कालक्ष्मीः प्राप्तेति, "यावद् रामकथा लोके तावद् राज्यं विभीषणे" इति स्मरणादिति योजनिका। यस्य चरणौ तावेव गतिर्यस्य स पुरस्कारो यस्य त एत एव लक्षणं अच्छिन्नं–अक्षतं स्वोत्तमाङ्गं 'आसाद्य' प्राप्येति (?) अनुप्रासः॥ ७७॥

[बालबोधिनी]

तीरस्थः कीशेति। स राघवो वोऽवतु। कीदृशः? 'कीशवीरैः' सुग्रीवादिभिः समं अम्भोधेः 'लङ्घनार्थं' उत्तरणाय लङ्घनानि 'विदधत्' कुर्वन्। कीदृशः? तीरस्थः। कीदृशस्याम्भोधेः? 'असममरुल्लोलकल्लोलराशेः' असमो यो मरुद्–वायुः तेन लोलाः–चञ्चलाश्च ते कल्लोलाश्च तेषां राशिः–समूहो यस्मिन् स तस्य। स कः? 'रावणस्य एकबन्धुः' विभीषणः 'यदनुसरणतः' यस्य–रामस्यानुसरणात् 'प्लवगपतिपुरस्कारं' सुग्रीवपुरस्कारं 'आसाद्य' प्राप्य अद्यापि लङ्कालक्ष्मीं भुङ्क्ते। कीदृशः? 'अच्छिन्नस्वोत्तमाङ्गः' अच्छिन्नं स्वस्य उत्तमाङ्गं–शिरो यस्य स तथा॥ ७७॥

*

पारावारं तरीतुं वियदिव विपुलं हेलयैवोज्जिहानः
कर्त्तुं तस्यावसानं तमस इव निशाचारिणो वैरिणश्च।
आविष्कुर्वन् कराणामिव च कपिशतालङ्कृतानां बलाना-
मौद्दाम्यं रामनामा रमयतु भवतः प्रीतिपूरेण सूरः॥ ७८॥

---

१ लीलयै° भा ३-४। एतत्पाठानुसारेण बालबोधिनी॥

[हृदयरञ्जनी]

पारावारं तरीतुमिति। रामनामा 'सूरः' सूर्यः 'भवतः' युष्मान् 'रमयतु' खेलयतु। केन? 'प्रीतिपूरेण' प्रीतिवस्तुप्राप्त्या। किं कुर्वन्? कपिशतालङ्कृतानां 'बलानां' सेनानां 'औद्दाम्यं' सामर्थ्यमौद्धत्यं वा 'आविष्कुर्वन्' प्रकटयन्। कपीनां—वानराणां शतानि तैरलङ्कृतानाम्, शतशब्दोऽत्रासङ्ख्यातवाची, "शतमपरिमितम्" इति **यादवः**। किंलक्षणः रामः? हेलया 'उज्जिहानः' उदयं गच्छन् उद्यमं कुर्वन्। किं कर्त्तुम्? 'विपुलं' विस्तीर्णं 'पारावारं' समुद्रं 'तरीतुं' उत्तरणाय प्रयत्नवान्। पुनः किं कर्त्तुम्? 'वैरिणः' शत्रोः 'निशाचारिणः' रावणस्य तस्य नाशं 'कर्त्तुं' विधातुम्। क इव? सूर्य इव। 'सूरः' सूर्यः 'विपुलं' महद् 'वियद्' आकाशं 'तरीतुं' लङ्घयितुं निशाचारिणः 'तमसः' अन्धकारस्य 'अवसानं' निराकरणं कर्त्तुं च 'कराणां' किरणानां औद्दाम्यं आविष्कुर्वन् उज्जिहानो भवति, उदेतीत्यर्थः। किम्भूतानां कराणाम्? 'कपि०' कपिशस्य भावः कपिशता—पिङ्गलता तया अलङ्कृतानां—शोभितानाम्। उपमालङ्कारः राम-सूर्ययोः किरण-बलानां समुद्रा-ऽऽकाशयोः ॥ ७८ ॥

[बालबोधिनी]

पारावारं तरीतुमिति। स 'रामनामा' रामः भवतः प्रीतिपूरेण कृत्वा रमयतु। किं कुर्वन्? कराणामिव बलानामौद्दाम्यं 'आविष्कुर्वन्' प्रकटीकुर्वन्। कीदृशानां बलानाम्? 'कपिशतालङ्कृतानां' कपीनां शतानि कपिशतानि तैरलङ्कृताः तेषाम्। स कः? यो रामः 'पारावारं' समुद्रं तरीतुं लीलयैव 'उज्जिहानः' वर्द्धमानप्रतापः। किं कर्त्तुम्? निशाचारिणो वैरिणः 'अवसानं' अन्तं कर्त्तुम्। कीदृशं पारावारम्? वियदिव विपुलम्। कीदृशस्य वैरिणः? उत्प्रेक्ष्यते—तमस इव। क इव? 'सूर इव' यथा 'सूरः' सूर्यः वियत् तरीतुं लीलयैव उज्जिहानो भवति। किं कर्त्तुम्? निशाचारिणो वैरिणः तमसः अवसानं कर्त्तुम्, 'च' अपरं कपिशतालङ्कृतानां कराणां—किरणानां औद्दाम्यमाविष्कुर्वन्। कपिशस्य भावः कपिशता तयाऽलङ्कृतास्तेषाम् ॥ ७८ ॥

*

[1]नम्राः श्रेयोभरेण ध्रुवमतिगुरुणा सर्वतः पर्वताद्याः
संसारावारपारं कति न यतिजनाः सेतुना येन तेरुः?।
दुर्दैवात् सोऽपि देवः किल [2]कपिकुरलीमुख्यसख्येन शैलै-
स्तं बध्नन्नब्धिमध्ये मधुरिपुरपरिभ्रष्टमिष्टं क्रियाद् वः ॥ ७९ ॥

---

१ नाम्ना श्रेयो॰ भा १। एतदनुसारेण बालबोधिनी ॥ २ कपिखुरली॰ भा ३-४। एतत्पाठानुसारेण बालबोधिनी ॥

[हृदयरञ्जनी]

नम्राः श्रेयोभरेणेति । 'मधुरिपुः' रामः 'वः' युष्माकं 'अपरिभ्रष्टं' न परिभ्रष्टं अपरिभ्रष्टं—पूर्णमिष्टं क्रियात् । 'किल' इत्याश्चर्ये । सोऽपि देवो दुर्दैवाद्धेतोः। किं कुर्वन्? 'अब्धिमध्ये' समुद्रमध्ये 'सेतुं बध्नन्' सोपानपरम्परां बधानः । केन केन कैः कारणैः? 'कपिकुरली०' कपीनां कुरली—सेना तत्र मुख्यः—सुग्रीवः तस्य सख्यं—मित्रं नलः तेन 'शैलैः' पर्वतैः नलेन सेतुं अकारयत इत्यर्थः, "नलं सेतुमकारयत्" इति **रामायणे** । दुर्दैवं किं०? इत्याह—'येन' रामेण सेतुना कृत्वा 'कति यतिजनाः' कतिपये मुमुक्षवः संसारावारपारं न 'तेरुः' तीर्णा इति । ते के यतिजनाः? तानाह—'पर्वताद्याः' पर्वतः—नारदमित्रं आद्यो येषां ते पर्वताद्याः समन्तात् तेरुः । किम्भूतास्ते? 'अतिगुरुणा' बंहीयसा श्रेयसां भरेण 'नम्राः' अवनताः, ये अत्यन्तं गरिष्ठाः गुरवस्तेऽपि येन सेतुना कृत्वा तरन्ति । संसारसमुद्रस्य तरणे सेतुभूतोऽपि इदानीं स्वतरणार्थमम्बुनि सेतुं बध्नातीत्याश्चर्यम् । 'ध्रुवं' इति निश्चये उत्प्रेक्षायां वा । विरोधालङ्कारः, विस्मयस्थायी रसः, अद्भुतस्योदयः, प्रसादो गुणः ॥ ७९ ॥

[बालबोधिनी]

नाम्ना श्रेयो इति । सः 'मधुरिपुः' रामः 'वः' युष्माकं ['अपरिभ्रष्टम्'] अपरिमितं बहु 'इष्टं' वाञ्छितं क्रियात् । किं कुर्वन्? सोऽपि 'देवः' रामः दुर्दैवाद् दुष्टप्राक्तनात् 'किल' इति सत्ये 'कपिखुरलीमुख्यसख्येन' सुग्रीवेण सह 'शैलैः' पर्वतैः कृत्वा 'अब्धिमध्ये' समुद्रमध्ये 'तं' सेतुं बध्नन् । स कः? तं कम्? 'येन नाम्ना' यस्य सेतुनामरूपिणा सेतुना पर्वताद्या यतिजनाः 'सर्वतः' परितः 'संसारावारपारं' संसाररूपिणं समुद्रं 'कति' कियन्तो न तेरुः? अपि तु तेरुरेव । कीदृशेन नाम्ना? 'श्रेयोभरेण,' भद्रभरेण । अपरं कीदृशेन? 'ध्रुवमतिगुरुणा' निश्चितं सर्वस्मात् श्रेष्ठेन । कपयश्च खुरल्यश्च तेषां मुख्यस्तस्य सखित्वेन ॥ ७९ ॥

*

सद्यः स द्यत्वघं वो मघवदवरजः सागरोपान्तवर्त्ती
मूर्त्त्याऽकीर्त्त्या[1] च यस्मिन् जगदतिदयिते दुर्दशां दर्शयित्वा ।
भीतो भूर्लोकशापदिव विधिरुदधौ तारयंस्तूलगत्या
स्थूलानां प्रस्तराणां समुदयमदयोऽप्यानुकूल्यं चकार ॥ ८० ॥

१ मूर्त्या कीर्त्त्या च यस्मिन् जगदतिशयिते भा ३-४ । एतत्पाठानुसारेण बालबोधिनी ॥

[हृदयरञ्जनी]

सद्यः स द्यत्वघं व इति । 'सः' रामो वोऽघं सद्यः 'द्यतु' खण्डयतु । स कः? किल मघवतः—इन्द्रस्य अवरजः—कनीयान् भ्राता, कश्यपस्तुतत्वात्, दशरथो हि कश्यपावतारः । पुनः किं०? 'सागरोपान्तवर्ती' समुद्रतटे वर्त्तमानः । स इति कः? 'यस्मिन्' रामे अदयोऽपि विधिः 'आनुकूल्यं' अनुकूलत्वं 'चकार' विदधे, पश्चादिति शेषः । किं कुर्वन् विधिः? तूलगत्या नलेन वानरेण 'स्थूलानां' महतां प्रस्तराणां 'समुदयं' समूहं 'उदधौ' समुद्रे तारयन् । तत्रोत्प्रेक्षते 'भूर्लोकशापाद् भीत इव' भूर्लोकस्य शापः—नाशः तस्माद् 'भीत इव' भयाकुलः 'क्रुद्धो रामो जगद् धक्ष्यति' इति भयं तस्मादित्यर्थः । किम्भूते यस्मिन्? 'जगदतिदयिते' जगति—लोके अतिक्रान्ता—गता दयिता—वल्लभा यस्य तस्मिन् । किं कृत्वा? 'मूर्त्या' मूर्तीभूतया 'अकीर्त्या' अयशसा 'दुर्दशां दर्शयित्वा' दुरवस्थां प्रापय्य, पूर्वं तावद् दुर्दशां रामे संयोज्य पश्चात् कृपालुः सन् आनुकूल्यं विदधे ॥ ८० ॥

[बालबोधिनी]

सद्यः स इति । 'सः' रामः वः अघं सद्यः 'द्यतु' अवखण्डयतु । कीदृशः? 'मघवदवरजः' इन्द्रानुजः । अपरं मूर्त्या कीर्त्या च सागरोपान्तवर्त्ती, अन्येषां यशस्विनां राज्ञां कीर्त्तिः सागरोपान्तवर्त्तिनी भवति, रामस्तु मूर्त्या—स्वरूपेणापि सागरोपान्ते गतवान् । स कः? यस्मिन् 'जगदतिशयिते' जगद्गुरौ रामे दुर्दशां दर्शयित्वा 'विधिः' ब्रह्माऽपि 'उदधौ' समुद्रे स्थूलानां 'प्रस्तराणां' ग्राव्णां 'समुदयं' समूहं तूलगत्या तारयन् सन् 'अदयोऽपि' निर्दयोऽपि आनुकूल्यं चकार । कीदृशः? उत्प्रेक्षते—भूर्लोकशापाद् भीत इव ॥ ८० ॥

*

पायाद् वः क्षोणिजायाः पतिरतिविपुलं पश्यतां सेतुमब्धौ,
बद्धं यस्य प्लवङ्गैर्वियति विचरतामेवमासीद् वितर्कः ।
अम्भोरूपस्य शम्भोः सरलतनुरसौ किं जटैका? किमंह्रेश्छाया त्रैविक्रमस्य? ग्रसितुमसुहृदं किं स्थितः कालसर्पः? ॥८१॥

[हृदयरञ्जनी]

पायाद् वः क्षोणीति । सः 'क्षोणिजायाः पतिः' सीताकान्तो वः 'पायाद्' रक्षतु । स कः? 'वियति विचरतां' सिद्धादीनां 'एवं' इत्थं 'वितर्कः' विचारः

१ सेतुबन्धं बद्धं भा ३-४ । एतत्पाठानुसारेण बालबोधिनी ॥

'आसीद्' अभूत्। किम्भूतानाम्? 'यस्य' रामस्य 'प्लवङ्गैः' नलमुख्यैः वानरैः 'विपुलं' विस्तीर्णं 'अब्धौ' समुद्रे बद्धं सेतुं 'पश्यतां' विलोकयताम्। इत्थमिति किम्? 'असौ' सेतुः किं वा शम्भोरेका जटा?। किम्भूतस्य शम्भोः? 'अम्भोरूपस्य' जलरूपस्य, परमेश्वरस्याष्टमूर्त्तित्वात्। तथा चोक्तं **कालिदासेन**—

या स्रष्टुः सृष्टिराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिताऽव्याप्यविश्रम्।
यामाहुः सर्वबीजप्रकृतिरिति यथा प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नैस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥
[अभिज्ञानशाकुन्तले अं० १ श्लो० १] इति।

किम्भूता जटा? 'सरलतनुः' सरला—दीर्घा तनुः—आकारो यस्याः सा। आहोस्वित् 'त्रैविक्रमस्य' विष्णोः सम्बन्धिनः 'अंह्रेः' चरणस्य 'छाया' प्रतिबिम्बम्?। 'वा' अथवा किं 'असुहृदं' रावणं ग्रसितुं स्थितः 'कालसर्पः' सर्परूपेण काल एव वर्त्तते, इति सेतुं दृष्ट्वा नभश्चरा देवाः वितर्कयामासुरिति वाक्यार्थः। संशयोऽलङ्कारः, "तदनुक्तौ तु संशयः" इति। वितर्को व्यभिचारी अङ्गरसः॥ ८१॥

[बालबोधिनी]

पायाद् वः क्षोणीति। सः 'क्षोणिजायाः पतिः' रामः वः पायात्। स कः? यस्य रामस्य 'प्लवङ्गैः' वानरैः बद्धमतिविपुलं सेतुबन्धं पश्यतां 'वियति विचरतां' देवानां 'एवं' अमुना प्रकारेण 'वितर्कः' विचारः आसीत्। एवं कथम्? किं अम्भोरूपस्य 'शम्भोः' महादेवस्य सरलतनुः असौ एका जटा? किं त्रैविक्रमस्य 'अंह्रेः' चरणस्य छाया वा? अथ किं 'असुहृदं' रावणं ग्रसितुं कालसर्पः स्थित इव॥ ८१॥

*

वल्गन्निःसीमभीमं सरभससरभं भैरवारम्भरम्भं
संरम्भस्फारतारं तरलशतबलिभ्राजमानाञ्जनेयम्।
उन्मीलल्लीलनीलं गुरुमदकुमुदं सम्मदामन्दमैन्दं
योऽग्रे सुग्रीवसैन्यं व्यधित युधि दशग्रीवजिद् वः स पायात्॥८२॥

[हृदयरञ्जनी]

वल्गन्निःसीमेति। 'सः' रामो वः पायात्। किंलक्षणः? 'दशग्रीवजिद्'

१ °रम्भास्फारतारं तरलशतबलिं भ्रा° भा ३-४। एतत्पाठानुसारेण बालबोधिनी॥

दश ग्रीवाः—कण्ठाः यस्य स तं रावणं जितवान् । स कः ? यः 'युधि' सङ्ग्रामे 'अग्रे' पुरस्तात् सुग्रीवसैन्यं 'व्यधित' निदधे, अग्रे सुग्रीवसैन्यं कृत्वा युद्धाय चचालेति । सर्वाण्यन्यानि सैन्यविशेषणानि। किम्भूतम्? निःसीमं यथा स्यात् तथा वल्गत्। पुनर्भीमं—भयङ्करम्। पुनः 'सरभस०' रभसाश्च ते सरभाः—वानरविशेषाः तैः सह वर्त्तमानं सरभससरभम् । पुनः 'भैरवा०' भैरवः—भयङ्करः आरम्भः—उद्यमो यस्य स भैरवारम्भः रम्भो नाम सुभटो यस्मिन् तत् । पुनः 'संरम्भस्फारतारं' संरम्भेण—कोपेन स्फारास्ताराः—कनीनिका [यस्मिन् तत्], अथवा कोपेन स्फारः—महान् तारः—ताराख्यः वानरसुभटो यत्र, वीररसाविर्भावात् स्फार इत्यर्थः । पुनः 'तरलशत०' तरलाः—चपलाः शतबलयो यस्य, शतवलिः—वज्रं तद्वद् भ्राजमानः आञ्जनेयः—हनुमान्, यत्र तत् । अथवा तरलशतबलयो मुखे भ्राजमाना यस्य एवंविधो हनुमान्, बलिमुखत्वाद् वानरस्य । पुनः उन्मीलन्ती—प्रकाशमाना लीला—युद्धविलासो यस्य स नीरुः—नीरुनामा सुभटो यत्र तत् । पुनः 'गुरु०' गुरुमदः कुमुदो यत्र तत् । पुनः सम्मदः—सगर्वः अमन्दः—महान् मैन्दो यत्र तत् । तत एवं वानरसुभटैः शोभमानं सैन्यं पुरस्तात् कृत्वा जगामेत्यर्थः । उत्साहस्थायी वीरो रसः, अमर्षादिव्यभिचारिभावानामुदयः, छेकानुप्रासः, कर्तृकारकदीपकालङ्कारः ॥ ८२ ॥

[बालबोधिनी]

वल्गन्निःसीमेति । सः 'दशग्रीवजिद्' रावणजिद् रामो वः पायात् । स कः ? 'यः' रामः 'युधि' सङ्ग्रामे 'अग्रे' पुरतः सुग्रीवसैन्यं 'व्यधित' कृतवान् । अतः पद्ये सर्वाणि सैन्यविशेषणानि । कीदृक् सैन्यम् ? 'वल्गन्निःसीमभीमं' वल्गन् निःसीमः—निर्मर्यादो भीमः—वानरो यस्मिन् सैन्ये तत्तथा । 'सरभससरभं' सरभसः—सवेगः सरभो यस्मिन् । 'भैरवारम्भरम्भं' भैरवः—भयङ्कर आरम्भो यस्य, भैरवारम्भो रम्भो यस्मिन् । 'संरम्भास्फारतारं' संरम्भेण—कोपेन आस्फारः—वृद्धः तारो यस्मिन् । 'तरलशतबलिं' तरलः—चञ्चलः शतबलिर्यस्मिन् । 'भ्राजमानाञ्जनेयं' भ्राजमानः—देदीप्यमान आञ्जनेयः—हनुमान् यस्मिन् । 'उन्मीलल्लीलनीलं' उन्मीलन्ती लीला यस्य, उन्मीलल्लीलो नीलो यस्मिन् । 'गुरुमदकुमुदं' गुरुमदः कुमुदो यस्मिन् । 'सम्मदामन्दमैन्दं' सम्मदेन आमन्दः—इषन्मन्दो मैन्दो यस्मिन् तत् सम्मदामन्दमैन्दम् ॥ ८२ ॥

*

देवो दीव्यन् सुवेलाचलभुवि कपिभिर्भूतये वः स भूयाद्
यस्याऽऽदेशेन गत्वा रिपुरिति जगदे मोहमन्दोऽङ्गदेन ।

[1]कामार्थं यातुधानाधिप ! परिहरसे धर्ममर्थं च कस्माद् ?
वैदेहीं देहि [2]भर्त्रे त्वमथ निजकुलस्याऽऽशु तोयाञ्जलिं वा ॥८३॥

[हृदयरञ्जनी]

देवो दीव्यन्निति। सः 'देवः' रामनामा वो भूतये भूयात्। किंलक्षणः? कपिभिः सह सुवेलाचलभूवि 'दिव्यन्' क्रीडन्। स कः? 'यस्य आदेशाद्' यस्य रामस्याऽऽज्ञया 'अङ्गदेन' वालिपुत्रेण लङ्कां गत्वा 'रिपुः' रावणः इति 'जगदे' उक्तः। किम्भूतो रिपुः? 'मोहमन्दः' मोहेन—कामातुरतया मन्दः—मूढः। इतीति किम्? 'हे यातुधानाधिप!' रावण! त्वं कामार्थं कस्माद् हेतोः धर्ममर्थं च 'परिहरसे' त्यजसि? याभ्यां धर्माऽर्थाभ्यां साधु सर्वं पुरुषार्थजातं साधयितुं क्रमते, कामः क्षणध्वंसी, तदर्थमपरे इति। अतो वैदेहीं 'भर्त्रे' रामाय 'देहि' समर्पय, यदि नार्पयसि तर्हि ['निजकुलस्य'] स्वकुलस्य राक्षसकुलस्य 'आशु' शीघ्रं तोयाञ्जलिं देहि, उभयोर्मध्ये यद् रोचते तदाशु विधीयतामिति सः 'जगदे' अभिहितः॥ ८३ ॥

[बालबोधिनी]

देवो दीव्यन्निति। सः 'देवः' रामः वः 'भूतये' समृद्ध्यै भूयात्। किं कुर्वन्? 'सुवेलाचलभुवि' लङ्कायां कपिभिः सह 'दीव्यन्' क्रीडन्। स कः? यस्य 'आदेशेन' आज्ञया गत्वा 'अङ्गदेन' वालिसुतेन 'रिपुः' रावणः इति 'जगदे' उक्तः। कीदृशः? 'मोहमन्दः' मोहेन मन्दः—हीनबुद्धिः। इतीति किम्? 'हे यातुधानाधिप!' रावण! कामार्थे धर्ममर्थं च कस्मात् परिहरसे? 'वैदेहीं' सीतां 'भर्त्तुः' रामस्य 'देहि' परयच्छ। अथवा अस्य 'निजकुलस्य' स्वकीयराक्षसकुलस्य 'तोयाञ्जलिं देहि' दाहाञ्जलिं देहि॥८३॥

*

युक्त्वैवाऽऽप्तोपदेशश्रवणबधिरता कोणपेन्द्रस्य यस्मा-
ज्जातोऽसौ विश्रवस्तः पुनरिदमसकृन्मोहमानोऽपि जाने।
दृग्विंशत्या यदेष स्थितमपि पुरतो मर्त्यमूर्त्या स्वमृत्युं
नापश्यद् ध्वस्तवालिं विधुरितजलधिं यं स वः केशवोऽव्यात्॥८४॥

[हृदयरञ्जनी]

युक्त्वैवाप्तोपदेशेति। स केशवोऽव्यात्। 'असौ' रावणः 'यं' एनं रामं 'स्वमृत्युं पुरतः स्थितं नापश्यद्' आत्मनो मृत्युं—हन्तारं न दृष्टवान्। कया? 'दृग्विंशत्या'

१ कामार्थे या° भा १-२-३-४। एतदनुसारेण बालबोधिनी॥ २ **भर्तुस्त्वमथ निजकुलस्यास्य तो°** भा १-२-३-४। एतदनुसारेण बालबोधिनी॥

दृशां विंशतिः तयाऽपि, यः किल द्विलोचनो भवति सोऽप्यबोध्यमानोऽकथितोऽपि आगतं मृत्युं जानाति, असौ पुनः विंशतिलोचनैः पश्यन्नपि अथाङ्गद-मन्दोदरीप्रभृतिभिर्बहुधा बोध्यमानोऽपि स्ववधार्थमवतीर्णं राम-लक्ष्मणं मृत्युं न ज्ञातवान्। कथं बोध्यमानः? हे रावण! पश्य 'मर्त्यमूर्त्या' मनुष्यरूपेण 'पुरतः' अग्रतः स्थितं रामं मृत्युमिति। पुनः किंलक्षणम्? ध्वस्तः—हतो वालिर्येन स तम्। येन वालिना शतशः बद्धोऽसि तस्य हन्ताऽसौ रामः, त्वं कियत्? इति। पुनः 'विधुरित०' बद्धपयोनिधिम्, यस्य जलधेर्बलेन उज्जृम्भसे—इति बोध्यमानः। किञ्चाहमिति जाने—अस्य कोणपेन्द्रस्य आप्तोपदेशश्रवणबधिरता 'युक्तैव' नान्यथा—सत्यैव। आप्तः—यथार्थोपदेष्टा, तस्योपदेशः—कथनं अव्यभिचारिवाक्यं तस्य श्रवणे बधिरता—बाधिर्यं यस्मादसौ 'विश्रवस्तो जातः' विश्रवाः—पौलस्त्यः, अथ विश्रवाः—विगते श्रवसी—कर्णौ यस्य स तस्मात्, कर्णरहिताज्जातो बधिरो भवतीति नाश्चर्यम्। 'असकृद्' अनेकवारम्। कारणगुणाः कार्ये सम्बध्य अनुमितिरलङ्कारः। मोहोन्मादयोः सन्धिः, जडता-गर्वयोश्च॥ ८४॥

[बालबोधिनी]

युक्तैवाप्तोपदेशेति। सः 'केशवः' रामः वः अव्यात्। स कः? अङ्गदः कथयति—हे राक्षसाः! अस्य 'कोणपेन्द्रस्य' रावणस्य 'आप्तोपदेशश्रवणबधिरता' हितकथनश्रवणबधिरता युक्तैव, यस्माद् 'असौ' कोणपेन्द्रो रावणः विश्रवस्तो जातः, अन्योऽपि बधिराद् जातो बधिर एव भवति तथाऽयमपीति युक्तम्। पुनरहमिदं 'असकृत्' पुनः पुनः 'ऊहमानः' विचार्यमाणोऽपि न जाने, इदं कियत्?। एव रावणः 'दृग्विंशत्या कृत्वा' अक्ष्णां विंशत्या 'पुरतः' अग्रे स्थितमपि 'मर्त्यमूर्त्या' मनुष्यरूपेण यं रामं 'ध्वस्तवालिं' जितवालिं 'विधुरितजलधिं' विकलीकृतजलधिं रामं 'स्वमृत्युं' आत्ममृत्युं नापश्यत्॥ ८४॥

*

देयादायोधनस्थः स धनमतनु वः श्रीधरो यत्र कोपात्
कुर्वाणे बाणवृष्ट्या प्रलयजलधरासारसृष्टिं[1] समन्तात्।
वाहिन्या वानराणां रयरचिततरुक्षेपयोत्क्षिप्यमाणः[2]
प्रभ्रश्यद्बन्धुवर्गोपलविकलबलः शैलवद् रावणोऽभूत्॥ ८५॥

[हृदयरञ्जनी]

देयादायोधनस्थ इति। 'आयोधनस्थः' सङ्ग्रामस्थः 'श्रीधरः' रामः 'वः'

---

१ °सारवृष्टिं भा १-३-४। एतत्पाठानुसारेण बालबोधिनी॥ २ °तरुक्षेपयो° भा १-२-३-४। एतत्पाठानुसारेण बालबोधिनी॥

युष्मभ्यं 'अतनु' बहुलं 'धनं' कनकादि 'देयाद्' दद्यात्। स कः? रावणः 'शैलवद् अभवत्' पर्वत इव जातः। क सति? 'यत्र' यस्मिन् रामे 'कोपात्' क्रोधाद् 'बाणवृष्ट्या' बाणानां वृष्टिः तया 'प्रलयजलधरासारसृष्टिं' प्रलयकाले यो जलधरः—मेघस्तस्य आसारः—धारासम्पातः तस्य सृष्टिं—मोक्षनिर्माणं कुर्वाणे सति, यथा प्रलयकाले मेघो धारासम्पातं पर्वते करोति तथाऽयं रामः रावणे बाणवृष्टिं ववर्षेति। स किंलक्षणः रावणः? वानराणां 'वाहिन्या' सेनया 'उत्क्षिप्यमाणः' ऊर्ध्वं क्षिप्यमाणः—प्रेर्यमाणः। किम्भूतया सेनया? 'रयरचि०' रयेण रचितः—कृतः तरूणां क्षेपो यया सा तया। पुनः कथम्भूतो रावणः? 'प्रभ्रश्यद्बन्धु०' प्रभ्रश्यन्—पलायमानो बन्धुवर्गः—गोत्रसमूहो यस्य सः, उपलैः—पाषाणैः विकलं बलं—सैन्यं यस्य सः, प्रभ्रश्यद्बन्धुवर्गश्चासौ उपलविकलबलश्च सः। पर्वतः प्रलयकाले रयरचिततरुक्षेपया 'वाहिन्या' नद्या क्षिप्यमाणो भवति, प्रभ्रश्यन्तः बन्धुवर्गायमाणा उपलाः—पाषाणाः तैर्विकलं बलं—सामर्थ्यं यस्य सः। राम-मेघयोः पर्वत-रावणयोः श्लेषः। पदश्लेषालङ्कार उपमा वा ॥ ८५ ॥

[बालबोधिनी]

देयादायोधनेति। सः 'आयोधनस्थः' सङ्ग्रामस्थः 'श्रीधरः' रामः वः 'अतनु' बहुलं धनं देयात्। स कः? 'यत्र' रामे कोपाद् बाणवृष्ट्या कृत्वा 'समन्तात्' सर्वतः प्रलयजलधरासारवृष्टिं कुर्वाणे सति रावणः 'शैलवत्' पर्वतवद् अभूत्। कीदृशः? वानराणां 'वाहिन्या' सेनया 'उत्क्षिप्यमाणः' उत्खिद्यमानः। अपरं कीदृशः? प्रभ्रश्यद्बन्धुवर्गोपलविकलबलः' बन्धूनां वर्गाः—समूहाः प्रभ्रश्यन्तः—पतन्तः बन्धुवर्गा एव उपलास्तैर्विकलं—कलारहितं बलं—सैन्यं यस्य स तादृशः। कीदृशया वाहिन्या? 'रयरचिततरूत्क्षेपया' रयेण—वेगेन रचितः—कृतः तरूणां उत्क्षेपो यया सा तया। प्रलये यो जलधरः—मेघः तद्वद् आसारवृष्टिः—वेगवती वृष्टिः ताम् ॥ ८५ ॥

*

कुर्वाणो [१]वारवाणावरणमपि रणप्राङ्गणे बाणघातैः
निष्प्राणं कोणपौघं लघयतु स रघुग्रामणीरामयं वः।
मित्रस्यैवोपकर्तुं पवनतनुभुवस्तत्[२]पितृप्राणपाशान्
रक्षःपाशप्रयुक्तान् निशि पतगपतिस्त्रासयामास यस्मात् ॥ ८६ ॥

---

१ वारवाणां वर° एतत्पाठानुसारेण बालबोधिनी। वानराणां वर° भा ३-४ ॥ २ °त्पितुः पाशयुक्तान् भा १-२। °त्पितुः प्राणनाशान् भा ३-४, एतदनुसारेण बालबोधिनी ॥

[हृदयरञ्जनी]

कुर्वाणो वारवाणेति । सः 'रघुग्रामणीः' रघुश्रेष्ठो रामः 'वः' युष्माकं 'आमयं' रोगं 'लघयतु' स्फोटयतु । किम्भूतः ? 'रणप्राङ्गणे' रणभूमौ 'वारवाणावरणं' वारवाणः—कम्बुकस्तेन आवरणं—आच्छादनं कुर्वाणः । अन्यच्च बाणघातैः 'कोणपौघं' राक्षससमूहं 'निःप्राणं' निर्गतप्राणमपि कुर्वाणः । स कः ? 'पतगपतिः' गरुडः 'यस्माद्' रामाद् 'निशि' रात्रौ 'तत्पितृप्राशपाशान्' तस्य—हनुमतः पिता—वायुः तस्य प्राशाः—भक्षकाः त एव पाशाः तान् नागपाशान् 'त्रासयामास' भीषयति स्म दूरीचकार । किम्भूतान् ? 'रक्षःपाशप्रयुक्तान्' अप्रशस्तो रक्षः रक्षःपाशः तेन प्रयुक्तान्—मेघनादप्रहितान् । उत्प्रेक्षते—किं कर्तुमिव ? 'मित्रस्य' सुहृदः 'पवनतनुभुवः' हनुमत उपकर्तुमिव, पितृद्वेषिणो नागान् हत्वा उपचक्रे इति । अनुप्रासः उत्प्रेक्षा ॥ ८६ ॥

[बालबोधिनी]

कुर्वाणो इति । सः 'रघुग्रामणीः' रामो वः 'आमयं' रोगं 'लघयतु' अल्पीकरोतु । कीदृशः ? 'रणप्राङ्गणे' सङ्ग्रामाङ्गणे बाणघातैः कृत्वा 'कोणपौघं' रक्षसां समूहं निष्प्राणं कुर्वाणः । अपरं रणप्राङ्गणे 'वारणानां' हास्तिनामपि 'वरणं' आच्छादनं कुर्वाणः । स कः ? 'यस्माद्' रामात् 'पतगपतिः' गरुडः मित्रस्य 'पवनतनुभुवः' हनुमतः उपकर्तुमिव 'तत्पितुः' हनुमत्पितुर्वायोः 'प्राणनाशान्' सर्पान् त्रासयामास । कीदृशान् सर्पान् ? 'निशि' रात्रौ 'रक्षःपाशप्रयुक्तान्' रक्षसां पाशेषु प्रयुक्तान् ॥ ८६ ॥

*

लक्ष्मीं लक्ष्मीपतिर्वः प्रथयतु मथिते लक्ष्मणे शत्रुशक्त्या
शोकार्त्ते यत्र साकं विलपति पलभुग्वानराभ्यां सखिभ्याम् ।
सर्वेषामेव तेषाममरपुरमभि प्रस्थितानां तदानी-
मानीय द्रोणमद्रिं सरभसमकरोन्मारुतिः मार्गरोधम् ॥ ८७ ॥

[हृदयरञ्जनी]

लक्ष्मीं लक्ष्मीति । स लक्ष्मीपतिः 'वः' युष्माकं लक्ष्मीं 'प्रथयतु' पृथक्करोतु । 'मारुतिः' मरुतस्यापत्यं मारुतिः—हनुमान् द्रोणमद्रिमानीय तेषामेव सर्वेषां वानराणां 'मार्गरोधं अकरोद्' मार्गमरुधत् । किंलक्षणानां तेषाम् ? 'तदानीं' तस्मिन् सङ्ग्रामसमये 'अमरपुरमभि प्रस्थितानां' स्वर्गं प्रति चलितानाम्, सङ्ग्रामे मृतानां हि स्वर्गगतिः ततो रुरोध 'सरभसं' तूर्णं यथा भवति क्रियाविशेषणम् । क सति ? 'यत्र' रामे सखिभ्यां

'पलभुग्वानराभ्यां' पलं भुङ्क्ते पलभुग्—बिभीषणः वानरः—सुग्रीवः ताभ्यां साकं 'विलपति सति' विलापं—रोदनं कुर्वति सति। किंलक्षणे रामे? 'शोकार्त्ते' शोकपीडिते। क्व सति? 'शत्रुशक्त्या' वैरिशक्तिप्रहारेण लक्ष्मणे मथिते सति। इन्द्रजिता शक्त्या लक्ष्मणस्ताडितोऽभूत् तदा हनुमान् द्रोणाद्रिमानीय लक्ष्मणतन्वानरांश्च विशल्यानकरोदिति सहोक्तिध्वनितोऽर्थः, यथा कश्चित् गच्छतो लोकस्य पर्वतपातेन मार्गं रुणद्धीति ॥ ८७ ॥

[बालबोधिनी]

लक्ष्मीमिति। स लक्ष्मीपतिः सीतापती रामः वः लक्ष्मीं प्रथयतु। स कः? यत्र रामे लक्ष्मणे शत्रुशक्त्या 'मथिते' मूर्च्छिते सति 'शोकार्त्ते' दुःखेन पीडिते पलभुग्वानराभ्यां बिभीषण-सुग्रीवाभ्यां सखिभ्यां साकं विलपति सति 'मारुतिः' हनुमान् 'तदानीं' तस्मिन् अवसरे द्रोणमद्रिमानीय 'अमरपुरं' इन्द्रपुरम् 'अभि' संमुखं प्रस्थितानां सर्वेषां एव तेषां वानराणां मार्गरोधं 'मार्गमुद्रणं' अकरोत्, कृतवान् पलभुक् वानरश्च तौ बिभीषणः सुग्रीवश्च ॥ ८७ ॥

*

उत्तीर्णस्तूर्णमब्धिः क्षितिदुहितुरभिज्ञानमानीतमक्षो
रक्षो जघ्ने च भग्नं वनमनलभयं लम्भिता येन लङ्का।
सौमित्रिः शस्त्रभिन्नः पुनरधिगमितः प्राणितं तत् कपेः किं
कृत्वा तस्यानृणः स्यामिति हरिरधुनाऽपीद्धचिन्तोऽवताद् वः ॥८८॥

[हृदयरञ्जनी]

उत्तीर्णस्तूर्णमिति। हरिः 'वः' युष्मान् अवतात्। किंलक्षणः 'इति इद्धचिन्तः' इति—अमुना प्रकारेण इद्धा—समृद्धा चिन्ता—विचारो यस्य स इद्धचिन्तः। इतीति किम्? 'तस्य' हनुमतः तत् किमस्ति यत् कृत्वा कपेः 'अनृणोऽहं स्यां' अनृणीभवेयम्? तादृशं मम नास्तीति चिन्ताकुल इति भावः। तस्य कस्य? 'येन' हनुमता तूर्णमब्धिः 'तीर्णः' अतारि। अन्यत् 'क्षितिदुहितुः' सीतायाः 'अभिज्ञानं' चूडारत्नमानीतम्। 'च' अन्यद् 'अक्षो रक्षः' अक्षयकुमारो रावणपुत्रः 'जघ्ने' हतः। तथा 'वनं' रावणोद्यानं 'भग्नं' अभाजि। अन्यद् लङ्का 'अनलभयं लम्भिता' दग्धा। 'च' अन्यत् शस्त्रभिन्नः 'सौमित्रिः' लक्ष्मणः पुनरपि 'प्राणितं' जीवितं 'समधिगमितः' प्रापितः। एवमुपकुर्वतः कपेः येन प्रत्युपकारः स्यात् तद् नास्तीत्यर्थः। चिन्ताऽत्र व्यभिचारी भावोऽङ्गी रसः। दीपकमालालङ्कारः ॥ ८८ ॥

[बालबोधिनी]

उत्तीर्णस्तूर्णमिति । हरिर्वः अव्यात् । कीदृशः ? अहं 'तत्कपेः' तस्य कपेः–हनुमतः किं कृत्वा अनृणः स्याम् ? इति कृत्वा 'अधुनाऽपि' इदानीमपि 'इद्धाचिन्तः' इद्धा–समृद्धा चिन्ता यस्य स तथा तस्य । कस्य ? 'येन' हनुमता तूर्णमाब्धिरुत्तीर्णः, अपरं येन 'क्षितिदुहितुः' सीतायाः 'अभिज्ञानं' चिह्नं आनीतम्, अपरं येन 'अक्षो रक्षो जघ्ने' अक्षनामा राक्षसः ताडितः, अपरं येन 'वनं भग्नं' वाटिका उन्मूलिता, अपरं येन 'लङ्का अनलभयं लम्भिता' लङ्कायाः अग्नेः सकाशाद् भयं उत्पादितम्, अपरं येन 'सौमित्रिः' लक्ष्मणः 'शस्त्रभिन्नः' मृतः सन् पुनः 'प्राणितं' जीवितं आधिगमितः ॥ ८८ ॥

*

युष्माकं शुष्मशाली विदलयतु विभुर्जानकीजानिरेनः
सेनां पश्यन्नरीणां रणभुवि कपिभिर्मार्यमाणामरीणैः ।
अस्कन्नस्कन्धबन्धद्युतिभरमपरिक्षिप्तशाखं मरुद्भि-
र्यस्तूर्णं कुम्भकर्णक्षितिरुहमदहत् तीव्रहेतिः शिखीव ॥ ८९ ॥

[हृदयरञ्जनी]

युष्माकं शुष्मशालीति । जानकीजानिः सः 'विभुः' रामः युष्माकं 'एनः' पापं विदलयतु । किंलक्षणः ? शुष्मवद्–वह्निवत् शालत इति शुष्मशाली वह्निसमस्तेजसा यः रामः 'तूर्णं' शीघ्रं कुम्भकर्णक्षितिरुहं 'अदहद्' ददाह । किंलक्षणम् ? 'अस्कन्न०' अस्कन्नः–अक्लिष्टः स्कन्धबन्धः–अंसप्रदेशस्तस्य द्युतिभरः–कान्तिसमूहो यस्य तम् । किम्भूतम् ? 'मरुद्भिः' देवैरलूनाः शाखाः–भुजा यस्य तम् । किंलक्षणो रामः ? 'तीव्रहेतिः' तीव्रा हेतिः–शस्त्रं यस्य सः । क इव ? यथा 'शिखी' वह्निः वृक्षं दहति । किम्भूतो वह्निः ? 'तीव्रहेतिः' दुःसहज्वालः । किम्भूतं वृक्षम् ? अस्कन्नः–प्रकारान्तरेण व्यवस्थितः मूलादाशाखस्कन्धबन्धः तस्य द्युतिभरः–शोभातिशयो यस्य तं तथा 'मरुद्भिः' वायुभिः 'अपरिक्षिप्त०' अपातितविटपम् । किं कुर्वन् रामो ददाह ? रणभुवि अरीणां सेनां 'पश्यन्' विलोकयन् । किंलक्षणां सेनाम् ? 'अरीणैः' श्रेष्ठैः कपिभिर्मार्यमाणाम् । उपमा ॥ ८९ ॥

[बालबोधिनी]

युष्माकमिति । सः 'विभुः' रामः युष्माकं 'एनः' पापं 'विदलयतु' चूर्णीकरोतु । कीदृशः ? 'शुष्मशाली' बलवान् । पुनः कीदृशः ? 'जानकीजानिः' सीतापतिः, जानकी

१ °परित्यक्तशाखं भा १ ॥

जाया यस्य स जानकीजानिः, "जायाया निङ्" [पाणिनि० ५-४-१३४] इति निङ्-विधानात् तस्य ङित्वादन्त्यादेशत्वं। अपरं कीदृशः? 'रणभुवि' सङ्ग्रामे 'अरीणां' राक्षसानां 'अरीणैः' अक्षीणैः 'कपिभिः' वानरैर्मार्यमाणां सेनां पश्यन्। स कः? 'यः' रामः कुम्भकर्णक्षितिरुहम् अदहत्। कीदृशः? 'तीव्रहेतिः' तीक्ष्णानि आयुधानि यस्य स तथा। कीदृशं कुम्भकर्णक्षितिरुहम्? 'अस्कन्नस्कन्धबन्धद्युतिभरं' अस्कन्नः स्कन्धस्य बन्धो यस्य तस्य द्युतिः—कान्तिः तस्या भरो यस्य स तम्। अपरं कीदृशम्? 'मरुद्भिः वानरैः अपरिक्षिप्तशाखम्। क इव 'शिखीव' यथा शिखी—अग्निः क्षितिरुहं—वृक्षं दहति। कीदृशोऽग्निः? 'तीव्रहेतिः' तीक्ष्णशिखः। कीदृशं वृक्षम्? अस्कन्नस्कन्धबन्धद्युतिभरम्, अपरं 'मरुद्भिः' वायुभिः अपरिक्षिप्तशाखम् ॥ ८९ ॥

*

मैथिल्या मन्मथाग्निः प्रथममथ महांश्चिक्षिपे शोकरोचिः-[1]
केशो[2] लङ्केशचित्ते त्रिदशपतिजितं निघ्नता लक्ष्मणेन।
कीशाधीशेन पश्चाद् गुरुगिरिशिखरैर्वर्षताऽमर्षवह्निः
नायं तैः किन्तु दग्धो रिपुरिषुशिखिना यस्य सोऽस्यत्वघं वः ॥९०॥

[हृदयरञ्जनी]

मैथिल्या मन्मथाग्निरिति। 'सः' रामः 'वः' युष्माकं अघं 'अस्यतु' प्रेरयतु। स कः? यस्य 'इषुशिखिना' बाणाग्निना 'रिपुः' शत्रुः रावणो दग्धः। स कः शत्रुः? 'तैः' वह्निभिः यः शत्रुर्न दग्धः तथापि तादृशो रावणः येन बाणाग्निना दग्धः। के ते वह्नयः? इत्याह—प्रथमं 'मैथिल्या' सीतया महामन्मथाग्निश्चिक्षिपे यस्मिन्निति योज्यम्। लङ्केशचित्ते। तथा लक्ष्मणेन 'शोकरोचिःकेशः' रोचिः—केशा यस्य स रोचिःकेशः, शोक एव रोचिःकेशः—वह्निः 'चिक्षिपे' क्षिप्तः। किंलक्षणेन? 'त्रिदशपतिजितं' [रावण]पुत्रं 'निघ्नता' मारयता। तथा पश्चात् 'कीशाधीशेन' सुग्रीवेण 'अमर्षवह्निः' कोपाग्निरधायि। किम्भूतेन सुग्रीवेण? 'गुरुगिरिशिखरैर्वर्षता' गुरुपाषाणान् निक्षिपता। तथाप्येतैर्न दग्धः किन्तु रामशराग्निना दग्ध इति ॥ ९० ॥

[बालबोधिनी]

मैथिल्येति। 'सः' रामः वः अघं 'अस्यतु' नूयकयतु (?क्षपयतु)। स कः? 'यस्य' रामस्य 'इषुशिखिना' बाणरूपेणाग्निना अयं 'रिपुः' रावणः दग्धः, 'किन्तु' पुनः 'तैः' शिखिभिर्न दग्धः?। तैः कैः? यः प्रथमं 'मैथिल्या' सीतया महान् मन्मथाग्निः चिक्षिपे।

[1] °कशोचिः° भा १-२-३-४। एतदनुसारेण बालबोधिनी॥ [2] क्लेशो भा १-३-४। एतदनुसारेण बालबोधिनी॥

'अथ' तदनन्तरं लक्ष्मणेन 'त्रिदशपतिजितं' इन्द्रजितं निघ्नता सता यः क्लेशः 'शोकशोचिः' शोकरूपोऽग्निः निचिक्षिपे। पश्चात् 'कीशाधीशेन' सुग्रीवेण गुरुगिरिशिखरैर्वर्षता सता 'अमर्षवह्निः' यः क्रोधरूपो वह्निश्चिक्षिपे तैर्न दग्धः ॥ ९० ॥

*

पुण्याहारम्भसन्ध्यावसरमिव पुरः शोणितैः कोणपानां
दृष्ट्वा कष्टान्धकारं विरतमिव विदन्नस्तु स श्रेयसे वः ।
रक्षोराजेन सार्द्धं हरधरणिधरोद्धारधीरेण युद्ध-
क्रीडा व्रीडा¹य नाभूदवगणितगणाधीशचापस्य यस्य ॥ ९१ ॥

[हृदयरञ्जनी]

पुण्याहारम्भेति । स वः 'श्रेयसेऽस्तु' कल्याणाय स्तात् । किं कुर्वन् ? 'कष्टान्धकारं' कष्टं—दुःखमेव अन्धकारं तद् 'विरतमिव' शान्तमिव 'विदन्' जानानः । किं कृत्वा ? 'कोणपानां' राक्षसानां 'शोणितैः' रुधिरैः 'पुरः' अग्रे पुण्याहारम्भसन्ध्यावसरं आयातमिव दृष्ट्वा । पुण्यं च तद् अहश्च पुण्याहं तस्य आरम्भः—प्रातःकालः तस्य सन्ध्याया अवसरं समयं आगतमिव विलोक्य दुःखकारीणि दिनानि गतानि सुखकारीण्यागतानीति भावः । स कः ? यस्य 'युद्धक्रीडा' सङ्ग्रामखेलनं 'व्रीडाय' लज्जायै नाभूत् । किंलक्षणा युद्धक्रीडा ? 'रक्षोराजेन' रावणेन सार्द्धं क्रियमाणा । किम्भूतेन ? 'हरधरणि०' हरधरणिधरः—कैलासः तस्योद्धारः—ऊर्ध्वचलनं तत्र धीरः—निश्चलः तेन । किम्भूतम् ? यस्य 'अवगणित०' अवगणितः—अवमानितः गणाधीशः—महेशः तस्य चापः—धनुर्येन स तस्य । उभावपि सबलाविति समपराक्रमौ, अत एव लज्जा नाभूदित्यर्थः ॥ ९१ ॥

[बालबोधिनी]

पुण्याहारम्भेति । 'सः' रामः वः श्रेयसेऽस्तु । कीदृशः ? 'पुरः' अग्रे 'कोणपानां' राक्षसानां शोणितैः कृत्वा पुण्याहारम्भसन्ध्यावसरमिव दृष्ट्वा 'कष्टान्धकारम्' कष्टरूपं अन्धकारं 'विरतं' गतमिव विदन् । पुण्यं च तद् अहश्च पुण्याहम्, अह्नोऽदन्तत्वं "राजाहःसखिभ्यष्टच्" [पाणिनि० ५-४-९१] इति समासान्तटच्विधानात्, तस्य आरम्भसन्ध्या—प्रातःसन्ध्या तस्या अवसरः उत्खातं पुण्याहारम्भसन्ध्यावसरम् । स कः ? 'यस्य' रामस्य 'रक्षोराजेन' रावणेन सह युद्धक्रीडा अभूत्, 'च' अपरं 'व्रीडा' लज्जा च नाभूत् । राजन्-शब्दस्यापि अदन्तत्वं "राजाहःसखिभ्यः" [पाणिनि० ५-४-९१] इत्यादिना । कीदृशस्य रामस्य ? 'अवगणितगणाधीशचापस्य' अवगणितं—धिक्कृतं महादेवस्य चापं—धनुर्येन स

---

¹ **व्रीडा च ना°** भा ३-४ । एतदनुसारेण बालबोधिनी ॥

तथा तस्य। कीदृशेन रक्षोराजेन 'हरधरणिधरोद्धारधीरेण' हरस्य धरणिधरः—कैलाशः तस्योद्धारेण धीरः तेन, उभयोरपि ईश्वराधिकबलत्वाद् युद्धक्रीडा बभूव, न व्रीडा। अन्यत्र त्वनयोर्व्रीडैव तुल्यपुरुषार्थत्वाभावात् ॥ ९१ ॥

*

तस्माद् वः सर्वसिद्धिर्भवतु भगवतो भूरिमायाप्रपञ्चः
पञ्चत्वं प्राप्य यस्मादगमदमरतां राक्षसः सोऽपि सम्यक्।
किन्तु श्रीकान्तकान्ताहठहरणमहापातकात् तेन काम-
व्यामोहान्धेन बन्धुक्षयनिरयरुजः सेहिरे जीवतैव ॥ ९२ ॥

[हृदयरञ्जनी]

तस्माद् व इति। 'तस्माद्' रामाद् 'वः' युष्माकं 'सर्वसिद्धिर्भवतु' सर्वेषां कामानां—मनोरथानां सिद्धिः—निष्पत्तिर्भवतु। 'यस्माद्' रामात् सकाशाद् राक्षसोऽपि सम्यगमरतामगमत्। सम्यग्विशेषणं मोक्षार्थप्रतिपादकम्। पञ्चत्वं 'प्राप्य' अधिगम्य सद्वृत्तमोक्षं प्राप्नोति। किं तत्र नेत्याह—'भूरिमायाप्रपञ्चोऽपि' भूरि—अधिकः माया—कपटवृत्तिस्तस्याः प्रपञ्चः—विस्तारो यस्य सः। एवंविधोऽपि राक्षसः यस्मान्मरणमधिगम्य मोक्षं लेभे, सद्वृत्तस्य का कथा? इत्यर्थः। विषमालङ्कारः। ननु कृतानां पातकानां भक्तिमन्तरा कथं तस्य मुक्तिर्जाता? "नाशुभं क्षीयते कर्म कल्पकोटीशतैरपि" इति वचनात्, तत्राह—किन्तु 'कामव्यामोहान्धेन' कामेन—अभिलाषेण मन्मथेन वा तस्य व्यामोहस्तेनान्धेन रावणेन जीवतैव सता 'बन्धुक्षयनिरयरुजः' बन्धुः—ज्ञातिवर्गः तस्य क्षयः—नाशो मरणं स एव निरयः—नरकः तत्र रुजः—पीडाः ताः 'सेहिरे' भुक्ताः। कस्मान्नरकप्राप्तिः? इत्याह—'श्रीकान्तकान्ता०' श्रीकान्तः—रामः तस्य कान्ता—वल्लभा सीता तस्याः हठेन हरणं—चौर्यं तज्जनितात् पातकाद् हेतोरिहलोके तत्पातकपरिपाकजनितं निरयं बुभुजे रावण इति। तथा चोक्तम्—"अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते"। इति वचनात्। वास्तवालङ्कारः ॥९२॥

[बालबोधिनी]

तस्माद् वः सर्वेति। तस्माद् 'भगवतः' रामाद् 'वः' युष्माकं सर्वसिद्धिर्भवतु। तस्मात् कस्मात्? यस्माद् भगवतः सोऽपि 'राक्षसः' रावणः 'पञ्चत्वं' मरणं प्राप्य सम्यग् अमरतां मुक्तिं 'अगमद्' अप्रापत्। कीदृशो राक्षसः? 'भूरिमायाप्रपञ्चः' बहुलो मायायाः प्रपञ्चो यस्य स तथा। 'किन्तु' पुनः 'तेन' राक्षसेन जीवतैव सता 'श्रीकान्तकान्ताहठहरणमहापातकात्' सीताहरणमहापातकाद् 'बन्धुक्षयनिरयरुजः सेहिरे' बन्धूनां क्षयः—मरणं तदेव नरकं तस्य रुजः—पीडाः बन्धुक्षयनिरयरुजः। कीदृशेन तेन? 'कामव्यामोहान्धेन' कामेन—स्मरेण व्यामोहः तेनान्धः तेन कामव्यामोहान्धेन ॥९२॥

पौलस्त्ये कालमेघत्विषि मुषितमहीकन्यकास्येन्दुकान्तौ
शान्ते रामः श्रियं वो वितरतु विरतस्फारबाष्पाम्बुपूरः।
यः साम्राज्यप्रतिष्ठां प्रथममगमयद् वानरेन्द्रं वयस्यं
तं वैरिभ्रातरं च स्वयमथ मथितस्थाणुधन्वा जगन्वान् ॥ ९३ ॥

[हृदयरञ्जनी]

पौलस्त्य इति। स रामः वः 'श्रियं वितरतु' लक्ष्मीं वितरतु। किम्भूतः? विरतः—शान्तः स्फारश्चासौ बाष्पाम्बुपूरश्च, विरतः—गतः बाष्पाम्बुपूरो यस्य सः। क्व सति? 'पौलस्त्ये शान्ते सति' पुलस्त्यस्यापत्यं पौलस्त्यः तस्मिन् रावणे मृते सति मारिते सति किम्भूते? 'काल०' कृष्णघनकान्तौ। पुनः किं०? 'मुषित०' महीकन्यका—सीता तस्याः आस्येन्दुः तस्य कान्तिः, मुषिता—हृता महीकन्यकास्येन्दुकान्तिर्येन स तस्मिन्, मेघे शान्ते विरतस्फाराम्बुपूरो भवति समयः। किम्भूते मेघे? कालत्विषि तथा मुषितेन्दुकान्तौ, अपहृत-चन्द्रशोभो[भवति] समयो मेघत्विषि। मथितस्थाणुधन्वा रामः स्वनगरं प्रति 'जगन्वान्' गच्छन् 'प्रथमं' आदौ 'वानरेन्द्रं' सुग्रीवं 'वयस्यं' मित्रं सुग्रीवं 'साम्राज्यश्रियं' राज्यलक्ष्मीं 'अगमयद्' अयोजयद् राज्यं ददौ। 'च' अन्यत् तं च 'वैरिभ्रातरं' रावणभ्रातरं विभीषणं लङ्कासाम्राज्यलक्ष्मीमगमयत् साम्राज्ये प्रतिष्ठाम्। किम्भूतो रामः? 'अथ' अनन्तरं स्वयं जगन्वान् स्वनगरं प्रति गमिष्यन्। रूपकोपमा ॥ ९३ ॥

[बालबोधिनी]

पौलस्त्ये इति। स रामो वः श्रियं वितरतु। कीदृशः? 'पौलस्त्ये' रावणे शान्ते सति 'विरत[3]स्फारबाष्पाम्बुपूरः' विरतः—गतः स्फारः[4]—वृद्धो बाष्पाम्बूनां पूरो यस्य स तथा। कीदृशे पौलस्त्ये? 'कालमेघद्युतिमुषितमहीकन्यकास्येन्दुकान्तौ' कालश्चासौ मेघश्च तस्य द्युतिरिव द्युतिर्यस्य स तथा तेन मुषिता—चोरिता महीकन्यका—सीता तस्याः आस्यं तदेव इन्दुः—चन्द्रः, द्युत्या मुषिता महीकन्यकास्येन्दुकान्तिर्येन स तथा तस्मिन् स कः 'यः।' रामः प्रथमं 'वानरेन्द्रं' सुग्रीवं 'वयस्यं' सखिं(सखायं) साम्राज्यप्रतिष्ठां अगमयत्। 'अथ' अनन्तरं 'वैरिभ्रातरं' विभीषणं साम्राज्यप्रतिष्ठामगमयत्। गत्यर्थत्वाद् "गतिबुद्धि०" [पाणिनि० १-४-५२] इत्यादिना द्विकर्मकत्वम्। 'च' अनन्तरं यो रामः स्वयं साम्राज्यप्रतिष्ठां 'जगन्वान्' प्राप्तवान्। कीदृशः? 'मथितस्थाणुधन्वा' विदलितं शम्भोर्धनुर्येन स तथा ॥ ९३ ॥

*

---

१ °घद्युतिमुषि° भा १-२-३-४। एतत्पाठानुसारेण बालबोधिनी॥ २ विगतस्फार° भा ३-४। एतत्पाठानुसारेण भा० प्रत्यन्तरे बालबोधिनी, ३ विगत°, ४ °पूरः' विगतः स्फा°,

सोऽस्तु प्रीत्यै प्रभुर्वः शुचिरपि दहने यत्पुरन्ध्री प्रविष्टा
शुद्ध्यै न श्रद्दधे तन्ननु जनककुले काऽप्यधर्मस्य शङ्का ।
सा पत्युः किन्तु मृत्युं वितथमपि तदा तथ्यभावेन मत्वा
धिक् पापा जीविताऽस्मीत्यनुशयविवशा नूनमेतच्चकार ॥ ९४ ॥

[हृदयरञ्जनी]

सोऽस्त्विति । स प्रभुर्वः 'प्रीत्यै अस्तु' सुखाय भवतु । स कः ? 'यत्पुरन्ध्री' यस्य पुरन्ध्री-स्त्री सीता 'शुचिरपि' पवित्राऽपि 'शुद्ध्यै' आत्मनो देहशुद्ध्यर्थं यद् दहने प्रविष्टा तद् लोकः तथा 'न श्रद्दधे' न मेने 'ननु' निश्चितं हि यस्मात् कारणाद् 'जनककुले का अधर्मस्य शङ्का ?' सीतायां व्यभिचारशङ्का नास्तीति तस्या दहनप्रवेशमन्यथा मन्यते स्म । कथम् ? किन्तु 'सा' सीता 'इत्यनुशयविवशा' इतिपश्चात्तापेन परवशार्त्ता 'नूनं' निश्चितं 'एतद्' अग्निप्रवेशलक्षणं कर्म 'चकार' कृतवती । इतीति किम् ? 'पापा' पापरूपाऽहं 'जीविताऽस्मि' अद्यापि जीवामि मां धिक् । किं कृत्वा ? 'पत्युः' रामस्य 'वितथमपि' असत्यमपि अपरमार्थमपि 'मृत्युं' मरणं 'तदा' तस्मिन् समये 'तथ्यभावेन' परमार्थेन 'मत्वा' बुद्ध्वा । अयमनुशय इति हेतोः शरीरं त्यक्षामीति अग्नौ प्राविक्षत्, न तु शुद्ध्यर्थं इति लोकैस्तदा ज्ञातमिति ॥ ९४ ॥

[बालबोधिनी]

सोऽस्तु प्रीत्यै इति । स विभुः वः प्रीत्यै अस्तु । स कः ? 'यत्पुरन्ध्री' सीता 'शुचिरपि' शुद्धाऽपि दहने प्रविष्टा सती तद् न श्रद्दधे । तत् किम् ? 'ननु' इति वितर्के । जनककुलेऽधर्मस्य शङ्काऽपि का ? किन्तु अपरमपि श्रद्दधे—साऽहं तदा 'वितथं' अनृतमपि 'पत्युः' रामस्य मृत्युं 'तथ्यभावेन' सत्यभावेन 'मत्वा' ज्ञात्वा धिग् जीविताऽस्मि 'इत्यनुशयविवशा' इतिपश्चात्तापपरवशा सती 'नूनं' निश्चितं एतद् दहनप्रवेशनं 'चकार' कृतवती ॥ ९४ ॥

*

मन्वानः सूर्यसूनुं घनकनकशिलाभङ्गपिङ्गं प्लवङ्गं
यः साक्षात् सूर्यमेव व्युपरमसमये दुर्दशाया निशायाः ।
निःशोकः कोकलीलामलभत दयितासङ्गमाज्जङ्गमानां
प्राणानां स्थावरत्वं विरचयतु स वः सेविताङ्घ्रिः सुरौघैः ॥ ९५ ॥

---

१ विभु° भा ३-४ । एतदनुसारेण बालबोधिनी ॥ २ शुद्ध्यैषा[सा] श्रद्दधे तन्नहि जन° भा ३-४ ॥

[हृदयरञ्जनी]

मन्वान इति। स वः 'जङ्गमानां प्राणानां' चराणां प्राणानां—असूनां 'स्थावरत्वं' स्थिरत्वं 'विरचयतु' निर्मातु। किंविधः ? 'सुरौघैः' देवसमूहैः 'सेविताङ्घ्रिः' आराधितपादः। स इति कः? 'निःशोकः' गतशोकः सन् 'कोकलीलां' चक्रवाकलीलां 'अलभत' लेभे। कस्माद्? 'दयितासङ्गमात्' सीताप्राप्तेः, यथा कोकश्चक्रवाकीं प्राप्य निःशोको भवति तथेति। किंकुर्वाणः 'यः' रामः 'प्लवङ्गं' सुग्रीवं साक्षात् सूर्यं 'मन्वानः' जानानः। कदा? दुर्दशाया निशायाः 'व्युपरमसमये' अवसाने प्रभाते। किंलक्षणं प्लवङ्गं सूर्यं च? कनकशिलायाः—सुवर्णपाषाणस्य भङ्गः—छेदः तद्वत् पिङ्गः, सूर्योऽपि पिङ्गलः। 'प्लवङ्गं' सूर्यस्य सूनुं पुनः। उपमालङ्कारः चक्रवाक-रामयोः सीता-चक्रवाक्योः दुर्दशा-निशोः सुग्रीव-सूर्ययोः ॥ ९५ ॥

[बालबोधिनी]

मन्वानः सूर्येति। 'सः' रामः वो जङ्गमानां प्राणानां स्थावरत्वं 'विरचयतु' स्थैर्यं करोतु। कीदृशः? 'सुरौघैः सेविताङ्घ्रिः' देवसमूहैः सेवितौ अंह्री यस्य स तथा। स कः? 'यः' रामः निःशोकः सन् दुर्दशाया निशायाः 'व्युपरमसमये' अन्तावसरे दयितासङ्गमात् 'कोकलीलां' चक्रवाकलीलां 'अलभत' प्राप्तवान्। अपरं कीदृशः? 'सूर्यसूनुं प्लवङ्गं' सुग्रीवं साक्षात् सूर्यमेव मन्वानः। कीदृशम्? 'घनकनकशिलाभङ्गपिङ्गं' घनं—बहु यत् कनकं तस्य शिला तस्याः भङ्गवत् पिङ्गं—कर्बुरकम् ॥ ९५ ॥

*

प्रम्लानां पुष्पघातैरपि कुसुमशरप्रेषितैः प्लोषशून्यां,[1]
संसृष्टेनाग्निनाऽपि[2] प्रभुरवनिसुतां वीक्ष्य हृष्टोऽवताद् वः।
राज्ञस्तस्याऽऽज्ञया यः कृतवनगमनः प्राप यां यामवस्थां
तां तामद्यापि शृण्वन्ननुभवति जनश्चेतसा तादृशैव ॥ ९६ ॥

[हृदयरञ्जनी]

प्रम्लानामिति। स प्रभुः वोऽवतात्। किंलक्षणः? 'हृष्टः' सन्तुष्टः। किं कृत्वा? 'अवनिसुतां' [सीतां] निरीक्ष्य। किंलक्षणां सीताम्? 'संसृष्टेनापि' स्पर्शमुपगतेनापि 'वह्निना' वैश्वानरेण 'प्लोषशून्यां' दाहरहितामदग्धां। पुनः किम्भूताम्? 'कुसुमशरप्रेषितैः' कामप्रयुक्तैः पुष्पघातैरपि 'प्रम्लानां' दुःखितां पीडिताम्, अत्रात्यन्त-

---

१ **शोकशून्यां** भा ३-४। एतदनुसारेण बालबोधिनी ॥ २ **संस्पृष्टे°** भा १-३-४। एतदनुसारेण बालबोधिनी ॥

सुकुमारत्वं व्यङ्ग्यम् । कथम् ? आदौ पुष्पाणि सुकुमाराणि, ततः कामः प्रयोक्ता सोऽपि अनङ्गः, सकामो रामः। तस्य 'राज्ञः' पितुः दशरथस्य 'आज्ञया' निदेशेन कृतवनगमनः सन् यां यामवस्थां प्राप, जनः तां तामवस्थां शृण्वन् पुराणादिषु 'अद्यापि' इदानीमिव चेतसा अनुभवति 'तादृशैव' तल्लक्षणेनैवेति ॥ ९६ ॥

[बालबोधिनी]

प्रम्लानामिति । सः 'प्रभुः' रामः वः अवतात् । कीदृशः ? ['अत्रनिसुतां'] जनकसुतां वीक्ष्य हृष्टः । कीदृशां जनकसुताम् ? 'कुसुमशरप्रेषितैः' कामप्रेषितैः पुष्पघातैरपि प्रम्लानाम् । अपरं कीदृशाम् ? संस्पृष्टेनाप्यग्निना 'शोकशून्यां' शोकरहिताम् । स कः ? यो रामः तस्य 'राज्ञः' दशरथस्य आज्ञया कृत्वा कृतवनगमनः यां यां अवस्थां प्राप अद्यापि 'जनः' लोकः तां तां अवस्थां शृण्वन् सन् तादृशैव चेतसा अनुभवति ॥ ९६ ॥

*

योऽद्धा योद्धाऽवधीत् तान् सपदि पलभुजः सम्पराये परा ये
येनाऽयेनाऽऽश्रितानां स्तुतिरवनमितेशानचापेन चाऽऽपे ।
लङ्कालङ्कारहर्ता ककुभि ककुभि यः कान्तया सीतयाऽऽसी-
दूनो दूनोऽपि हृष्टः स विभुरवतु वः स्वःसभार्यः सभार्यः ॥९७॥

[हृदयरञ्जनी]

योऽद्धा योद्धेति । स विभुः 'वः' युष्मान् 'अवतु' रक्षतु । **किंलक्षणः सः**? 'स्वःसभार्यः' स्वः—स्वर्गः तत्र या सभा—स्वर्गसभा तस्याः अर्यः—स्वामी, "अर्यः स्वामिवैश्ययोः" [पाणिनि० ३-१-१०३] इति निपातनात् साधुः । पुनः 'सभार्यः' भार्यया—कलत्रेण सह वर्त्तत इति सभार्यः—पत्न्या सहितः । यः कान्तया—सीतया ऊनः—रहितः सन् ककुभि ककुभि 'दूनः' पीडितः 'आसीद्' दुःखितोऽभवत् । **अत एव** किंलक्षणः ? 'लङ्कालङ्कारहर्त्ता' लङ्कायाः अलङ्कारः—रावणस्तस्य हर्त्ता—मारयिता । पुनः किं० ? योद्धा यो रामः 'सम्पराये' सङ्ग्रामे ये 'पराः' शत्रवः 'पलभुजः' राक्षसाः **वर्त्तन्ते** तानवधीद् 'अद्धा' निश्चितम् । 'येन' रामेण आश्रितानां 'अयेन' शुभावहेन **विधिना** 'स्तुतिः' स्तोत्रं च 'आपे' प्राप्ता, कर्मणि आश्रिता एनं तुष्टुवुरित्यर्थः । **किंलक्षणेन येन**? 'अवनमितेशानचापेन' अवनमितः ईशानचापो येन तेन । लाटानुप्रासः ॥ ९७ ॥

[बालबोधिनी]

योऽद्धा योद्धेति । स विभुर्वोऽवतु । कीदृशः ? 'स्वःसभार्यः' स्वः—स्वर्गस्तस्य सभा तस्यां अर्यः—स्वामी, "अर्यः स्वामि-वैश्ययोः" [पाणिनि० ३-१-१०३] इति निपातनात् ।

अपरं 'सभार्यः' सीतासहितः । स कः ? यः रामः अद्धा योद्धा, अद्धा-सत्यम् । अपरं यो रामः 'पराः' उत्कृष्टाः ये 'पलभुजः' राक्षसाः 'सम्पराये' सङ्ग्रामे तान् पलभुजोऽवधीत् । अपरं 'येन' रामेण 'अयेन' शुभावहेन विधिना कृत्वा 'आश्रितानां' सेवकानां स्तुतिः 'आपे' प्राप्ता, "अयः शुभावहो विधिः" [का० १ वर्ग ४ श्लो० २७] इत्यमरः । कीदृशेन येन ? 'अवनमितेशानचापेन' अवनमितं ईशानस्य चापं येन सः तेन । कीदृशः ? 'लङ्कालङ्कारहर्त्ता' लङ्कायाः अलङ्कारस्तस्य हर्त्ता । अपरं यो रामः 'कान्तया' सीतया 'ऊनः' रहितः सन् 'ककुभि ककुभि' दिशि दिशि हृष्टोऽपि दून आसीत् । हृष्ट इति कथम् ? "सच्चिदानन्दं ब्रह्म" इत्यादि श्रुतेः, "इति रामपदेनासौ परं ब्रह्माभिधीयते ।" इत्यादिव्यासवचनाच्च ॥ ९७ ॥

*

विश्वाधीशप्रसादादपि समरगतप्राणितानां कपीनां
भूयः सञ्जीवितानां सुखनयनजलैः शान्तकोपाश्रयाशः[1] ।
दर्शं दर्शं च दर्शक्रशितशशिकलाकोमलाङ्गीमतृप्यन्
कान्तामुत्कण्ठितो वः स्वनगरगतये पातु यातुप्रमाथी ॥ ९८ ॥

[हृदयरञ्जनी]

विश्वाधीशेति । स 'यातुप्रमाथी वः पातु' यातुधानानां प्रमाथी–हन्ता रामः 'वः' युष्मान् पातु । किंलक्षणः ? 'स्वनगरगतये उत्कण्ठितः' अयोध्यां गन्तुमुत्कण्ठितः–उत्सुकः । किं कुर्वन् ? 'कान्तां' सीतां दर्शं दर्शं 'अतृप्यन्' अतृप्तः । कथम्भूतां कान्ताम् ? 'दर्शक्रशितशशिकलाकोमलाङ्गीं' अमायां क्रशिता–कृशा या शशिकला तद्वत् कोमलं–मनोहरं अङ्गं यस्याः सा ताम् । किंलक्षणो रामः ? 'कपीनां' वानराणां 'सुखनयनजलैः' सुखयन्तीति सुखानि, तानि च तानि नयनजलानि च तैः शान्तकोप एव आश्रयाशः–वह्निः क्रोधाग्निर्यस्य स तथोक्तः । किंलक्षणानां कपीनाम् ? सम्पादितपुनर्जीवितानां लब्धप्राणानाम् । कस्मात् ? 'विश्वाधीशप्रसादाद्' विश्वाधीशः–ब्रह्मा तस्य प्रसादाद्–वरात्, "देवताभ्यो वरं प्राप्य समुत्थाप्य च वानरान् ।" इति **बालरामायणे** । पुनः कथम्भूतानाम् ? 'समर०' समरे–सङ्ग्रामे गतं प्राणितं–जीवितं येषां ते समरगतप्राणिताः तेषाम् । हर्षौत्सुक्ययोः भावयोः सन्धिः । शान्त-शृङ्गारयोरुदयः ॥ ९८ ॥

[बालबोधिनी]

विश्वाधीशेति । 'यातुप्रमाथी' राक्षसहन्ता रामो वः पातु । कीदृशः ? 'स्वनगरगतये' अयोध्यागमनाय उत्कण्ठितः, अपरं दर्शक्रशितशशिकलाकोमलाङ्गीं तां 'दर्शं दर्शं' दृष्ट्वा

---

१ बालबोधिन्यनुसारेण 'शान्तशोका°' इति पाठः ।

दृष्ट्वा अतृप्यन्। दर्शेण-अमावास्यया क्रशिता-ग्रसिता या शशिकला-चन्द्रकला तद्वत् कोमलमङ्गं-गात्रं यस्याः सा ताम्। अपरं कीदृशः? 'समरगतप्राणितानां' सङ्ग्राममृतानां 'कपीनां' वानराणां 'विश्वाधीशप्रसादात्' श्रीरामप्रसादाद् 'भूयः' पुनः सञ्जीवितानामपि 'सुखनयनजलैः' हर्षाश्रुभिः कृत्वा 'शान्तशोकाश्रयाशः' आश्रयं अश्नातीत्याश्रयाशः-अग्निः, शान्तः शोकरूप आश्रयाशो यस्य स तथा ॥ ९८ ॥

*

क्षित्या सीतां सुवित्वा क्षितिधरनिकरं तारयन्तीभिरद्भि-
र्वातेनोत्पाद्य पुत्रं प्लवगमदहता वह्निना तस्य देहम्।
आकाशेनावकाशं गगनगतिरतेः[1] पुष्पकस्थस्य यस्य
क्षिप्रं दत्त्वोपचक्रे विरचयतु स वः चक्रपाणिः प्रियाणि ॥ ९९ ॥

[हृदयरञ्जनी]

क्षित्या सीतामिति। सः 'चक्रपाणिः' चक्रं पाणौ यस्य स विष्णुः वः 'प्रियाणि' इष्टानि विरचयतु। स कः? यस्य पञ्चमहाभूतैरेतैरेवं 'उपचक्रे' उपकारः चक्रे-कृतः। क्षित्या सीतां 'सुवित्वा' उत्पाद्य। तथा 'अद्भिः' पानीयैः[कीदृशीभिः?] 'क्षितिधरनिकरं' पर्वत-समूहं ['तारयन्तीभिः'] प्लावयन्तीभिः। तथा 'वातेन' वायुना किं कृत्वा? 'प्लवगं' हनूमन्तं पुत्रमुत्पाद्य। तथा 'वह्निना' पावकेन किं कृतवता? तस्य हनूमतः 'देहं' शरीरं 'अदहता' अप्लुषता। तथा 'आकाशेन' गगनेन किं कृत्वा? 'अवकाशं' मार्गं दत्त्वा। किंलक्षणस्य यस्य? 'नगरगतिरतेः' नगरस्य गतिः-गमनं तत्र रतिर्यस्य तस्य। पुनः कथम्भूतस्य यस्य? 'पुष्पकस्थस्य' कुबेरयाने तिष्ठतः 'एवं' अमुना प्रकारेण तैरुपचक्रे। दीपकं अन्यक्रियादीकम्(?) ॥ ९९ ॥

[बालबोधिनी]

क्षित्या सीतामिति। स 'चक्रपाणिः' रामः वः 'प्रियाणि' इष्टानि विरचयतु। स कः? 'यस्य' रामस्य पृथिव्यप्तेजोवाय्वाकाशैः 'उपचक्रे' उपकारः कृतः। तत्र विभागेन दर्शयति-क्षित्या सीतां 'सुवित्वा' प्रसूय उपचक्रे, 'क्षितिधरनिकरं' पर्वतसमूहं तारयन्तीभिरद्भिः उपचक्रे, वातेन 'प्लवगं पुत्रं' हनूमन्तमुत्पाद्य उपचक्रे, 'तस्य' हनूमतो देहमदहता वह्निना उपचक्रे, पुष्पकस्थस्य गगनगतिरतेः रामस्य 'क्षिप्रं' वेगेन आकाशेन अवकाशं दत्त्वा उपचक्रे। गगने गतिः तस्यां रतिः-प्रीतिर्यस्यासौ गगनगतिरतिस्तस्य गगनगतिरतेः ॥ ९९ ॥

*

---

१ 'नगरगति°' इति हृदयरञ्जनीपाठः।

निस्तीर्णक्लेशराशेश्चिरविरहकृतामार्त्तिमम्बाकदम्बा-
दुच्छिन्दानस्य सद्यः प्रणतमवरजं श्लिष्यतस्तं च तं च ।
यच्चक्रे तेन तिग्मद्युतिकुलगुरुणा भूपभावाभिषेके
कल्याणं कोणपारिस्तदुपनयतु वः स प्रभुः सप्रमोदः ॥ १०० ॥

[हृदयरञ्जनी]

निस्तीर्णेति । 'तिग्मद्युतिकुलगुरुणा' वसिष्ठेन रामस्य 'भूपभावाभिषेके' राजत्वाभिषेके राज्याभिषेकसमये यत् कल्याणं चक्रे सः 'कोणपारिः' दैत्यशत्रुः ['प्रभुः'] रामः 'तत्' कल्याणं व उपनयतु । कथम्भूतः प्रभुः ? 'सप्रमोदः' सहर्षः । कथम्भूतस्य ? 'निस्तीर्णक्लेशराशेः' निस्तीर्णः—उत्तीर्णः क्लेशानां—कष्टानां राशिः—समूहो येन स तस्य । तथा किम्भूतस्य ? 'अम्बाकदम्बाद्' मातृसमूहात् 'चिरविरहकृतां' वियोगजनितां । 'आर्त्तिं' पीडां '[उच्]छिन्दानस्य' भिन्दानस्य 'सद्यः' तत्क्षणम् । पुनः किम्भूतस्य ? तं प्रणतं 'अवरजं' भ्रातरं भरतं 'तं च' शत्रुघ्नं 'श्लिष्यतः' परिष्वजतः ॥ १०० ॥

[बालबोधिनी]

निस्तीर्णक्लेशेति । 'सप्रमोदः' सहर्षः स 'प्रभुः' रामः 'वः' युष्माकं तत् कल्याणं 'उपनयतु' करोतु । स कः ? यस्य 'कोणपारेः' रामस्य यत् कल्याणं तेन 'तिग्मद्युतिकुलगुरुणा' सूर्यकुलगुरुणा वसिष्ठेन 'भूपभावाभिषेके चक्रे' राज्याभिषेके चक्रे । कीदृशस्य यस्य ? 'निस्तीर्णक्लेशराशेः' निस्तीर्णः—उत्तीर्णः क्लेशराशिः—क्लेशसमूहो येन सः तस्य । अपरं 'अम्बाकदम्बाद्' मातृसमूहात् चिरविरहकृतामर्तिं[1] 'उच्छिन्दानस्य'[2] निराकुर्वतः । अपरं कीदृशस्य ? तं च तं च 'अवरजं' कनिष्ठभ्रातरं भरतं शत्रुघ्नं 'श्लिष्यतः' आलिङ्गतः । कीदृशमवरजम् ? 'प्रणतं' नमस्कुर्वन्तम् ॥ १०० ॥

*

[हृदयरञ्जनी] कविः स्वनाम ग्रन्थनाम च श्लोकेन सङ्गृणाति—

---

१ °तामर्त्ति° भा ३-४ । एतदनुसारेण बालबोधिनी ॥ २ °स्य यस्य प्र° भा ३-४ । एतदनुसारेण बालबोधिनी ॥

विश्वम्भरामण्डलमण्डनस्य, श्रीरामभद्रस्य यशःप्रशस्तिम् ।
चकार सोमेश्वरदेवनामा, यामार्द्धनिष्पन्नमहाप्रबन्धः ॥ १०१ ॥

॥ इति श्रीरामशतं सम्पूर्णम् ॥

[हृदयरञ्जनी]

ग्रन्थचौरभयात् कविः काव्यनायकस्य काव्यस्य आत्मनश्च नाम ग्रन्थान्ते श्लोकेन बध्नाति–**विश्वम्भरेति** । **सोमेश्वरदेव**नामा कविः **श्रीरामभद्रस्य** यशः-प्रशस्तिं 'चक्रे' कृतवान् । किंलक्षणस्य श्रीरामभद्रस्य ? 'विश्वम्भरामण्डलमण्डनस्य' पृथ्वीमण्डलाभरणस्य । किंलक्षणः सोमेश्वरदेवः ? 'यामार्द्धनिष्पन्नमहाप्रबन्धः' यामार्द्धेन-प्रहरार्द्धेन निष्पन्नः–रचितः महान् प्रबन्धो येन सः । यशःप्रशस्त्युदाहरण-प्रबन्धोऽयम् ॥ १०१ ॥

इति श्रीएकनाथभट्टविरचिता रामशताभिधानस्य काव्यस्य सोमेश्वरदेवनिर्मितस्य शुभहरिवल्लभाख्या टीका समाप्ता ॥

अनेन स्तोत्राधीशः श्रीरामः प्रीतोऽस्तु ॥ ग्रन्थसंख्या शत १५०० पूर्णा ॥

[बालबोधिनी]

विश्वम्भरेति । **सोमेश्वरदेव**नामा पुमान् श्रीरामभद्रस्य यशःप्रशस्तिं चकार । कीदृशः ? 'यामार्द्धनिष्पन्नमहाप्रबन्धः' यामस्य–प्रहरस्यार्द्धं तेन निष्पन्नो महाप्रबन्धो यस्मात् स तथा । कीदृशस्य रामभद्रस्य ? 'विश्वम्भरामण्डलमण्डनस्य' भूमण्डलाभरणस्य ॥ १०१ ॥

॥ [1]इति श्रीरामशतककाव्यविवरणं सम्पूर्णम् ॥

---

१ एतदुपसंहारपद्यात् प्राग् डे १ आदर्शे

रम्यं रामायणाब्धेर्बहुसरससरस्यत्यगाधात् गृहीत्वा
तं तं वाच्यार्थरत्नं व्यरचि शुचिरुचि स्वामिसोमेश्वरेण ।
कण्ठालङ्काररूपं भवति सुकृतिनो यस्य नित्यं सुदत्तं
श्रीरामात् श्रीशतं तन्मुखमनुपरतं श्रीसुवर्णं विभाति ॥

इतीदं मूलरूपेण अधिकं काव्यमुपलभ्यते। नास्तीदं वृत्तिकृद्भ्यां व्याख्यातमिति प्रक्षिप्तमिदं ज्ञेयम् ॥ **२ रामशतटीका समाप्ता पु० ॥**

परिशिष्टम् ।

केशवविरचितम् ।

॥ रामशतकाव्यम् ॥

॥ श्रीगणेशाय नमः ॥

वामाङ्गे(ङ्के) जनकात्मजां कटितटे वाससतडित्सन्निभं
चञ्चत्काञ्चनकुण्डले श्रवणयोर्वक्षःस्थले कौस्तुभम् ।
कस्तूरीतिलकं दधानमलिके विज्ञानमुद्रान्वितं
रामं सान्द्रपयोदसुन्दरतनुं ध्यायाम्ययोध्यापतिम् ॥ १ ॥

श्रीराम ईशे भुवनैकवीरे को **राम**नामानुकरो बलीह ? ।
वदन्निति **द्वारवतीं** सकोपश्चचाल **साकेत**वनान्**मरुज्जः** ॥ २ ॥

नन्दत्यपि **श्रीयदुवंशवीरे मरुत्सुतः** क्रोशयुगं बहिःस्थः ।
पुरीं परां **द्वारवतीं** सकोपो व्यपीडयत् पुच्छपरिभ्रमेण ॥ ३ ॥

न के नरास्तत्र न काश्च कान्ता न के गवाद्याः पशवस्तदानीम् ।
पुच्छप्रतिक्षेपभयप्रकर्षं प्रपेदिरे तस्य महाबलस्य ? ॥ ४ ॥

जनैरशेषैः किल पाणिसन्धृतं पुच्छं विधायाऽनिलसूनुरुच्चकैः ।
आवर्तयामास विपत्पयोधौ निमज्जनोन्मज्जनतो व्यनर्तयत् ॥ ५ ॥

उपप्लुतस्तन्नगरीजनो भृशं तदोपतस्थे **वसुदेवनन्दनम्** ।
पश्यत्यपि त्वय्यतुलात्मवैभवे हरे ! विचित्रं किमिदं ? वदन्निति ॥ ६ ॥

ततो **गरुत्मन्त**मुवाच **माधवः** समग्रवीरोन्नतगर्वपर्वतम् ।
पुरःस्थितं स्वीकृतपाणिसम्पुटं प्रवीरवर्गस्तुतबाहुविक्रमम् ॥ ७ ॥

सपदि बत ! पयोधिमुल्लङ्घ्य **दशवदन**स्य च यः पुरीं ददाह ।
द्विजवर ! भविता स **वायुसूनुर्दशरथसूनु**सखस्तमानयस्व(त्वम्) ॥ ८ ॥

इति **हरि**वचसा तमेत्य तूर्णं **रघुपति**रूपमनारतं स्मरन्तम् ।
विरचितपदपङ्कजप्रणामः प्रणयवचोभिरुपाचरत् स एभिः ॥ ९ ॥

विधियमवरुणेन्द्ररुद्रमृग्यः सुभग ! तवेच्छति वीक्षणं **मुकुन्दः** ।
तदनुपदमुपैहि तं महान्तं पुरुषविशेषमशेषवन्दिताङ्घ्रिम् ॥ १० ॥

सर्वस्वमुर्व्या[ः] किमनर्घ्यरत्नं भाग्यं दश(दिशः ?) प्रेम हरेः किमङ्गम् ? ।
कवल्यलक्ष्मीसदनं नितान्तमालोकय **द्वारवतीं** पुरीं च ॥ ११ ॥

पुर्यः शतं सन्ति परास्तथापि न **द्वारकायास्तुलनेत**(ऽप)राऽत्र ।
क्व नाम हेमाभरणप्रतिष्ठा ? क्व चारकूटाभरणोपचारः ? ॥ १२ ॥

शृङ्गारमूर्तिर्मृगलोचनाभिः सानन्दमानन्दति यत्र **कृष्णः** ।
स(सा)कस्य धन्यस्य निरीक्षितैव स्वर्गाऽपवर्गाधिकशर्मदानाम्(न) ॥ १३ ॥

असौ हरेर्द्वारवती यदस्मिन् पुरी वरीवर्त्यधिका दिवोऽपि ।
दधार लोकस्तदलौकिकश्रीर्लोकत्रयीमध्यमणित्वमेषा(षः) ॥ १४ ॥

कल्पद्रुमः कल्पलता तथैव चिन्तामणिः कामपयस्विनी च ।
वसन्ति तेनाऽधिकता दिवश्चेत् तत् कामदोऽस्या**मरविन्दनाभः** ॥ १५ ॥

स्मरसि यमनिशं त्वमेव साक्षादुपनिषदर्थमिहावगच्छ पुर्याम् ।
निरवधि सुखधाम धाम भासां त्रिभुवनमङ्गलमिन्दिराभिरामम् ॥ १६ ॥

मुखमिलन्मुरलीरवमाधुरीसुखनिमात्रिक्ष(त)पौरवधूजनम् ।
भज त**मानकदुन्दुभिनन्दनं** घननिभं जनताघनतापहम् ॥ १७ ॥

सपदि चल सखे ! सुखात्मबोधं हरिमवलोकय मा भयं वहस्व ।
रघुपतिचरणाम्बुजैकभावस्त्वमसि नं तन्मनुते स तेऽपराधम् ॥ १८ ॥

भगवता भवता श्रुतनिर्मलं निगदितं तदिदं विदितं मया ।
शृणु[म]मापि वचस्त(स्त्व)मथेति तं **कपिपतिः पततां** पतिमब्रवीत् ॥ १९ ॥

रघुकुलतिलकं विनाऽयमात्मा क्वचन मनागपि याति न प्रसादम् ।
यदि मम वचनेऽन्यथा मतिश्चेत् त्रिभुवनविद्धरिरत्र साक्षिभूतः ॥ २० ॥

रघुपति-यदुवीरयोर्न भेदो मतिरिति यद्यपि विद्यतेऽनवद्या ।
तदपि रघुकुलावतारमूर्तौ मम मनसोऽपि दृशोऽपि कोऽपि भावः ॥ २१ ॥

रघुपतिवपुराद्रियेत **कृष्णो** निजनगरीं विदधीत चे**दयोध्याम्** ।
कथमपि सरयूं च गोमतिं(तीं) तामनुपदमेमि तदा मुदा महत्या ॥ २२ ॥

जि(जी)वन्त एव हि जनाः खलु धाम दिव्यं नीता यया नृपशुकीरविहङ्गमाद्याः ।
सर्वोत्तमस्य यदि दाशरथेः पुरी सा सर्वाधिका न पदका सदृशी तयास्ते ॥ २३ ॥

लब्धं यतः सकलतारक**राम**नाम कर्णे जपन् किल वपुस्त्यजतां जनानाम् ।
वाराणसीं पु[प]रपुरन्दर **इन्दुमौलिः** कैवल्यमाकथ(ल)यते मणिकर्णिकायाम् ॥२४॥

आनन्दधामनि विभौ मदनाभिरामे
रामेऽभिरामगुणकर्मकृपाभिरामे ।
सौराज्यमादधति यत्र न कोऽपि लोकः
शोकं मनागपि कदाऽपि कुतोऽपि लेभे ॥ २५ ॥

दिव्याङ्गनाधिकमनोहरसुन्दराभिः
सम्पत्तिभिश्च विविधाभिरभूतपूर्वा ।
पुर्या कयाऽपि खलु सा नगरी न योध्या
तेनोच्यतेऽखिलजनैर्भुवनेष्व**योध्या** ॥ २६ ॥

मां नेतुमास्ते यदि तेऽभिलाषस्तदा पुनर्द्वारवतीं व्रजस्व ।
लीलातनुर्विश्वविदप्रमेयस्त्वया स वाच्यो वचसाऽमुना मे ॥ २७ ॥

गुञ्जापुञ्जादिभिः किं तव कलय कलाशालिमुक्तादिमालां
बालां नाऽऽलम्बयाऽतिप्रबलमदबलामन्यदीयामवद्याम् ।
सार्धं गोपालबालैः किमु परिचरणादिन्द्र वागिन्द्रचन्द्रा-
विन्द्रोपेन्द्रौ दिगिन्द्राद्यमरवरपरीवारमारञ्जयस्व ॥ २८ ॥

वेणुं छिद्रयुतं त्यजस्व(?)गुणवत् पाणौ धनुः स्वीकुरु
शृङ्गं चास्थिमयं विहाय सशरं तूणीरमालम्बय ।
किं वान्यत् पशुपालनात् तव प्रभो ! राज्यं त्वमेवाश्रय
श्रीरामानुचरानतेर्यदि हि तं(ते) वाञ्छा समुज्जृम्भते ॥ २९ ॥

अनेन किं ते वितथाग्रहेण विलोकय **श्रीपति**मादरेण ।
नेष्यामि नो चेदधुना बलेन त्वामित्यवोचद् **विनतासुत**स्तम् ॥ ३० ॥

इति निशम्य वचः **पवनाङ्गजः** प्रबलकोपविलोहितलोचनः ।
कठिनघट्टनपाणिचपेटकै**र्गरुड**तुण्डमखण्डमताडयत् ॥ ३१ ॥

तदनु यावदसौ कथमप्यहो ! **हनुमता** विदधे समरोद्यमम् ।
स कृतपुच्छपरिभ्रमदुर्दशं तमुदधौ खलु तावदपातयत् ॥ ३२ ॥

कथमपि नगरीमुपेत्य कम्पद्वपुरवदत् स **मुरद्विषं** विवर्णः ।
शतमपि निपतन्तु वज्रधारास्तदपि न तत् कपिकोपदप्र(त्त)पातः ॥ ३३ ॥

मधुरतराणि वचांस्यवोचमादौ तदपि न तानि बतोररीचकार ।
तदनु खलु यदा दुरुक्तिरुक्ता **हर हर** मे प्रलयाधिकः स कालः ॥ ३४ ॥

रचयति भगवान् विधाय कृत्यं लघु लघुनाऽपि मिषेण येन केन ।
जगति खलु विनाशमाशु नीतः **पवनसुतेन गुरुत्मतो** विवर्गः (·ऽपि गर्वः) ॥ ३५ ॥

दशरथसदनावतारमूर्त्तेरथ पुनरिच्छति मे विलोकनं सः ।
तदहमनुसरामि तत्स्वरूपं कलय कुरङ्गदृशोऽथ **भूसुतायाः** ॥ ३६ ॥

.... ।
वरतनु ! यदहं भवामि **रामो यदुपति**रित्थमुवाच **सत्यभामाम्** ॥ ३७ ॥

जनकनृपसुतानुकारहेतोः पुनरनया विहितो न कः प्रकारः ? ।
तदपि बत ! ययौ न तत्स्वरूपं जगति हि रम्यतमं न सद्वितीयम् ॥ ३८ ॥

तामङ्गकान्तिं सुकुमारतां तां दृगाकृतिं तां मदनश्रियं ताम् ।
तामास्यलक्ष्मीमनवाप्य भूयः प्रिया ह्रिया नम्रमुखी बभूव ॥ ३९ ॥

यामिनीशनिभवक्त्रशालिनी कामिनी कृतगुणाभिलाषिणी ।
रुक्मिणी यदुपतेरथाज्ञया **जानकी**तनुमुरीचकार सा ॥ ४० ॥

रघुपतिवपुषो **हरे**र्निदेशात् स तमभिगम्य पुनर्गिरं जगाद ।
व्रज सपदि सखे ! पुरी**मयोध्यां** यदि तव **राम**निरीक्षणेऽनुरागः ॥ ४१ ॥

सुखभवपुलकोल्लसत्कपोलस्त्रिभुवनतारक**राम**नामचेताः ।
सह पथि **गरुडेन** सोधि(ऽभि)गच्छञ्छकुनभरैरिति तर्कयाञ्चकार ॥ ४२ ॥

जनकनृपसुताविभूषिताङ्गः सजलपयोदतमालतालनीलः ।
मम दृगतिथिरद्य **राघवः** स्यात् प्रचरति यत् पथि दक्षिणो मृगौघः ॥ ४३ ॥

रघुपतिमुखचन्द्रचन्द्रिकायां नयनचकोरयुगं धृतानुरागः(गम्) ।
नियतमधिगतार्थमद्य यत्स्यात्यधि(द्यदि) पतितो दृषि(शि)
चाप एवयामः(चैष एव **रामः**) ॥ ४४ ॥

रघुपतिपरिरम्भसम्भ्रमान्मे विहगपतेर्भविताऽद्य कोऽपि हर्षः ।
स्फुरति खलु नितान्तमेष बाहुर्मुहुरथ दक्षिणमाक्षि यच्चिरेण ॥ ४५ ॥

जितमदनविलासं विद्युदम्भोदवासं
कलितललितवेशं जानकीजीवितेशम् ।
कमलनयनमाद्यं सर्ववेदान्तवेद्यं
प्रमदयुतमथाऽसौ मारुतिस्तं ददर्श ॥ ४६ ॥

रामः कृपादोलितदृग्विलासः सानन्दमालिङ्ग्य कृताञ्जलिं तम् ।
अभूतपूर्वाद्भुतभूरिभक्तिः(क्तिं) प्रेमानुरूपां गिरमित्युवाच ॥ ४७ ॥

पवनसुत ! जगत्त्रयेऽपि किञ्चिद्भवदुपकारसमं न तत्प्रदेयम् ।
किमपि यदि भवान्वदेदिदानीं तदपि मदीयमनोऽनुमोदमात्रम् ॥ ४८ ॥

त्वं मामकोऽसि भवतोऽहमिति प्रवक्तुं
नैवोत्सहेऽत्र यदयं खलु भेदवादः ।
योऽहं स एव हि भवानिति चेद्ब्रवीमि
त्वद्भक्तिशर्म कुत एतदभेदवादः ॥ ४९ ॥

वाचं निपीय जगतामधिपस्य तस्य
वाचं मनःश्रवणतोषकरामुवाच ।
पूर्वाऽनुभूतचरितश्रवणोपनीत-
बाष्पावलीभिरवलीढविलोचनोऽसौ ॥ ५० ॥

अमृतं त्वमसि स्वयं ततस्तव नामाऽपि गिरस्ततस्तव ।
वपुषः परिरम्भसंश्र(सम्भ्र)मात्सकलं लब्धमतः परं कियत् ॥ ५१ ॥

वससि हृदि ममानिशं ततोऽपि त्रिभुवनपालन ! किं वरेण्यमास्ते ।
अपि च यदुकुलावतारकाले रघुपतिरूपमुरीकृतं मदर्थे ॥ ५२ ॥

पीतो(तीर्णो)नाम्बुनिधिः क्षणेन सहसा लङ्का न चूर्णीकृता
नानीतानि शिरांसि राक्षसपतेर्नाऽऽनायि सीता मया ।
दास्यं त्वच्चरणाब्जयोर्विरचितं नाद्यापि किञ्चिन्मया
कस्मान्मामपराधिनं कृपयसे तन्नाथ ! न ज्ञायते ॥ ५३ ॥

केनाकारि शिला वधूर्जलनिधौ केनोपलास्तारिताः
केनान्येन पुनः स्वकीयनगरी वैकुण्ठमासा(पा)दिता ।
प्राणान्तेऽपि च कस्य नाम शरणं संसारिणां प्राणिनां
कारुण्यैकनिधान ! ते **रघुपते** किं किं न लोकोत्तरम् ॥ ५४ ॥

द्विर्दानं न कदापि याचकजने द्विः स्थापनं नाश्रिते
द्विः शत्रौ न शराभिसन्धिरपि च द्विर्भाषणं न क्वचित् ।
एतेऽन्यत्र वसन्ति कुत्र नियमाः सा राजनीतिः क्वचित्
क्वासीदेकवधूक्र(व्र)तं **रघुपते** तत्क्वापि लीला न ते ॥ ५५ ॥

तिर्यग्योनिषु नावतारकलनं भामा(भूमौ)न मायाकृतिः
कापट्यं न कदापि वाचि न रतिर्निन्द्येषु कर्मस्वपि ।
प्रेमा नान्यवधूषु यत्न सदसत्त्राणक्षयोपेक्षणं
श्रीमद्राम ! दयानिधेस्तव तुला नैवाऽवतारान्तरे ॥ ५६ ॥

कण्ठालम्बितकालकूटविकलो **गङ्गां** शिरस्यादधे
मौलौ चन्द्रकलां ततश्च **गिरिजा**मर्धाङ्गभागे **हरः** ।
स्वास्थ्यं नाऽऽप तथाऽप्यहो तदनु ते **श्रीराम**नामामृतं
स्वीचक्रे किमतः परं **रघुपति**(ते)र्गेयं भवद्वैभवम् ॥ ५७ ॥

श्रीमद्राम विपाद्विराम जगतामाधार धाराधर-
श्यामाऽपारगुणाभिराम करूणाकूपार वीराग्रणीः ।
नित्यं त्वच्चरणारविन्दयुगलध्यानादयोध्यापते
कालो गच्छति यस्य तस्य न भयं कालादकालादपि ॥ ५८ ॥

उल्लसत्कनककेतकोदरां द्योतमानतनुमात्तभूषणाम् ।
शारदेन्दुवदनामथा**वनीनन्दिनी**मवददङ्गनि(ना)जनिः ॥ ५९ ॥

त्वं भूपरत्नमवनीकमनीयमम्ब ! स्पष्टीचकार तदिदं खलु रत्नभासा ।
किं वीक्षिताऽसि **जनकेन** यतस्त्वमादौ संसिद्धिमानिति जनैरुपगीयतेऽसौ ॥ ६० ॥

त्वत्तो न काचिदधिका गुणकर्मरूपै-
स्तुल्याऽथवाऽस्ति कलयाऽपि जयास्त्रि(येत् त्रि)लोक्याम् ।

जाने जगज्जननि **जानकि** तत् त्वदेक-
पत्नीकृ(व्र)तं **रघुपतिः** कलयाञ्चकार ॥ ६१ ॥

मातस्त्वदीयचरणस्मरणावलोक-
स्पर्शावधूतहृदयाखिलतापशोकः ।
आद्यं पदं परमवाप **दशाननोऽपि**
किं त्वां परे पतितपावि(व)नि भक्तिभाजः ॥ ६२ ॥

लङ्कागृहापगतिरध्वनि वार्धिरोध्दुं(धो)
युद्धं दशास्यरिपुणा कपयः सहायाः ।
रामोऽवधीत् तदपि राक्षसवृन्दमेक-
स्तन्मूलमेव तव कुटिल(कुटिला तव) सौभगश्रीः ॥ ६३ ॥

रामोऽम्बुधिस्त्वमसि तल्लहरी स चन्द्र-
स्त्वं चन्द्रिकाऽसि जलदः स पतुस्त(तु तत्त)डित् त्वम् ।
सर्वोत्तमः स भगवानखिलार्थपूर्ण-
स्त्वं तस्य भाग्यमसि मूर्त्तिमदम्ब ! मन्ये ॥ ६४ ॥

निरवधि सुखधाम नाम जननि ! कदा भविता तवाऽवलोकः ।
पुनरपि च तवाऽपि रूपमेतद्रघुकुलमण्डनमेकदाहमीक्षे ॥ ६५ ॥

सत्यं ब्रवीम्युचितम[स्त्वि]ति नैतदेव
व(य)त्साधुना सह स ते प्रल(ण)यानुबन्धः ।
दुःखं यदस्य विरहो जनयत्यवश्यं
तस्मादहो किमधिका यमयातनास्ताः ॥ ६६ ॥

निरुपमसुखदो हि साधुसङ्गः पदमधराकुरुतेऽपवर्गलक्ष्म्याः ।
यदि विलयमुपैति सोऽपि जन्तोः शिव शिव हानिरितोऽपि काऽधिकाऽस्ते ॥ ६७ ॥

चिरमयमनलो यक्ष(दा)शु देहं दहति जनस्यं मृतस्य जीवतो वा ।
न तु विरहमहानलः सतो यद् दहति सजीवमजस्रमङ्गमेषः ॥ ६८ ॥

इति निगदति यावत्तावदेवाम्बुजाक्षः
पुनरपि निजरूपं पूर्वमङ्गाच(ङ्गीच)कार ।

[1]चरितमतिदुरुह(रूहं) मण्डलाखण्डलाना-
मखिलभुवनभर्तुः किं पुनश्चक्रपाणेः ॥ ६९ ॥

नवाम्बुदश्यामलमम्बुजेक्षणं समुल्लसत्काञ्चनकुण्डलोज्ज्वलम् ।
पादा(पीता)म्बरं कुण्डिननन्दिनीव्र(वृ)तं विलोक्य तुष्टाव **तमञ्जनीसुतः** ॥ ७० ॥

ब्रह्माद्वयं त्वमसि निर्गुणमप्रमेयं
निर्मायमागमरहस्यमुपास्यमानम् ।
सत्त्वप्रकाशमविकल्पमनाद्यनन्त-
मानन्दपूर्णमविकारमपेतदोषम् ॥ ७१ ॥

अर्थव्ययं च वपुषः श्रममन्तरेण
यच्चिन्तनेन परमां गतिमेति जन्तुः ।
ध्यायेन्न तद्यदि **मुकुन्द** तवाङ्घ्रिपद्मं
किं जीवितेन नरवेषय(प)शोस्तदस्य(दास्य) ॥ ७२ ॥

ब्रह्मेन्द्ररुद्रसलिलेन्द्रधरेन्द्रचन्द्र-
पक्षे(क्षी)न्द्रदक्षिणदिगिन्द्रमुनीन्द्रमृग्ये ।
कृष्ण त्वदङ्घ्रिकमले निरुपाधिभक्तेः
सायुज्यभक्तिरधिका न पुनः किमन्यत् ॥ ७३ ॥

तावत्सुतभ्रातृकलत्रमित्रैः श्रेयांसि भूयांसि जनो भुनक्ति ।
यावत्कृपाकन्दलितैः कटाक्षैःसे(क्षैस्त)वेक्षणं न च्युतमच्युतस्य ॥ ७४ ॥

गोपिकानयनकैरवेन्दवे योगिमानससरोजभानवे ।
भक्तवृन्दभवसिन्धुसेतवे **द्वारकाधिपतये** नमो नमः ॥ ७५ ॥

सर्वमङ्गलनिदानवन्दिनीमङ्गकातिपरिभूय(त)काञ्चनाम् ।
चञ्चलां रुचिरचैलशालिनीं **रुक्मिणी**मथ **मरुत्सुतो**ऽब्रवीत् ॥ ७६ ॥

मुकुन्दवामाङ्गविराजमानां त्वामास्यलक्ष्मीजितपूर्णचन्द्राम् ।
नना(मा)मि काश्मीरकृतानुलेपां धम्मिल्लतुच्छीकृतच(ब)र्हिपुच्छाम् ॥ ७७ ॥

---

१ Before चरित, 'राम' is prefixed in the Ms.

कुरङ्गशावस्पृहणीयनेत्रां समुल्लसच्चम्पकपुष्पनासाम् ।
घ(प्र)वालशालिव(खाभ)सुधाधरोष्ठीं मुक्तावलीरञ्जितकण्ठपीठाम् ॥ ७८ ॥

शिराण(रीष)पुष्पाधिकमार्दवाङ्गीमङ्गीकृतानङ्गकलाकलायां(पाम्) ।
रत्नाङ्गुलीयावलिशालिहस्तामुत्त(त्तु)ङ्गपीनस्तनभारनम्राम् ॥ ७९ ॥

निःसीमलावण्यतरङ्गभङ्गीं वलि(लि)त्रयी(यीं) नाभिसु(मु)रःप्रसूतां(तौ) ।
शृङ्गारवल्लीमिव रोमराजीं काञ्चीं दधानामनुबद्धरत्नाम् ॥ ८० ॥

मृगेन्द्रगर्वापहमध्यभागां नितम्बगुर्वी(र्वीं) क्र(ह्र)तकुम्भिकुम्भाम् ।
उ(ऊ)रुश्रिया निर्जितहेमरम्भास्तम्भां जगद्वन्दितपादपद्माम् ॥ ८१ ॥

त्वं भक्तकल्पक्र(ल)तिका [क]रुणैकमूर्त्ति-
स्तत् त्वामचिन्त्यचरितामहमम्ब याचे ।
त्वं **मैथिली** भव पुनर्जगतामराधा(धीशा)
नित्यं प्रबोध(भो ! द)य(?) पुनर्भव **जानकीशः** ॥ ८२ ॥

एवं निपीय वचनं **मरुदङ्ग**[ज]स्य
सर्वोत्तमो **रघुपतिः** स बभूव भूयः ।
सा **कुण्डिनेन्द्रतनया**ऽपि तदैव देवी
श्रीमद्विदेहतनया कृपया बभूव ॥ ८३ ॥

तद्रूपमी(मे)क्ष्य तडिदम्बुदसुन्दरश्री(श्रि)
श्रीमांस्तयोर्युगपदा(द)ङ्घ्रियुगं नमामि (नाम) ।
उत्फुल्लनन्दनबलो(वनो)दितपुष्पव्र(वृ)न्दैः
सानन्दमर्चितमरे(थे)न्द्रभवादिदेवैः ॥ ८४ ॥

अद्याम्बुदादजनि काञ्चनभूरिवर्षः
पृथ्वी किमद्य विषदो(शदी)कृतदिव्यरत्ना ।
एकत्र किं नु मिलितस्त्रिजगत्सुखौघ-
स्तत्राऽवदद्वचनमित्थमथाञ्जनेयः ॥ ८५ ॥

आनन्दपीनपुलकस्फुरदाननश्री-
रव्याजसान्द्रकरुणांगीम(णा दृग)पाङ्गभङ्गी ।

सीतावदातचरिता परतापहन्त्री
प्रोवाच वाचमथ **वायुतनूज**मित्थम् ॥ ८६ ॥

नीता व(य)दाहमुदरं धरया जनन्या
तत्कालतोऽद्यसमयावधि मे दिवृ(दृ)क्षा ।
यस्याभवत्तमधुना मदनाभिरामं
पश्यप्रि(श्यामि) जा(जी)वितपतिं स भवत्प्रभावः ॥ ८७ ॥

रामः स एष [ब]त साऽहमसाव**योध्या**
सेय सरिच्च **सरयूः** परिवार एषः ।
एतद्वनं ग(च) सकलं पुनराविरास्ते
मन्ये **किशोर** ! फलितं तव भावनायाः ॥ ८८ ॥

मन्त्रैर्व्रतैर्वितरणैः क्रतुभिस्तपोभिः
साडम्बरैः स्तवनवन्दनगीतनृत्यैः ।
तीर्थाटनैश्च न तथा सुलभस्त्रिलोक्यां
भक्त्यैक(व) किन्तु भगवानयमार्य मृग्यः ॥ ८९ ॥

पीयूषसिन्धुलहरीगुणगर्वखर्वा-
मेतां निपीय गिरमर्थवतीमुदाराम् ।
आनन्दबाष्पललिताननपङ्कजश्रीं
श्रीमानुवाच **हनुमानवनीतनूजाम्** ॥ ९० ॥

पूर्वावतारकलनं युवयोर्न चित्रं
लीला(लै)व ते **रघुपते**रपि या दुरूहा ।
युक्ति(यत्किङ्)करोऽहमतुलप्रचुरोपकार-
भारं दधामि भुवनाधिकमद्भुतं तत् ॥ ९१ ॥

यद्वा तवाम्ब **रघुवीर** तवापि नाहं
मन्ये मदर्थमिदमादृतमत्र चित्रम् ।
यच्चातके जलधरस्य विधोश्चकोरे
पित्रोः शिशौ च खलु **को**ऽपि कृपानुबन्धः ॥ ९२ ॥

ततः पटीरद्रवसान्द्रलेपनैर्वस्त्रैः सुपुष्पैरपि नन्दनार्हम् ।
स्फुरत्प्रभामण्डलहेममण्डनैः सम्भावयामास तमादिपूरुषः ॥ ९३ ॥

ऊचेऽथ स म्लानमुखाम्बुजश्रियं तदा विदेहप्रसवां च राघवः(वम्) ।
किमर्थमङ्ग ! श्रम एष इष्यते न युष्मदीयाङ्घ्रिवियोगि मे मनः ॥ ९४ ॥

प्रस्थानकालं(ले) नितरां समीपे रामस्तमुन्नीय वचो बभाषे ।
ब्रूहि त्वमह्नाय वियोगकाले यतस्तटस्था सुहृदङ्ग ! त्त्विवृः(वृत्तिः) ॥ ९५ ॥

चैलाञ्चलेनास्रवदश्रुधारामयाच(पाह)रुद्गद्गदकण्ठनालः ।
रोमाञ्चितस्विन्नकपोलपालिस्ततस्तमूचे वचनं स वीरः ॥ ९६ ॥

श्रीमद्राम ! भवादृशस्त्रिभुवने सर्वार्थपूर्णः प्रभु-
नैवास्ते तदहं त्वदेकशरणो याचे प्रणीताञ्जलिः ।
मा मां विस्मर कामसुन्दरतनो ! कालेऽप्यकालेऽपि वा
कारुण्यैकनिधान ! ते यदुचितं तन्नाथ ! सम्पादय ॥ ९७ ॥

वसूनां सम्भारे मणिमयविभूषापरिकरे
विहारे वाऽऽहारे सकलपरिवारेऽपि विमुखम् ।
घनश्यामे रामे रिपुजनविरामे[ऽ]नवतरं(रतं)
मनो मे विश्रान्तं रघुकुलशिरोमण्डनमणौ ॥ ९८ ॥

परादनुप्रव्रज्य(श्चादुपावर्त्य)मरुत्तनूजं सीतापतिर्यो जनयं (याञ्)चकाव(र) ।
समादधे यादवराजरूपतां यथावदासीदखिलं च तत् क्षणात् ॥ ९९ ॥

रघुपतिविरहं कथं सहेत कपिपतिरेतदहं न हन्त जाने ।
अधिगतर(म)थवाऽस्ति वज्रदेहः(हं)कलयति मङ्गलजीवजं बलं सः ॥ १०० ॥

मनसा वचसा च कर्मणा यदि भक्तिर्मम राघवे दृढा ।
परमः पुरुषः स सर्ववित्स्तुतिमेतामुररीकरिष्यति ॥ १०१ ॥

श्रीलौगाक्षिकुलारविन्दतरणिर्माध्यन्दिनिर्न्यायवि-
न्मीमांसायुगतर्कतन्त्रचतुरः साहित्यरत्नाकरः ।
रामश्लोकशतं चकार सुकृती गोदातटप्रोल्लस-
त्पुण्यस्तम्भनिवासिकेशवसुतानन्तात्मजः केशवः ॥ १०२ ॥

॥ इति श्रीकेशवविरचितं रामशतं समाप्तम् ॥

श्री ॥ श्रीरस्तु ॥ कल्याणमस्तु ॥ श्री विन्ध्यवासिन्यै नमः ॥ संवदष्टादश[शत] त्रिसप्ततिमितेऽब्दे १८७३ माघमासे सिते पक्षेऽष्टम्यां सूर्यवासरान्वितायां सङ्कटकपुरस्थेन व्यासावटङ्केन लक्ष्मीरामात्मजेन **नारायणेन** लिखितमिदं **रामशता**ख्यकाव्यं समाप्तिम-गमत् ॥ आत्मपठनार्थम् ॥ श्री ॥ ॥ छ ॥

यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दीयते ॥ १ ॥

सोमेश्वरदेवविरचितरामशतकपद्यसूची

	पृष्ठे	श्लोकः
अन्योन्यालोकलुभ्य-	३३	३१
अप्रज्ञातेऽपि सम्यक् क्रतु-	२३	२१
अंशाश्चातुर्भुजा ये	९	८
अव्यक्तं व्यक्तकर्त्ता	६	४
आदेशात् कौशिकस्य	२५	२३
आहूताऽऽयातजन्य-	३१	२८
इष्टिं निर्वृत्तवृष्टिर्यति-	१२	११
उत्तीर्णस्तूर्णमब्धिः	९२	८८
उद्धर्त्ताऽसौ धरित्रीभरमिति	२	१
एकः पात्राय दत्वा	३६	३३
ऐश्वर्ये वंशलक्ष्म्याः	५३	४९
कल्याणं कम्बुपाणिः प्रगुणयतु	७०	६५
काकुत्स्थो मैथिली च	७८	७३
काकेभ्यः कायकान्तिं तदरि-	६६	६१
कालीमालीमिवालीं नर-	१४	१२
काले कालाभ्रमाला-	७५	७०
कुर्वाणो वारवाणावरणमपि	९०	८६
कृत्वा बाणेन शोणोपल-	१६	१४
कौशल्यायां सशल्यः	५१	४७
क्षित्या सीतां सुवित्वा	१०२	९९
क्षिप्तः पातालमूले बलिरिह	२०	१८
गाधेये राजसौधम्	११	१०
चैतन्येनाग्निमायाः सह	४९	४५
तत्कालोत्तालनेत्रा-	२८	२६
तत् सीता-रामयुग्मम्	७७	७२
तस्माद् वः सर्वसिद्धि-	९६	९२
तस्मिन् योगाभियोग-	१७	१५
तारुण्यारम्भरम्या-	९	७
तिग्मांशोर्वंशरत्नं विभु-	७२	६७
तीरस्थः कीशवीरैः	८१	७७
तैर्ज्ञातैर्दुर्निमित्तैर्मख-	३७	३४
दूरे तिष्ठन्तु सन्तः	५२	४८
देयादायुः प्रभूतं विपिनभुवि	६७	६२
देयादायोधनस्थः सः	८९	८५
देयाद् दामोदरो वस्त्रिभुवन-	६०	५६
देवः स्वच्छस्वभावो ह्रद इव	६५	६०
देवो दीव्यन् सुवेला-	८७	८३
देवो यः शस्त्रविद्या-	३९	३६
दोषाः केचिद् गुणानामपि ?	४७	४३
नम्राः श्रेयोभरेण ध्रुवम्-	८३	७९
नित्यं तेभ्यो गुणेभ्यः	१०	९
निस्तीर्णक्लेशराशेश्चिर-	१०३	१००
पत्नीं पश्यन् नवोढाम्	४४	४०
पर्यङ्के पङ्कजन्माङ्कित-	४	२
पश्यन् नीचैः कलत्रे	७६	७१
पायाद् वः क्षोणिजायाः	८५	८१
पायाद् वः पीतवासाः	४८	४४
पारावारं तरीतुं वियदिव	८२	७८
पुण्यानां प्राक्तनानां फलम्	८	६
पुण्याहारम्भसन्ध्या-	९५	९१
पौलस्त्ये कालमेघत्विषि	९७	९३
प्रम्लानां पुष्पघातैरपि	९९	९६
भद्रं श्रीरामभद्रः प्रथयतु	४६	४२
भाग्यश्रीभाजनं वः	७९	७४
भारत्या सन्मुनीनां मुहु-	५६	५२
भ्रातुर्भक्तस्य यद्यप्यदित	६८	६३
मन्वानः सूर्यसूनुं घन-	९८	९५
मैथिल्या मन्मथाभिः प्रथममथ	९४	९०
यं कृत्वा कौशिकोऽग्रे	२१	१९
यद् वः सद्रस्तु चित्ते	८०	७६

	पृष्ठे	श्लोकः
यं सव्रीडा सनीडा-	३०	२७
यस्तीर्थानामुपास्त्या	१९	१७
यस्मिन्नुत्तुङ्गशृङ्गे श्रयति	४०	३७
यः सत्रे तत्र गच्छन्नपि	१५	१३
युक्तैवाऽऽप्तोपदेश-	८८	८४
युष्माकं शुष्मशाली विदलयतु	९३	८९
युष्माकं साकमृद्ध्या निरवधि	७२	६६
येनाधिज्यं धनुस्तन्मदन-	२७	२५
योऽद्धा योद्धाऽवधीत्	१००	९७
रक्षः सन्तानकक्षज्वलन-	५	३
रङ्गेणोत्सङ्गयन्ती	७	५
रामः क्षेमं क्रियाद् वः	५५	५१
रामः श्यामद्युतिर्वो नव	४२	३९
लक्ष्मीमिक्ष्वाकुराजः स च	३२	२९
लक्ष्मीं लक्ष्मीपतिर्वः प्रथयतु	९१	८७
वल्गन्निःसीमभीमं सरभ-	८६	८२
विख्यातान् वः करोतु	६९	६४
विश्वम्भरामण्डल-	१०४	१०१
विश्वाधीशप्रसादादपि	१०१	९८
विश्वाधीशः स कीशप्रभु-	८०	७५
विश्वामित्रं विदित्वा	२२	२०
वैचित्र्यं चित्रकूटे कटक-	५८	५३
वैदेहीवल्लभो वः स भवतु	३५	३२
वैदेहे सन्दिहाने जपति	२६	२४
शस्त्रं शम्भोर्विभिद्य	४१	३८
श्रीकान्तः पातु युष्मानुषित-	६४	५९
श्रीवत्सः कुत्सितं वः	५४	५०
शृण्वन् पुण्याः कथास्ताः	१८	१६
श्वश्रूणामश्रुपूरान्तरित-	५०	४६
सद्यः स द्यत्वघम्	८४	८०
सन्दोहे पादपानां विकिरति	५९	५५
सप्ताङ्गं येन राज्यम्	७४	६९
सम्भूतं भानुवंशे दशरथ-	२४	२२
सव्याघ्रां व्याघ्रतुल्यो	६३	५८
साङ्गत्यं सज्जनैर्वः सः	५९	५४
सानन्दं गीयमानः कुल-	३३	३०
सावज्ञस्तत्र राज्ञि प्रणमति	३८	३५
सावित्रं यत्र तेजः	६१	५७
सीतां संस्मृत्य नीता-	७३	६८
सोऽस्तु प्रीत्यै प्रभुर्वः	९८	९४
स्वोद्भूतैस्तैश्चतुर्भि-	४५	४१

केशवविरचितरामशतपद्यसूची

	पृष्ठे	श्लोकः
अथाम्बुदादजनि	११३	८५
अनेन किं ते वितथाग्रहेण	१०७	३०
अमृतं त्वमसि स्वयम्	१०९	५१
अर्थव्ययं च वपुषः	११२	७२
असौ हरेर्द्वारवती यदस्मिन्	१०६	१४
आनन्दधामनि विभौ	१०७	२५
आनन्दपीनपुलक-	११३	८६
इति निगदति यावत्तावत्	१११	६९
इति निशम्य वचः	१०७	३१
इति हरिवचसा तमेत्य	१०५	९
उपप्लुतस्तन्नगरीजनो	१०५	६
उल्लसत्कनककेतकोदराभ्	११०	५९
ऊचेऽथ स म्लान-	११५	९४
एवं निपीय वचनम्	११३	८३
कण्ठालम्बितकालकूट-	११०	५७
कथमपि नगरीमुपेत्य	१०८	३३
कल्पद्रुमः कल्पलता तथैव	१०६	१५
कुरङ्गशावस्पृहणीयनेत्राम्	११३	७८
केनाकारि शिला वधूर्जलनिधौ	११०	५४
गुञ्जापुञ्जादिभिः किं तव	१०७	२८
गोपिकानयनकैरवेन्दवे	११२	७५
चिरमयमनलो यक्ष(दा)शु	१११	६८
चैलाञ्चलेनास्रवदश्रुधारा-	११५	९६
जनकनृपसुतानुकारहेतोः	१०८	३८
जनकनृपसुताविभूषिताङ्गः	१०८	४३
जनैरशेषैः किल पाणि-	१०५	५
जितमदनविलासम्	१०९	४६
जि(जी)वन्त एव हि जनाः	१०७	२३
ततः पटीरद्रवसान्द्र-	११५	९३
ततो गरुत्मन्तमुवाच	१०५	७
तदनु यावदसौ कथमप्यहो !	१०८	३२
तद्रूपमी(मे)क्ष्य तडिदम्बुद-	११३	८४
तामङ्गकान्ति सुकुमारताम्	१०८	३९
तावत्सुतभ्रातृकलत्रमित्रैः	११२	७४
तिर्यग्योनिषु नावतारकलनम्	११०	५६
त्वत्तो न काचिदधिका	११०	६१
त्वं भक्तकल्पक(ल)तिका	११३	८२
त्वं भूपरत्नमवनी-	११०	६०
त्वं मामकोऽसि भवतोऽहम्-	१०९	४९
दशरथसदनावतारमूर्तेरथ	१०८	३६
दिव्याङ्गनाधिकमनोहर-	१०७	२६
द्विर्दानं न कदापि	११०	५५
न के नरास्तत्र	१०५	४
नन्दत्यपि श्रीयदुवंशवीरे	१०५	३
नवाम्बुदश्यामलमम्बुजेक्षणम्	११२	७०
निरवधि सुखधाम नाम	१११	६५
निरुपमसुखदो हि	१११	६७
निःसीमलावण्यतरङ्गभङ्गीम्	११३	८०
नीता व(य)दाहमुदरम्	११४	८७
परादनुप्रव्रज्य-	११५	९९
पवनसुत ! जगत्त्रयेऽपि	१०९	४८
पीतो(तीर्णो)नाम्बुनिधिः	१०९	५३
पीयूषसिन्धुलहरी-	११४	९०
पुर्यः शतं सन्ति	१०६	१२
पूर्वावतारकलनम्	११४	९१
प्रस्थानकालं(ले) नितराम्	११५	९५
ब्रह्माद्वयं त्वमसि	११२	७१
ब्रह्मेन्द्ररुद्रसलिलेन्द्र-	११२	७३
भगवता भवता श्रुतनिर्मलम्	१०६	१९
मधुरतराणि वचांस्यवोचमादौ	१०८	३४

	पृष्ठे	श्लोकः		पृष्ठे	श्लोकः
मनसा वचसा च कर्मणा	११५	१०१	लब्धं यतः सकलतारक-	१०७	२४
मन्त्रैर्व्रतैर्वितरणैः	११४	८९	वरतनु ! यदहं भवामि	१०८	३७
मातस्त्वदीयचरण-	१११	६२	वससि हृदि ममानिशम्	१०९	५२
मां नेतुमास्ते यदि	१०७	२७	वसूनां सम्भारे मणिमय-	११५	९८
मुकुन्दवामाङ्गविराजमानाम्	११२	७७	वाचं निपीय जगताम्	१०९	५०
मुखमिलन्मुरली-	१०६	१७	वामाङ्गे(ङ्के) जनकात्मजाम्	१०५	१
मृगेन्द्रगर्वापह-	११३	८१	विधियमवरुणेन्द्र-	१०६	१०
यद्वा तवाम्ब रघुवीर	११४	९२	वेणुं छिद्रयुतं त्यजस्व(?)गुणवत्	१०७	२९
यामिनीशनिभवक्त्रशालिनी	१०८	४०	शिराण(रीष)पुष्पाधिक	११३	७९
रघुकुलतिलकं विनाऽयमात्मा	१०६	२०	शृङ्गारमूर्तिर्मृगलोचनाभिः	१०६	१३
रघुपतिपरिरम्भ-	१०९	४५	श्रीमद्राम भवादृशस्त्रिभुवने	११५	९७
रघुपतिमुखचन्द्रचन्द्रिकायाम्	१०८	४४	श्रीमद्राम विपद्विराम	११०	५८
रघुपतियदुवीरयोर्न भेदो	१०६	२१	श्रीराम ईशे भुवनैकवीरे	१०५	२
रघुपतिवपुराद्रियेत कृष्णो	१०६	२२	श्रीलौगाक्षिकुलारविन्द-	११५	१०२
रघुपतिवपुषो हरेर्निदेशात्	१०८	४१	सत्यं ब्रवीम्युचितम्-	१११	६६
रघुपतिविरहं कथं सहेत	११५	१००	सपदि चल सखे !	१०६	१८
रचयति भगवान् विधाय	१०८	३५	सपदि बत ! पयोधिमुल्लङ्घ	१०५	८
रामः कृपादोलितदृग्विलासः	१०९	४७	सर्वमङ्गलनिदान-	११२	७६
रामः स एष [ब]त	११४	८८	सर्वस्वमुर्व्या[ः]किमनर्घ्यरत्नम्	१०६	११
रामोऽम्बुधिस्त्वमसि	१११	६४	सुखभवपुलकोल्लसत्-	१०८	४२
लङ्कागृहापगतिरध्वनि	१११	६३	स्मरसि यमनिशं त्वमेव	१०६	१६